उप + आ + रम् (रुकना) नाव्यंतिस्युपारंस्त (भट्टिकाव्ये)

रुध (ढाँकना)

अनु+रुध् (आज्ञा मानना) अनुरुध्यस्व भगवतीं वसिष्ठस्यादेशम् (उत्तर०)
वि + रुध् (विरोध करना) विपरीतार्थधीर्यस्मात् विरुद्धमतिकृन्मतम् ।

लप् (बोलना)—

अप + लप (छिपाना) दुष्ट सत्यमपलपति ।
आ + लप् (बातचीत करना) साधु साधुना सह आलपत् ।
प्र + लप् (बकवाद करना) उन्मत्ता सदा प्रलपन्ति ।
वि + लप् (रोना) विललाप स बाष्पगद्गदं सहजामप्यपहाय धीरताम् (रघु०)
सम् + लप् (बातचीत करना) सलापिताना मधुरै वचोभि ।

वद् (कहना)—

अप + वद् (धिक्कारना, निन्दा करना) न्यायमपवदते,नृभ्योऽपवदमानस्य (भट्टि०)
लोकापवादो बलवान् मतो मे (रघुवशे) ।
उप + वद् (चापलूसी करना, प्रार्थना करना) दातारमुपवदते ।
वि + वद् (झगड़ा करना) कृषका क्षेत्रे विवदन्ते ।
अनु + वद् (नकल करना) अनुवदति कठ कपालस्य ।
प्रति + वद् (उत्तर देना) तान् प्रत्यवादीदथ राघवोऽपि ।
सम्प्र + वद् (बागदेना) वरतनु सम्प्रवदन्ति कुक्कुटा ।
(ज़ोर से बोलना) सम्प्रवदन्ते ब्राह्मणा ।
वि + प्र + वद् (झगड़ा करना) विप्रवदन्ते, विप्रवदन्ति वा वैद्या ।

वस् (रहना)—

अधि + वस् (रहना) राम अयोध्यामध्यवसत् ।
उप + वस (उपवास करना) स एकादश्यामुपवसति ।
उप + वस् (समीप रहना) ब्राह्मण ग्रामम् उपवसति ।
नि + वस् (रहना) स कुत्र निवसति ?
प्र + वस् (परदेश में रहना) विधाय वृत्तिं भार्याया प्रवसेत्कार्यवान्नर (मनु०)

वह् (ले जाना)—

उद् + वह् (ब्याह करना) इति शिरसि स वामं पादमाधाय राज्ञा-
मुदवहदनवद्या तामवद्यादपेत (रघुवशे) ।
अति + वह् (बिताना) किं वा मयापि न दिनान्यतिवाहितानि (मालती०)
आ + वह (पैदा करना) महदपि राज्य सुख नावहति ।
आ + वह् (पहनना) मण्डनमावहन्तीम् (चौरपञ्चाशिकायाम्) ।

आ + वह् (धारण करना) मा रोदीर्धैर्यमावह (मार्कण्डेयपुराणे)।
निः + वह् (चलाना) स कार्यमेतत् निर्वहति।
प्र + वह् (बहना) अनेन मार्गेण गङ्गा प्रावहत्।

विद् (जानना)

सम् + विद् (जानना) के न संविदन्ते वायोर्मैनाद्रिर्यथा सखा (भट्टि०)
प्रति + सं + विद् (पहचानना) पितरावपि मा न प्रतिसंविद्याते (दशकु०)

विश् (प्रवेश करना)

अभि + निविश् (घुस जाना) भयं तावत्सैन्यादभिनिविशते सेवक नम् (मुद्रा०)
उप + विश् (बैठना) आसन उपविशतु भवान्।
प्र + विश् (प्रवेश करना) निविशते यदि शूकशिखा पदे सृजति सा
कियतीमति न व्यथाम्। (नैषधे०)

वृत् (होना)—

अनु + वृत् (अनुसरण करना) साधवः साधुमनुवर्तन्ते।
आ + वृत् (वापस जाना) अनिन्द्या नन्दिनी नाम धेनुरावबृते वनात् (रघु०)।
आ + वृत्—णिच् (माला फेरना) अक्षवलयमावर्तयन्तं तापसकुमारमदर्शम्।
परि + वृत् (घूमना) चक्रवत् परिवर्तन्ते दुःखानि च सुखानि च।
नि + वृत् (रुकना) प्रथमोदर निवर्तेत सर्वमांसस्य भक्षणात् (मनुस्मृतौ)।
नि + वृत् (लौटना) न च निम्नादिव सलिलं निवर्तते मे ततो हृदयम् (शाकु०)
यद् गत्वा न निवर्तन्ते तद्धाम परमं मम (भगवद् गीतायाम्)।
प्रति + आ + वृत् (लौटना) अचिरं स प्रत्यावर्तिष्यते।
प्र + वृत् (लगना) प्रवर्ततां प्रकृतिहिताय पार्थिवः (अभि० शाकुन्तले)।
अपरिच्छशक्त्या तदपि प्रवर्तसे ? (कुमारसंभवे)।
प्र + वृत् (शुरू होना) ततः प्रववृते युद्धम्।

सद् (जाना)—

अव + सद् (हिम्मत हारना) प्रतिहतप्रयत्नाः क्षुदमनसा अवसीदन्ति।
उत् + सद् (नाश होना) उत्सीदेयुरिमे लोका न कुर्यां कर्म चेदहम्।
उत्सद् + णिच् (नष्ट करना) अयमसत्येऽभिनिवेशो नियतमुत्सादयिष्यति वः।
आ + सद् (पाना) पान्थः कृपमेकमाससाद।
प्र + सद् (प्रसन्न होना) प्रसीद विश्वेश्वरि पाहि विश्वम् (दुर्गासप्तशत्याम्)।
वि + सद् (दुःखी होना) यूयं मा विषीदत।
नि + सद् (बैठना) यल्लघु तदुत्प्लवते यद् गुरु तन्निषीदति।

उप + सद् (सेवा मे जाना) उपसेदिवान् कौत्स पाणिनिं चिर ततो
व्याकरणमधिजग्मिवान् ।
प्रति + आसद् (अतिसमीप आना) प्रत्यासादति परीक्षा त्व च पाठेऽनवहित ।

सृ (जाना)—

अप + सृ (हटना) इतो दूरमपसर ।
नि + सृ (निकलना) क्षतात् रक्त नि सरति ।
अनु + सृ (पीछा करना) वन यावदनुसरति ।
प्र + सृ (फैलना) प्रससार यशस्तव ।
अभि + सृ (पति के पास जाना) सा अभिसरति ।

स्था (ठहरना)—

अधि + स्था (रहना) साधव साधुतामधितिष्ठन्ति ।
आ + स्था (प्रतिज्ञा करना) जल विष वा तव कारणात् आस्थास्ये (आ०पदम्)
अनु + स्था (करना) मनसापि पापकार्यं नानुतिष्ठेत् ।
अव + स्था (ठहरना) भगवन् ! नावतिष्ठतामत्र ।
उत् + स्था (उठना) उत्तिष्ठोत्तिष्ठ गोविन्द त्यज निद्रा जगत्पते !
प्र + स्था (रवाना होना) प्रीत प्रतस्थे मुनिराश्रमाय ।
प्रति + अव + स्था (विरोध करना) इत्युक्तेरेव प्रत्यवतिष्ठामहे ।
उप + स्था (जाना) अय पन्था काशीमुपतिष्ठते ।
उप + स्था (पूजा करना) स्तुत्य स्तुतिभिरर्थ्याभिरुपतस्थे सरस्वती (रघुवंशे) ।
उप + स्था (मिलना) गगा यमुनामुपतिष्ठते ।
उप + स्था (मैत्री करना) रथिकानुपतिष्ठते ।

हृ (चुरा ले जाना)—

अनु + हृ (निरन्तर अभ्यास करना) पैतृकमश्वा अनुहरन्ते (आत्मनेपदम्) ।
अप + हृ (चुराना) चौर धनमपहरति ।
(मिलना जुलना) रामभद्रमनुहरति (परस्मैपदम्)
अप + हृ (दूर करना) अपाहृये एणु परिश्रमजनितया निद्रया (उत्तरराम०) ।
आ + हृ (लाना) नितम्ब मित्रपरिसरतया म कोटीश्चतस्रो दश चाजहरेति ।
(रघुवशे) ।
उत् + हृ (उद्धार करना) मा तावदुद्धर शुचा दयिताप्रवृत्त्या (विक्रमोर्वशीये) ।
उत् + आ + हृ (उदाहरण देना) त्वा कामिना मदनदूतिमुदाहरन्ति (विक्र०)
अभ्यव + हृ (खाना) सक्तून् पिव धाना खादेत्यभ्यवहरति (पा० अष्टा०)
परि + हृ (छोड़ना) स्नासनिकर्षं परिहर्तुमिच्छन्नन्तर्दधे भूतपति सभूत (कुमा०)

उप + हृ (भेंट देना) देवेभ्यः बलिमुपहरेत् ।
प्र + हृ (मारना) कृष्णः कंसं शिरसि प्राहरत् ।
वि + हृ (क्रीड़ा करना) विहरति हरिरिह सरसवसन्ते । (गीतगोविन्दे)
स कदाचिदवेक्षितप्रजः सह देव्या विजहार सुप्रजः (रघुवंशे) ।
सम् + हृ (हटाना) न हि संहरते ज्योत्स्ना चन्द्रश्चाण्डालवेश्मनः । (हितो०)।
सं + हृ (रोकना) क्रोधं प्रभो संहर संहरेति यावद् गिरः खे मरुतां चरन्ति
तावत्स वह्निर्भवनेत्रजन्मा भस्मावशेषं मदनं चकार ॥ (कुमारसंभवे)

आ + ह्वे (पुकारना)—
(ललकारना) कृष्णश्चाणूरमाह्वयते (आ० पदम्)
आह्वयत चेदिराट् मुरारिम् (शिशु०)
परन्तु—इत एवाह्वयैनमप्यायुष्मन्तम् (उत्तरे०)

संस्कृत में अनुवाद करो—

१—इस बरतन में एक प्रस्थ चावल समा सकता है। २—प्रयाग में यमुना गङ्गा से मिलती है (सम् + गम् + परस्मै०)। ३—लंका से लौटते हुए राम को लिवा लाने के लिये (प्रति + उद् + गम्) भरत आगे बढ़ा। ४—दुष्यन्त ने देखा कि शकुन्तला अपनी सखियों के साथ विहार कर रही है (वि + हृ)। ५—क्या तुम्हारे घर आज एक पाहुना (प्राघुणिकः) आया है (अभि + आ + गम्) ? ६—सज्जन अपकार करनेवाले के साथ भी उपकार करते हैं (उप + कृ)। ७—क्या आपको यह प्रस्ताव स्वीकृत है (अभि + उप + गम्) ? जी हाँ हमारा इससे कोई विरोध नहीं।* ८—उत्सव के अवसर पर स्त्रियाँ अपने को वस्त्रों तथा अलकारों से सजाती हैं। ९—सती स्त्रियाँ अपने पतियों की सेवा करती हैं (उप + चार्)। १०—श्रीमान् जी को मैं कौन व्यक्ति जानूँ (अव + गम्)। ११—सूर्य निकल रहा है और अँधेरा दूर हो रहा है। १२—गङ्गा यमुना से प्रयागराज में मिलती है (उप + स्था + आत्म०) १३—यह सुन्दर पुस्तक किसने बनाई है (प्र + नी) ? १४—उसने दोनों हाथ जोड़ कर (सम + नी) गुरु को प्रणाम किया (प्र + नम्)। १५—भोजन के समय आ जाते हो (उप + स्था) काम के समय कहाँ चले जाते हो ?

---

* ननु नाहमेनं विरुन्धे।

संक्षिप्त धातु-पाठ

भट्टोजि दीक्षित ने सिद्धान्तकौमुदी मे जितनी भी प्रसिद्ध धातुएँ दी हैं तथा जिनका संस्कृत-साहित्य मे विशेष रूप से प्रयोग हुआ है, उन सभी धातुओं का इस पाठ में अकारादिक्रम से समावेश किया गया है। प्रत्येक धातु के समस्त १० लकारों के प्रारम्भिक रूप (प्रथम पुरुष के एकवचन) ही इस प्रकरण मे दिये गये हैं। साथ ही प्रत्येक धातु के णिच् प्रत्यय और कर्मवाच्य के रूप भी संगृहीत हैं। इस पाठ में लगभग ५०० धातुएँ दी गयी हैं।

जो धातु या क्रिया जिस गण की है, उसके रूप उस गण की क्रियाओं के समान होंगे। क्रिया-प्रकरण म प्रत्येक गण के प्रारम्भ म उस गण के सम्बन्ध में विशेष बातें बतला दी गयी हैं और साथ ही मुख्य-मुख्य रूप भी दिये हुए हैं। जो क्रिया जिस गण की और जिस पद (परस्मैपद, आत्मनेपद या उभयपद) की है, उसके रूप उस गण में निर्दिष्ट क्रिया के रूपों की भाँति चलते हैं। जो उभयपदी क्रियाएँ परस्मैपद में ही अधिक प्रचलित हैं, उनके रूप परस्मैपद में ही दिये गये हैं और जिनके रूप दोनों पदों में प्रचलित हैं उनके रूप दोनों पदों म दिये गये हैं। जिन उभयपदी क्रियाओं के रूप यहाँ आत्मनेपद म नहीं दिये गये हैं, उनके आत्मनेपद के रूप उस गण की अन्य आत्मनेपदी क्रियाओं के तुल्य समझने चाहिएँ।

प्रत्येक धातु के साथ कोष्ठ में सकेत द्वारा बतला दिया गया है कि वह धातु किस गण की है और किस पद मे उसके रूप चलते हैं। कोष्ठ के भीतर धातु का अर्थ भी दिया गया है। धातुओं के अर्थ सांकेतिक हैं। कतिपय धातुओं के अनेक अर्थ हैं।

सिद्धान्तकौमुदी के लकारों का जो प्रामाणिक क्रम है उसी क्रम से हमने धातुओं के रूप इस पाठ में दिये हैं—लट्, लिट्, लुट्, लृट, लोट्, लङ्, विधिलिङ्, आशीर्लिङ्, लुङ् तथा लृङ्। अन्त में णिजन्त और भावकर्मवाच्य के रूप दिये गये हैं। पृष्ठ के ऊपर लकारों के नाम दिये हैं और उनके नीचे प्रत्येक पंक्ति में उस लकार के रूप। धातुओं के रूप दाएँ और बाएँ दोनों पृष्ठों पर फैले हुए हैं, अतः आमने-सामने के दोनों पृष्ठ देखने चाहिएँ।

लङ्, लुङ् और लृङ् में अ या आ मूल धातु से ही पहले लगते हैं, उपसर्ग से पूर्व कदापि नहीं। अतः सोपसर्ग धातुओं के लङ् आदि में धातु से पहले अ या आ लगाकर उपसर्ग से मिलाना चाहिए, सन्धिकार्य आवश्यक हो तो करना चाहिए। स्वर-आदिवाली धातुओं के पहले 'आ' और व्यञ्जन-आदिवाली धातुओं के पहले 'अ' लगाना चाहिए, यथा—प्र + अक्षालयत् = प्राक्षालयत् (अ + प्रक्षालयत् नहीं), प्र + अशासत् = प्राशासत् (अ + प्रशासत् नहीं)।

इस पाठ में हमने निम्नलिखित सकेतों का प्रयोग किया है—प० = परस्मैपदी। आ० = आत्मनेपदी। उ० = उभयपदी। १ = भ्वादिगण। २ = अदादिगण। ३ = जुहोत्यादिगण। ४ = दिवादिगण। ५ = स्वादिगण। ६ = तुदादिगण। ७ = रुधादिगण। ८ = तनादिगण। ९ = क्र्यादिगण। १० = चुरादिगण। ११ = कण्ड्वादिगण।

धातु	अर्थ	लट्	लिट्	लुट्	लृट्	लोट्
अगि	(१ प०, जाना)	अगति	आनंग	अगिता	अंगिष्यति	अंगतु
अङ्क्	(१ आ०, चिह्नितक०)	अंकते	आनके	अंकिता	अंकिष्यते	अंकताम्
अञ्ज्	(७ प०, कान्ति)	अनक्ति	आनञ्ज	{ अङ्क्ता { अञ्जिता	{ अङ्क्ष्यति { अञ्जिष्यति	अनक्तु
अंचु	(१ प०, पूजा करना)	अंचति	आनच	अंचिता	अंचिष्यति	अंचतु
अट्	(१ प०, घूमना)	अटति	आट	अटिता	अटिष्यति	अटतु
अत्	(१प०,सदा घूमना)	अतति	आत	अतिता	अतिष्यति	अततु
अद्	(२ प०, खाना)	अत्ति	आद, जघास	अत्ता	अत्स्यति	अत्तु
अन्	(२प०, जीवित रहना)	प्र + अनिति	आन	अनिता	अनिष्यति	अनितु
अय्	(१आ०, जाना)	पला + अयते	अयांचक्रे	अयिता	अयिष्यते	अयताम्
अर्च्	(१ प०, पूजना)	अर्चति	आनर्च	अर्चिता	अर्चिष्यति	अर्चतु
अर्ज्	(१ प०, कमाना)	अर्जति	आनर्ज	अर्जिता	अर्जिष्यति	अर्जतु
अर्द्	(१०आ०, सताना)	अर्दयति	अर्दयाचक्रे	अर्दयिता	अर्दयिष्यते	अर्दयताम्
अर्ह्	(१प०योग्य होना)	अर्हति	आनर्ह	अर्हिता	अर्हिष्यति	अर्हतु
अव्	(१ प०, रक्षा करना)	अवति	आव	अविता	अविष्यति	अवतु
अशु	(५आ०, व्याप्त होना)	अश्नुते	आनशे	अशिता	अशिष्यते	अश्नुताम्
अश्	(९ प०, खाना)	अश्नाति	आश	अशिता	अशिष्यति	अश्नातु
अस्	(२ प०, होना)	अस्ति	बभूव	भविता	भविष्यति	अस्तु
असु	(४ प०, फेंकना)	अस्यति	आस	असिता	असिष्यति	अस्यतु
असु	(११ प०, द्रोहक०)	असूयति	असूयाचकार	असूयिता	असूयिष्यति	असूयतु
आन्दोल्	(१०उ०, हिलाना)	अन्दोलयति	आन्दोलयाचकार	आन्दोलयिता	आन्दोलयिष्यति	आन्दोलयतु
आप्	(५ प०, जाना)	आप्नोति	आप	आप्ता	आप्स्यति	आप्नोतु
आप्	(१०उ०, पहुँचाना)	आपयति-ते	आपयाचकार	आपयिता	आपयिष्यति	आपयतु
आस्	(२ आ०, बैठना)	आस्ते	आसाचक्रे	आसिता	आसिष्यते	आस्ताम्
इ	(२ प०, जाना)	एति	इयाय	एता	एष्यति	एतु
इ	(२आ०, अधि +, पढ़ना)	अधीते	अधिजगे	अध्येता	अध्येष्यते	अधीताम्
इन्धि	(७ आ०, जलना)	इन्धे	इन्धांचक्रे	इन्धिता	इन्धिष्यते	इन्धाम्
इष्	(४प०, जाना) अनु +	इष्यति	इयेष	एषिता	एषिष्यति	इष्यतु
इष्	(६ प०, चाहना)	इच्छति	इयेष	एषिता	एषिष्यति	इच्छतु
ईङ्	(४ आ०, जाना)	ईयते	अयाचक्रे	एता	एष्यते	ईयताम्
ईक्ष्	(१ आ०, देखना)	ईक्षते	ईक्षाचक्रे	ईक्षिता	ईक्षिष्यते	ईक्षताम्
ईड्	(२आ०, स्तुति करना)	ईट्टे	ईडाचक्रे	ईडिता	ईडिष्यते	ईट्टाम्
ईर्	(१०उ०, प्रेरणा०) प्र +	ईरयति-ते	ईरयाचकार	ईरयिता	ईरयिष्यति	ईरयतु

लङ्	विधिलिङ्	आशीर्लिङ्	लुङ्	लृङ्	णिच्	कर्मवाच्य
आगत्	अगेत्	अग्यात्	आगीत्	आगिष्यत्	अगयति	अग्यते
आकृत	अकेत	अक्रिषीष्ट	आक्रिष्ट	आक्रिष्यत	अङ्कयते	अङ्क्यते
आनक्	अञ्ज्यात्	अज्यात्	आञ्जीत्	आञ्जिष्यत्	अञ्जयति	अज्यते
आचत्	अचेत्	अच्यात्	आचीत्	आचिष्यत्	अचयति	अच्यते
आटत्	अटेत्	अट्यात्	आटीत्	आटिष्यत्	आटयति	अट्यते
आतत्	अतेत्	अत्यात्	आतात्	आतिष्यत्	आतयति	अत्यते
आदत्	अद्यात्	अद्यात्	अघसत्	आत्स्यत्	आदयति	अद्यते
आनत्	अन्यात्	अन्यात्	आनीत्	आनिष्यत्	आनयति	अन्यते
आयत	अयेत	अयिषीष्ट	आयिष्ट	आयिष्यत	आययते	अय्यते
आर्चत्	अर्चेत्	अर्च्यात्	आर्चीत्	आर्चिष्यत्	अर्चयति	अर्च्यते
आर्जत्	अर्जेत्	अर्ज्यात्	आर्जीत्	आर्जिष्यत्	अर्जयति	अर्ज्यते
आर्दयत्	अर्दयेत्	अर्दयिषीष्ट	आर्दिदत	आर्दयिष्यत्	अर्दयते	अर्द्यते
आर्हत्	अर्हेत्	अर्ह्यात्	आर्हीत्	आर्हिष्यत्	अर्हयति	अर्ह्यते
आवत्	अवेत्	अव्यात्	आवीत्	आविष्यत्	आवयति	अव्यते
आश्नुत	अश्नुवीत	अशिषीष्ट	आशिष्ट	आशिष्यत	आशयति	अश्यते
आश्नात्	अश्नीयात्	अश्यात्	आशीत्	आशिष्यत्	आशयति	अश्यते
आसीत्	स्यात्	भूयात्	अभूत्	अभविष्यत्	भावयति	भूयते
आस्यत्	अस्येत्	अस्यात्	आस्थत्	आसिष्यत्	आसयति	अस्यते
आसूयत्	असूयेत्	असूय्यात्	आसूयीत्	आसूयिष्यत्	असूययति	असूय्यते
आन्दोलयत्	आन्दोलयेत्	आन्दोलयात्	आन्दुदोलत्	आन्दोलयिष्यत्	आन्दोलयति	आन्दोल्यते
आप्नोत्	आप्नुयात्	आप्यात्	आपत्	आप्स्यत्	आपयति	आप्यते
आपयत्	आपयेत्	आप्यात्	आपिपत्	आपयिष्यत्	आपयति	आप्यते
आस्त	आसीत	आसिषीष्ट	आसिष्ट	आसिष्यत	आसयति	आस्यते
ऐत्	इयात्	ईयात्	अगात्	ऐष्यत्	गमयति	ईयते
अध्यैत	अधीयीत	अध्येषीष्ट	अध्यैष्ट	अध्यैष्यत	अध्यापयति	अधीयते
ऐन्ध	इन्धीत	इन्धिषीष्ट	ऐन्धिष्ट	ऐन्धिष्यत	इन्धयति	इध्यते
ऐष्यत्	इष्येत्	इष्यात्	ऐषीत्	ऐषिष्यत्	एषयति	इष्यते
ऐच्छत्	इच्छेत्	इष्यात्	ऐषीत्	ऐषिष्यत्	एषयति	इष्यते
एवत	इयत	एगाट	ऐष्ट	ऐष्यत	आययते	ईष्यते
ऐक्षत	ईक्षेत	ईक्षिषीष्ट	ऐक्षिष्ट	ऐक्षिष्यत	ईक्षयति	ईक्ष्यते
ऐट्ट	ईडीत	ईडिषीष्ट	ऐडिष्ट	ऐडिष्यत	ईडयति	ईड्यते
ऐरयत्	ईरयेत्	ईर्यात्	ऐरिरत्	ऐरयिष्यत्	ईरयति	ईर्यते

धातु	अर्थ	लट्	लिट्	लुट्	लृट्	लोट्
ईर्ष्य्	(१ प०, ईर्ष्या०)	ईर्ष्यति	ईर्ष्याचकार	ईर्ष्यिता	ईर्ष्यिष्यति	ईर्ष्यतु
ईश्	(२ आ०, ऐश्वर्य०)	ईष्टे	ईशाचक्रे	ईशिता	ईशिष्यते	ईष्टाम्
ईह्	(१ आ०, चाहना)	ईहते	ईहाचक्रे	ईहिता	ईहिष्यते	ईहताम्
उञ्छ्	(१ प० बीनना)	उञ्छति	उञ्छाचकार	उञ्छिता	उञ्छिष्यति	उञ्छतु
उज्झ्	(६ प०, छोड़ना)	उज्झति	उज्झाचकार	उज्झिता	उज्झिष्यति	उज्झतु
उन्द्	(७ प०, भिगोना)	उनत्ति	उन्दाचकार	उन्दिता	उन्दिष्यति	उनत्तु
ऊह्	(१ आ०, तर्क०),	ऊहते	ऊहाचक्रे	ऊहिता	ऊहिष्यते	ऊहताम्
ऋ	(१ प० जाना, पहुँचाना)	ऋच्छति	आर	अर्ता	अरिष्यति	ऋच्छतु
ऋच्छ्	(६ प०, जाना)	ऋच्छति	आनर्च्छ	ऋच्छिता	ऋच्छिष्यति	ऋच्छतु
ऋज्	(१ आ० कमाना)	अर्जते	आनृजे	अर्जिता	अर्जिष्यते	अर्जताम्
एज्	(१ प०, काँपना)	एजति	एजाञ्चकार	एजिता	एजिष्यति	एजतु
एध्	(१ आ०, बढ़ना)	एधते	एधाचक्रे	एधिता	एधिष्यते	एधताम्
ओण्	(१ प०, हटाना)	ओणति	ओणाचकार	ओणिता	ओणिष्यति	ओणतु
कण्डू	(११ उ०, खुजलाना)	कण्डूयति-ते	कण्डूयांचकार	कण्डूयिता	कण्डूयिष्यति	कण्डूयतु
कत्थ्	(१ अपनी प्रशंसा क०)	कत्थते	चकत्थ	कत्थिता	कत्थिष्यते	कत्थताम्
कथ्	(१० उ०, कहना) प०	कथयति	कथयाचकार	कथयिता	कथयिष्यति	कथयतु
	आ०	कथयते	कथयाचक्रे	कथयिता	कथयिष्यते	कथयताम्
कम्	(१ आ०, चाहना)	कामयते	कामयांचक्रे	कामयिता	कामयिष्यते	कामयताम्
कम्प्	(१ आ०, काँपना)	कम्पते	चकम्पे	कम्पिता	कम्पिष्यते	कम्पताम्
काङ्क्ष्	(१ प०, चाहना)	काङ्क्षति	चकाङ्क्ष	काङ्क्षिता	काङ्क्षिष्यति	काङ्क्षतु
काश्	(१ आ०, चमकना)	काशते	चकाशे	काशिता	काशिष्यते	काशताम्
कास्	(१ आ०, खाँसना)	कासते	कासाचक्रे	कासिता	कासिष्यते	कासताम्
कित्	(१ प०, रोग दूर करना)	चिकित्सति	चिकित्सा-चकार	चिकित्सिता	चिकित्सिष्यति	चिकित्सतु
कील्	(१ प०, गाड़ना)	कीलति	चिकील	कीलिता	कीलिष्यति	कीलतु
कु	(२ प०, गूँजना)	कौति	चुकाव	कोता	कोष्यति	कौतु
कुञ्च्	(१ प०, कम होना)	कुञ्चति	चुकुञ्च	कुञ्चिता	कुञ्चिष्यति	कुञ्चतु
कुत्स्	(१० आ०, दोष देना)	कुत्सयते	कुत्सयांचक्रे	कुत्सयिता	कुत्सयिष्यते	कुत्सयताम्
कुथ्	(१ प० क्लेश०)	कुथति	चुकुंथ	कुंथिता	कुथिष्यति	कुंथतु
कुप्	(४ प०, क्रोध०)	कुप्यति	चुकोप	कोपिता	कोपिष्यति	कुप्यतु
कूर्द्	(१ आ०, कूदना)	कूर्दते	चुकूर्दे	कूर्दिता	कूर्दिष्यते	कूर्दताम्
कूज्	(१ प०, चूँ-चूँ करना)	कूजति	चुकूज	कूजिता	कूजिष्यति	कूजतु
कृ	(८ उ०, करना) प०	करोति	चकार	कर्ता	करिष्यति	करोतु
	आ०	कुरुते	चक्रे	कर्ता	करिष्यते	कुरुताम्

लङ्	विधिलिङ्	आशीर्लिङ्	लुङ्	लृङ्	णिच्	कर्मवाच्य
ऐर्ष्यत्	ईर्ष्येत्	ईर्ष्यात्	ऐर्ष्यीत्	ऐर्ष्यिष्यत्	ईर्ष्ययति	ईर्ष्यते
ऐष्ट	ईशीत	ईशिषीष्ट	ऐशिष्ट	ऐशिष्यत	ईशयति	ईश्यते
ऐहत	ईहेत	ईहिषीष्ट	ऐहिष्ट	ऐहिष्यत	ईहयति	ईह्यते
औन्दत्	उन्देत्	उद्यात्	औन्दीत्	औन्दिष्यत्	उन्दयति	उद्यते
औज्झत्	उज्झेत्	उज्झ्यात्	औज्झीत्	औज्झिष्यत्	उज्झयति	उज्झ्यते
औनत्	उन्द्यात्	उद्यात्	औन्दीत्	औन्दिष्यत्	उन्दयति	उद्यते
औहत	ऊहेत	ऊहिषीष्ट	औहिष्ट	औहिष्यत	ऊहयति	ऊह्यते
आर्च्छत्	ऋच्छेत्	अर्यात्	आर्षीत्	आरिष्यत्	आरयति	अर्यते
आर्च्छत्	ऋच्छेत्	ऋच्छ्यात्	आर्च्छीत्	आर्च्छिष्यत्	ऋच्छयति	ऋच्छ्यते
आर्जत	अर्जेत	अर्जिषीष्ट	आर्जिष्ट	आर्जिष्यत	अर्जयते	अर्ज्यते
ऐजत्	एजेत्	एज्यात्	ऐजीत्	ऐजिष्यत्	एजयति	एज्यते
ऐधत	एधेत	एधिषीष्ट	ऐधिष्ट	ऐधिष्यत	एधयति	एध्यते
औणत्	ओणेत्	ओण्यात्	औणीत्	औणिष्यत्	ओणयति	ओण्यते
अकण्डूयत्	कण्डूयेत्	कण्डूय्यात्	अकण्डूयीत्	अकण्डूयिष्यत्	कण्डूययति	कण्डूय्यते
अकत्थत	कत्थेत	कत्थिषीष्ट	अकत्थिष्ट	अकत्थिष्यत	कत्थयति	कत्थ्यते
अकथयत्	कथयेत्	कथ्यात्	अचकथत्	अकथयिष्यत्	कथयति	कथ्यते
अकथयत	कथयेत	कथयिषीष्ट	अचकथत	अकथयिष्यत	कथयति	कथ्यते
अकामयत	कामयेत	कामयिषीष्ट	अचीकमत	अकामयिष्यत	कामयति	काम्यते
अकम्पत	कम्पेत	कम्पिषीष्ट	अकम्पिष्ट	अकम्पिष्यत	कम्पयति	कम्प्यते
अकादत्	कादेत्	काद्यात्	अकादीत्	अकादिष्यत्	कादयति	काद्यते
अकाशत	काशेत	काशिषीष्ट	अकाशिष्ट	अकाशिष्यत	काशयति	काश्यते
अकासत	कासेत	कासिषीष्ट	अकासिष्ट	अकासिष्यत	कासयति	कास्यते
अचिकि-त्सत्	चिकित्सेत्	चिकित्स्यात्	अचिकि-त्सीत्	अचिकि-त्सिष्यत्	चिकित्स-यति	चिकित्स्यते
अकीलत्	कीलेत्	कील्यात्	अकीलीत्	अकीलिष्यत्	कीलयति	कील्यते
अकौत्	कुयात्	कूयात्	अकौषीत्	अकोष्यत्	कावयति	कूयते
अकुञ्चत्	कुञ्चेत्	कुच्यात्	अकुञ्चीत्	अकुञ्चिष्यत	कुञ्चयति	कुच्यते
अकुत्सयत	कुत्सयेत	कुत्सयिषीष्ट	अचुकुत्सत	अकुत्सयिष्यत	कुत्सयते	कुत्स्यते
अकुथत्	कुथेत्	कुथ्यात्	अकुथीत्	अकुथिष्यत्	कुथयति	कुथ्यते
अकुप्यत्	कुप्येत्	कुप्यात्	अकुपत्	अकोपिष्यत्	कोपयति	कुप्यते
अकूर्दत	कूर्देत	कूर्दिषीष्ट	अकूर्दिष्ट	अकूर्दिष्यत	कूर्दयति	कूर्द्यते
अकूजत्	कूजेत्	कूज्यात्	अकूजीत्	अकूजिष्यत्	कूजयति	कूज्यते
अकरोत्	कुर्यात्	क्रियात्	अकार्षीत्	अकरिष्यत्	कारयति	क्रियते
अकुरुत	कुर्वीत	कृषीष्ट	अकृत	अकरिष्यत	कारयति	क्रियते

धातु.	अर्थ	लट्	लिट्	लुट्	लृट्	लोट्
कृत्	(६ प०, काटना)	कृन्तति	चकर्त	कर्तिता	कर्तिष्यति	कृन्ततु
कृप्	(१आ०, समर्थ होना)	कल्पते	चक्लृपे	कल्पिता	कल्पिष्यते	कल्पताम्
कृष्	(१ प०, जोतना)	कर्षति	चकर्ष	कर्ष्टा	कर्क्ष्यति	कर्षतु
कॄ	(६ प०, बखेरना)	किरति	चकार	करिता	करिष्यति	किरतु
कॄत्	(१० उ०, नाम लेना)	कीर्तयति-ते	कीर्तयाचकार	कीर्तयिता	कीर्तयिष्यति	कीर्तयतु
क्रन्द्	(१ प०, रोना)	क्रन्दति	चक्रन्द	क्रन्दिता	क्रन्दिष्यति	क्रन्दतु
क्रम्	(१ प०, चलना)	क्रामति	चक्राम	क्रमिता	क्रमिष्यति	क्रामतु
क्री	(९ उ०, खरीदना) प०-	क्रीणाति	चिक्राय	क्रेता	क्रेष्यति	क्रीणातु
	आ०-	क्रीणीते	चिक्रिये	क्रेता	क्रेष्यते	क्रीणीताम्
क्रीड्	(१ प०, खेलना)	क्रीडति	चिक्रीड	क्रीडिता	क्रीडिष्यति	क्रीडतु
क्रुध्	(४ प०, क्रुद्ध होना)	क्रुध्यति	चुक्रोध	क्रोद्धा	क्रोत्स्यति	क्रुध्यतु
क्रुश्	(१ प०, रोना)	क्रोशति	चुक्रोश	क्रोष्टा	क्रोक्ष्यति	क्रोशतु
क्लम्	(४ प०, थकना)	क्लाम्यति	चक्लाम	क्लमिता	क्लमिष्यति	क्लाम्यतु
क्लिद्	(४ प०, गीला होना)	क्लिद्यति	चिक्लेद	क्लेदिता	क्लेदिष्यति	क्लिद्यतु
क्लिश्	(४ आ०, विघ्नहोना)	क्लिश्यते	चिक्लिशे	क्लेशिता	क्लेशिष्यते	क्लिश्यताम्
क्लिश्	(९ प०, दुःख देना)	क्लिश्नाति	चिक्लेश	क्लेशिता	क्लेशिष्यति	क्लिश्नातु
क्वण्	(१ प०, झंकार करना)	क्वणति	चक्वाण	क्वणिता	क्वणिष्यति	क्वणतु
क्वथ्	(१ प०, पकाना)	क्वथति	चक्वाथ	क्वथिता	क्वथिष्यति	क्वथतु
क्षम्	(१ आ०, क्षमा करना)	क्षमते	चक्षमे	क्षमिता	क्षमिष्यते	क्षमताम्
क्षम्	(४ प०, क्षमा०)	क्षाम्यति	चक्षाम	क्षमिता	क्षमिष्यति	क्षाम्यतु
क्षर्	(१ प०, बहना)	क्षरति	चक्षार	क्षरिता	क्षरिष्यति	क्षरतु
क्षल्	(१० उ०, धोना) प्र +	क्षालयति-ते	क्षालयाचकार	क्षालयिता	क्षालयिष्यति	क्षालयतु
क्षि	(१ प०, नष्ट होना)	क्षयति	चिक्षाय	क्षेता	क्षेष्यति	क्षयतु
क्षिप्	(६ उ०, फेंकना)	क्षिपति-ते	चिक्षेप	क्षेप्ता	क्षेप्स्यति	क्षिपतु
क्षीव्	(१ आ०, मत्त होना)	क्षीवते	चिक्षीवे	क्षीविता	क्षीविष्यते	क्षीवताम्
क्षुद्	(७ उ०, पीसना)	क्षुणत्ति	चुक्षोद	क्षोत्ता	क्षोत्स्यति	क्षुणत्तु
क्षुध्	(४ प०, भूख लगना)	क्षुध्यति	चुक्षोध	क्षोद्धा	क्षोत्स्यति	क्षुध्यतु
क्षुभ्	(१ आ०, क्षुब्ध होना)	क्षोभते	चुक्षुभे	क्षोभिता	क्षोभिष्यते	क्षोभताम्
क्षै	(१ प०, क्षीण होना)	क्षायति	चक्षौ	क्षाता	क्षास्यति	क्षायतु
क्ष्णु	(२ प०, तेज करना)	क्ष्णौति	चुक्ष्णाव	क्ष्णविता	क्ष्णविष्यति	क्ष्णौतु
खण्ड्	(१० उ०, तोड़ना)	खण्डयति-ते	खण्डयाचकार	खण्डयिता	खण्डयिष्यति	खण्डयतु
खन्	(१ उ०, खोदना)	खनति-ते	चखान	खनिता	खनिष्यति	खनतु
खाद्	(१ प०, खाना)	खादति	चखाद	खादिता	खादिष्यति	खादतु
खिद्	(४ आ०, खिन्न होना)	खिद्यते	चिखिदे	खेत्ता	खेत्स्यते	खिद्यताम्

लङ्	विधिलिङ्	आशीर्लिङ्	लुङ्	लृङ्	णिच्	कर्मवाच्य
अकृन्तत्	कृन्तेत्	कृत्यात्	अकर्तीत्	अकर्तिष्यत्	कर्तयति	कृत्यते
अकल्पत	कल्पेत	कल्पिषीष्ट	अक्लृप्त	अकल्पिष्यत	कल्पयति	क्लृप्यते
अकर्षत्	कर्षेत्	कृष्यात्	अकार्क्षीत्	अकर्क्ष्यत्	कर्षयति	कृष्यते
अकिरत्	किरेत्	कीर्यात्	अकारीत्	अकरिष्यत्	कारयति	कीर्यते
अकीर्तयत्	कीर्तयेत्	कीर्त्यात्	अचिकीर्तत्	अकीर्तयिष्यत्	कीर्तयति	कीर्त्यते
अक्रन्दत्	क्रन्देत्	क्रन्द्यात्	अक्रन्दीत्	अक्रन्दिष्यत्	क्रन्दयति	क्रन्द्यते
अक्रामत्	क्रामेत्	क्रम्यात्	अक्रमीत्	अक्रमिष्यत्	क्रमयति	क्रम्यते
अक्रीणात्	क्रीणीयात्	क्रीयात्	अक्रैषीत्	अक्रेष्यत्	क्रापयति-ते	क्रीयते
अक्रीणीत	क्रीणीत	क्रेषीष्ट	अक्रेष्ट	अक्रेष्यत	क्रापयति	क्रीयते
अक्रीडत्	क्रीडेत्	क्रीड्यात्	अक्रीडीत्	अक्रीडिष्यत्	क्रीडयति	क्रीड्यते
अक्रुध्यत्	क्रुध्येत्	क्रुध्यात्	अक्रुधत्	अक्रोत्स्यत्	क्रोधयति	क्रुध्यते
अक्रोशत्	क्रोशेत्	क्रुश्यात्	अक्रुक्षत्	अक्रोक्ष्यत्	क्रोशयति	क्रुश्यते
अक्लाम्यत्	क्लाम्येत्	क्लम्यात्	अक्लमत्	अक्लमिष्यत्	क्लमयति	क्लम्यते
अक्लिद्यत्	क्लिद्येत्	क्लिद्यात्	अक्लिदत्	अक्लेदिष्यत्	क्लेदयति	क्लिद्यते
अक्लिश्यत	क्लिश्येत	क्लेशिषीष्ट	अक्लेशिष्ट	अक्लेशिष्यत	क्लेशयति	क्लिश्यते
अक्लिश्नात्	क्लिश्नीयात्	क्लिश्यात्	अक्लेशीत्	अक्लेशिष्यत्	क्लेशयति	क्लिश्यते
अक्वणत्	क्वणेत्	क्वण्यात्	अक्वणीत्	अक्वणिष्यत्	क्वाणयति	क्वण्यते
अक्वथत्	क्वथेत्	क्वथ्यात्	अक्वथीत्	अक्वथिष्यत्	क्वाथयति	क्वथ्यते
अक्षमत	क्षमेत	क्षमिषीष्ट	अक्षमिष्ट	अक्षमिष्यत	क्षमयति	क्षम्यते
अक्षाम्यत्	क्षाम्येत्	क्षम्यात्	अक्षमत्	अक्षमिष्यत्	क्षमयति	क्षम्यते
अक्षरत्	क्षरेत्	क्षर्यात्	अक्षारीत्	अक्षरिष्यत्	क्षारयति	क्षर्यते
अक्षालयत्	क्षालयेत्	क्षाल्यात्	अचिक्षलत्	अक्षालयिष्यत्	क्षालयति	क्षाल्यते
अक्षयत्	क्षयेत्	क्षीयात्	अक्षैषीत्	अक्षेष्यत्	क्षाययति	क्षीयते
अक्षिपत्	क्षिपेत्	क्षिप्यात्	अक्षैप्सीत्	अक्षेप्स्यत्	क्षेपयति	क्षिप्यते
अक्षीवत	क्षीवेत	क्षीविषीष्ट	अक्षीविष्ट	अक्षीविष्यत	क्षीवयति	क्षीव्यते
अक्षुणत्	क्षुन्द्यात्	क्षुद्यात्	अक्षुदत्	अक्षोत्स्यत्	क्षोदयति	क्षुद्यते
अक्षुध्यत्	क्षुध्येत्	क्षुध्यात्	अक्षुधत्	अक्षोत्स्यत्	क्षोधयति	क्षुध्यते
अक्षोभत	क्षोभेत	क्षोभिषीष्ट	अक्षुभत	अक्षोभिष्यत	क्षोभयति	क्षुभ्यते
अक्षायत्	क्षायेत्	क्षायात्	अक्षासीत्	अक्षास्यत्	क्षपयति	क्षायते
अक्ष्णौत्	क्ष्णुयात्	क्ष्णूयात्	अक्ष्णावीत्	अक्ष्णविष्यत्	क्ष्णावयति	क्ष्णूयते
अखण्डयत्	खण्डयेत्	खण्ड्यात्	अचखण्डत्	अखण्डयिष्यत्	खण्डयति	खण्ड्यते
अखनत्	खनेत्	खन्यात्	अखनीत्	अखनिष्यत्	खानयति	खन्यते
अखादत्	खादेत्	खाद्यात्	अखादीत्	अखादिष्यत्	खादयति	खाद्यते
अखिद्यत	खिद्येत	खित्सीष्ट	अखित्त	अखेत्स्यत	खेदयति	खिद्यते

धातु	अर्थ	लट्	लिट्	लुट्	लृट्	लोट्
खिदे	(७आ०दैन्यदि०)	खिन्ते	चिखिदे	खेत्ता	खेत्स्यते	खिताम्
खेल्	(१ प०, खेलना)	खेलति	चिखेल	खेलिता	खेलिष्यति	खेलतु
गण्	(१०उ०, गिनना)	गणयति-ते	गणयाञ्चकार	गणयिता	गणयिष्यति	गणयतु
गद्	(१प०, कहना)नि +	गदति	जगाद	गदिता	गदिष्यति	गदतु
गम्	(१प०, जाना)	गच्छति	जगाम	गन्ता	गमिष्यति	गच्छतु
गर्ज्	(१ प०, गरजना)	गर्जति	जगर्ज	गर्जिता	गर्जिष्यति	गर्जतु
गर्व्	(१ प०, घमंड करना)	गर्वति	जगर्व	गर्विता	गर्विष्यति	गर्वतु
गर्ह्	(१ आ०, निन्दा करना)	गर्हते	जगर्हे	गर्हिता	गर्हिष्यते	गर्हताम्
गर्ह्	(१०उ०,निन्दा क०)	गर्हयति-ते	गर्हयाञ्चकार	गर्हयिता	गर्हयिष्यति	गर्हयतु
गवेष्	(१० उ०, खोजना)	गवेषयति	गवेषयाञ्चकार	गवेषयिता	गवेषयिष्यति	गवेषयतु
गाह्	(१ आ०, घुसना)	गाहते	जगाहे	गाहिता	गाहिष्यते	गाहताम्
गुञ्ज्	(१ प०, गूँजना)	गुञ्जति	जुगुञ्ज	गुञ्जिता	गुञ्जिष्यति	गुञ्जतु
गुण्ठ्	(१०उ०,घूँघट०)अव +	गुण्ठयति	गुण्ठयाञ्चकार	गुण्ठयिता	गुण्ठयिष्यति	गुण्ठयतु
गुध्	(४ प०, लपेटना)	गुध्यति	जुगोध	गोधिता	गोधिष्यति	गुध्यतु
गुप्	(१ प०, रक्षा करना)	गोपायति	जुगोप	गोपिता	गोपिष्यति	गोपायतु
गुप्	(१आ०, निन्दा करना)	जुगुप्सते	जुगुप्साञ्चक्रे	जुगुप्सिता	जुगुप्सिष्यते	जुगुप्सताम्
गुम्फ्	(६ प०, गूँथना)	गुम्फति	जुगुम्फ	गुम्फिता	गुम्फिष्यति	गुम्फतु
गुह्	(१ उ०, छिपाना)	गूहति-ते	जुगूह	गूहिता	गूहिष्यति	गूहतु
गॄ	(१ प०, सींचना)	गरति	जगार	गारता	गरिष्यति	गरतु
गॄ	(६ प०, निगलना)	गिरति	जगार	गरिता	गरिष्यति	गिरतु
गॄ	(६ प०, कहना)	गृणाति	जगार	गरिता	गरिष्यति	गृणातु
गै	(१ प०, गाना)	गायति	जगौ	गाता	गास्यति	गायतु
गोम्	(१० प०, लीपना)	गोमयति	गोमयाञ्चकार	गोमयिता	गोमयिष्यति	गोमयतु
ग्रन्थ्	(६ प०, संग्रह०)	ग्रथ्नाति	जग्रन्थ	ग्रन्थिता	ग्रन्थिष्यति	ग्रथ्नातु
ग्रस्	(१ आ०, खाना)	ग्रसते	जग्रसे	ग्रसिता	ग्रसिष्यते	ग्रसताम्
ग्रह्	(६ उ०, लेना) प०-	गृह्णाति	जग्राह	ग्रहीता	ग्रहीष्यति	गृह्णातु
	आ०	गृह्णीते	जगृहे	ग्रहीता	ग्रहीष्यते	गृह्णीताम्
ग्लै	(१ प०, दुःखी होना)	ग्लायति	जग्लौ	ग्लाता	ग्लास्यति	ग्लायतु
घट्	(१ आ०, यत्न०)	घटते	जघटे	घटिता	घटिष्यते	घटताम्
घुष्	(१०उ०, घोषणा०)	घोषयति	घोषयाञ्चकार	घोषयिता	घोषयिष्यति	घोषयतु
घूर्ण्	(१ आ०, घूमना)	घूर्णते	जुघूर्णे	घूर्णिता	घूर्णिष्यते	घूर्णताम्
घूर्ण्	(६ प०, घूमना)	घूर्णति	जुघूर्ण	घूर्णिता	घूर्णिष्यति	घूर्णतु
घ्रा	(१ प०, सूँघना)	जिघ्रति	जघ्रौ	घ्राता	घ्रास्यति	जिघ्रतु
चकास्	(२प०, चमकना)	चकास्ति	चकासाञ्चकार	चकासिता	चकासिष्यति	चकास्तु

लङ्	विधिलिङ्	आशीर्लिङ्	लुङ्	लृङ्	णिच्	कर्मवाच्य
अखिन्त	खिदीत	खित्सीष्ट	अखित्त	अखेत्स्यत	खेदयति	खिद्यते
अखेलत्	खेलेत्	खेल्यात्	अखेलीत्	अखेलिष्यत्	खेलयति	खेल्यते
अगणयत्	गणयेत्	गण्यात्	अजीगणत्	अगणयिष्यत्	गणयति	गण्यते
अगदत्	गदेत्	गद्यात्	अगादीत्	अगदिष्यत्	गादयति	गद्यते
अगच्छत्	गच्छेत्	गम्यात्	अगमत्	अगमिष्यत्	गमयति	गम्यते
अगर्जत्	गर्जेत्	गर्ज्यात्	अगर्जीत्	अगर्जिष्यत्	गर्जयति	गर्ज्यते
अगर्वत्	गर्वेत्	गर्व्यात्	अगर्वीत्	अगर्विष्यत्	गर्वयति	गर्व्यते
अगर्हत	गर्हेत	गर्हिषीष्ट	अगर्हिष्ट	अगर्हिष्यत	गर्हयति	गर्ह्यते
अगर्हयत्	गर्हयेत्	गर्ह्यात्	अजगर्हत्	अगर्हयिष्यत्	गर्हयति	गर्ह्यते
अगवेषयत्	गवेषयेत्	गवेष्यात्	अजगवेषत्	अगवेषयिष्यत्	गवेषयति	गवेष्यते
अगाहत	गाहेत	गाहिषीष्ट	अगाहिष्ट	अगाहिष्यत	गाहयति	गाह्यते
अगुञ्जत्	गुञ्जेत्	गुञ्ज्यात्	अगुञ्जीत्	अगुञ्जिष्यत्	गुञ्जयति	गुञ्ज्यते
अगुण्ठयत्	गुण्ठयेत्	गुण्ठ्यात्	अजुगुण्ठत्	अगुण्ठयिष्यत्	गुण्ठयति	गुण्ठ्यते
अगुध्यत्	गुध्येत्	गुध्यात्	अगोधीत्	अगोधिष्यत्	गोधयति	गुध्यते
अगोपायत्	गोपायेत्	गुप्यात्	अगौप्सीत्	अगोपिष्यत्	गोपयति	गुप्यते
अजुगुप्सत	जुगुप्सेत	जुगुप्सिषीष्ट	अजुगुप्सिष्ट	अजुगुप्सिष्यत	जुगुप्सयति	जुगुप्स्यते
अगुम्फत्	गुम्फेत्	गुफ्यात्	अगुम्फीत्	अगुम्फिष्यत्	गुम्फयति	गुम्फ्यते
अगूहत्	गूहेत्	गुह्यात्	अगूहीत्	अगूहिष्यत्	गूहयति	गुह्यते
अगरत्	गरेत्	ग्रियात्	अगारीत्	अगरिष्यत्	गारयति	गीर्यते
अगिरत्	गिरेत्	गीर्यात्	अगारीत्	अगरिष्यत्	गारयति	गीर्यते
अगृणात्	गृणीयात्	गीर्यात्	अगारीत्	अगरिष्यत्	गारयति	गीर्यते
अगायत्	गायेत्	गेयात्	अगासीत्	अगास्यत्	गापयति	गीयते
अगोमयत्	गोमयेत्	गोम्यात्	अजुगोमत्	अगोमयिष्यत्	गोमयति	गोम्यते
अग्रथ्नात्	ग्रथ्नीयात्	ग्रथ्यात्	अग्रन्थीत्	अग्रन्थिष्यत्	ग्रन्थयति	ग्रथ्यते
अग्रसत	ग्रसेत	ग्रसिषीष्ट	अग्रसिष्ट	अग्रसिष्यत	ग्रासयति	ग्रस्यते
अगृह्णात्	गृह्णीयात्	गृह्यात्	अग्रहीत्	अग्रहीष्यत्	ग्राहयति	गृह्यते
अगृह्णीत	गृह्णीत	ग्रहीषीष्ट	अग्रहीष्ट	अग्रहीष्यत	ग्राहयति	गृह्यते
अग्लायत्	ग्लायेत्	ग्लायात्	अग्लासीत्	अग्लास्यत्	ग्लापयति	ग्लायते
अघटत	घटेत	घटिषीष्ट	अघटिष्ट	अघटिष्यत	घटयति	घट्यते
अघोषयत्	घोषयेत्	घोष्यात्	अजूघुषत्	अघोषयिष्यत्	घोषयति	घोष्यते
अघूर्णत	घूर्णेत	घूर्णिषीष्ट	अघूर्णिष्ट	अघूर्णिष्यत	घूर्णयति	घूर्ण्यते
अघूर्णत्	घूर्णेत्	घूर्ण्यात्	अघूर्णीत्	अघूर्णिष्यत्	घूर्णयति	घूर्ण्यते
अजिघ्रत्	जिघ्रेत्	घ्रेयात्	अघ्रात्	अघ्रास्यत्	घ्रापयति	घ्रायते
अचकात्	चकास्यात्	चकास्यात्	अचकासीत्	अचकासिष्यत्	चकासयति	चकास्यते

धातु	अर्थ	लट्	लिट्	लुट्	लृट्	लोट्
चक्ष्	(२ आ०, कहना) आ +	आचष्टे	आचचक्षे	आख्याता	आख्यास्यति	आचष्टाम्
चम्	(१ प०, आ +, पीना)	आचामति	आचचाम	आचमिता	आचमिष्यति	आचामतु
चर्	(१ प०, चलना)	चरति	चचार	चरिता	चरिष्यति	चरतु
चर्व्	(१ प०, चबाना)	चर्वति	चचर्व	चर्विता	चर्विष्यति	चर्वतु
चल्	(१ प०, हिलना)	चलति	चचाल	चलिता	चलिष्यति	चलतु
चि	(५ उ०, चुनना) प०–	चिनोति	चिचाय	चेता	चेष्यति	चिनोतु
	आ०–	चिनुते	चिच्ये	चेता	चेष्यते	चिनुताम्
चित्	(१ प०, समझना)	चेतति	चिचेत	चेतिता	चेतिष्यति	चेततु
चित्	(१० आ०, सोचना)	चेतयते	चेतयाचक्रे	चेतयिता	चेतयिष्यते	चेतयताम्
चित्र्	(१० उ०, चित्र बनाना)	चित्रयति	चित्रयाञ्चकार	चित्रयिता	चित्रयिष्यति	चित्रयतु
चिन्त्	(१० उ०, सोचना) प०-	चिन्तयति	चिंतयाञ्चकार	चिंतयिता	चिंतयिष्यति	चिंतयतु
	आ०—	—ते	—चक्रे	चिन्तयिता	—ते	—ताम्
चिह्न्	(१० उ०, चिह्न लगाना)	चिह्नयति	चिह्नयाञ्चकार	चिह्नयिता	चिह्नयिष्यति	चिह्नयतु
चुद्	(१० उ०, प्रेरणा देना)	चोदयति	चोदयाञ्चकार	चोदयिता	चोदयिष्यति	चोदयतु
चुम्ब्	(१ प०, चूमना)	चुम्बति	चुचुम्ब	चुम्बिता	चुम्बिष्यति	चुम्बतु
चुर्	(१० उ०, चुराना)	चोरयति	चोरयाञ्चकार	चोरयिता	चोरयिष्यति	चोरयतु
	आ०—	—ते	—चक्रे	चोरयिता	—ते	—ताम्
चूर्ण्	(१० उ० चूर करना)	चूर्णयति	चूर्णयाञ्चकार	चूर्णयिता	चूर्णयिष्यति	चूर्णयतु
चूष्	(१ प०, चूसना)	चूषति	चुचूष	चूषिता	चूषिष्यति	चूषतु
चेष्ट्	(१ आ०, चेष्टा करना)	चेष्टते	चिचेष्टे	चेष्टिता	चेष्टिष्यते	चेष्टताम्
छद्	(१० उ०, ढकना) आ +	छादयति	छादयाञ्चकार	छादयिता	छादयिष्यति	छादयतु
छिद्	(७ उ०, काटना)	छिनत्ति	चिच्छेद	छेत्ता	छेत्स्यति	छिनत्तु
छुर्	(६ प०, काटना)	छुरति	चुच्छोर	छुरिता	छुरिष्यति	छुरतु
छो	(४ प०, काटना)	छ्यति	चच्छौ	छाता	छास्यति	छ्यतु
जन्	(४ आ० पैदा होना)	जायते	जज्ञे	जनिता	जनिष्यते	जायताम्
जप्	(१ प०, जपना)	जपति	जजाप	जपिता	जपिष्यति	जपतु
जल्प्	(१ प०, बात करना)	जल्पति	जजल्प	जल्पिता	जल्पिष्यति	जल्पतु
जागृ	(२ प०, जागना)	जागर्ति	जजागार	जागरिता	जागरिष्यति	जागर्तु
जि	(१ प०, जीतना)	जयति	जिगाय	जेता	जेष्यति	जयतु
जीव्	(१ प०, जीना)	जीवति	जिजीव	जीविता	जीविष्यति	जीवतु
जुत्	(१ आ०, चमकना)	जोतते	जुजुते	जोतिता	जोतिष्यते	जोतताम्
जुष्	(१० उ०, प्रसन्न होना)	जोषयति	जोषयाञ्चकार	जोषयिता	जोषयिष्यति	जोषयतु
जृम्भ्	(१ आ०, जँभाई लेना)	जृम्भते	जजृम्भे	जृम्भिता	जृम्भिष्यते	जृम्भताम्
जॄ	(४ प०, वृद्ध होना)	जीर्यति	जजार	जरिता	जरिष्यति	जीर्यतु

लङ्	विधिलिङ्	आशीर्लिङ्	लुङ्	लृङ्	णिच्	कर्मवाच्य
आचष्ट	आचक्षीत	आख्यायात्	आख्यत्	आख्यास्यत्	ख्यापयति	ख्यायते
आचामत्	आचामेत्	आचम्यात्	आचमीत्	आचमिष्यत्	आचामयति	आचम्यते
अचरत्	चरेत्	चर्यात्	अचारीत्	अचरिष्यत्	चारयति	चर्यते
अचर्वत्	चर्वेत्	चर्व्यात्	अचर्वीत्	अचर्विष्यत्	चर्वयति	चर्व्यते
अचलत्	चलेत्	चल्यात्	अचालीत्	अचलिष्यत्	चलयति	चल्यते
अचिनोत्	चिनुयात्	चीयात्	अचैषीत्	अचेष्यत्	चाययति	चीयते
अचिनुत	चिन्वीत	चेषीष्ट	अचेष्ट	अचेष्यत	चाययति	चीयते
अचेतत्	चेतेत्	चित्यात्	अचेतीत्	अचेतिष्यत्	चेतयति	चित्यते
अचेतयत	चेतयेत	चेतयिषीष्ट	अचीचितत	अचेतयिष्यत	चेतयति	चेत्यते
अचिन्नयत्	चिन्नयेत्	चिन्न्यात्	अचिचिन्नत्	अचिन्नयिष्यत्	चिन्नयति	चिन्न्यते
अचिन्तयत्	चिन्तयेत्	चिन्त्यात्	अचिचिन्तत्	अचिन्तयिष्यत्	चिन्तयति	चिन्त्यते
—यत	—येत	चिन्तयिषीष्ट	—न्तत	—ष्यत	चिन्तयति	चिन्त्यते
अचिह्नयत्	चिह्नयेत्	चिह्न्यात्	अचिचिह्नत्	अचिह्नयिष्यत्	चिह्नयति	चिह्न्यते
अचोदयत्	चोदयेत्	चोद्यात्	अचूचुदत्	अचोदयिष्यत्	चोदयति	चोद्यते
अचुम्बत्	चुम्बेत्	चुम्ब्यात्	अचुम्बीत्	अचुम्बिष्यत्	चुम्बयति	चुम्ब्यते
अचोरयत्	चोरयेत्	चोर्यात्	अचूचुरत्	अचोरयिष्यत्	चोरयति	चोर्यते
—त	—त	चोरयिषीष्ट	—रत	अचोरयिष्यत	चोरयति	चोर्यते
अचूर्णयत्	चूर्णयेत्	चूर्ण्यात्	अचुचूर्णत्	अचूर्णयिष्यत	चूर्णयति	चूर्ण्यते
अचूषत्	चूषेत्	चूष्यात्	अचूषीत्	अचूषिष्यत्	चूषयति	चूष्यते
अचेष्टत	चेष्टेत	चेष्टिषीष्ट	अचेष्टिष्ट	अचेष्टिष्यत	चेष्टयति	चेष्ट्यते
अच्छादयत्	छादयेत्	छाद्यात्	अचिच्छदत्	अच्छादयिष्यत्	छादयति	छाद्यते
अच्छिनत्	छिन्द्यात्	छिद्यात्	अच्छैत्सीत्	अच्छेत्स्यत्	छेदयति	छिद्यते
अच्छुरत्	छुरेत्	छुर्यात्	अच्छुरीत्	अच्छुरिष्यत्	छोरयति	छुर्यते
अच्छ्यत्	छ्येत्	छायात्	अच्छात्	अच्छास्यत	छाययति	छायते
अजायत	जायेत	जनिषीष्ट	अजनिष्ट	अजनिष्यत	जनयति	जन्यते
अजपत्	जपेत्	जप्यात्	अजपीत्	अजपिष्यत्	जापयति	जप्यते
अजल्पत्	जल्पेत्	जल्प्यात्	अजल्पीत्	अजल्पिष्यत्	जल्पयति	जल्प्यते
अजागः	जागृयात्	जागर्यात्	अजागरीत्	अजागरिष्यत्	जागरयति	जागर्यते
अजयत्	जयेत्	जीयात्	अजैषीत्	अजेष्यत्	जापयति	जीयते
अजीवत्	जीवेत्	जीव्यात्	अजीवीत्	अजीविष्यत्	जीवयति	जीव्यते
अजोतत	जोतेत	जोतिषीष्ट	अजोतिष्ट	अजोतिष्यत	जोतयते	जोत्यते
अजोषयत्	जोषयेत्	जोष्यात्	अजूजुषत्	अजोषयिष्यत्	जोषयति	जोष्यते
अजृम्भत	जृम्भेत	जृम्भिषीष्ट	अजृम्भिष्ट	अजृम्भिष्यत	जृम्भयति	जृम्भ्यते
अजीर्यत्	जीर्येत	जीर्यात्	अजारीत्	अजरिष्यत्	जरयति	जीर्यते

धातु	अर्थ	लट्	लिट्	लुट्	लृट्	लोट्
ज्ञा	(९ उ०, जानना)	प०—जानाति	जज्ञौ	ज्ञाता	ज्ञास्यति	जानातु
		आ०— जानीते	जज्ञे	ज्ञाता	ज्ञास्यते	जानीताम्
ज्ञा	(१० उ०, आज्ञा देना)	आ + ज्ञापयति	ज्ञापयाचकार	ज्ञापयिता	ज्ञापयिष्यति	ज्ञापयतु
ज्वर्	(१ प०, रुग्ण होना)	ज्वरति	जज्वार	ज्वरिता	ज्वरिष्यति	ज्वरतु
ज्वल्	(१ प०, जलना)	ज्वलति	जज्वाल	ज्वलिता	ज्वलिष्यति	ज्वलतु
टंक्	(१० उ०, चिह्न लगाना)	टंकयति	टंकयाचकार	टंकयिता	टंकयिष्यति	टंकयतु
डी	(१ आ०, उड़ना)	उत् + डयते	डिड्ये	डयिता	डयिष्यते	डयताम्
डी	(४ आ०, उड़ना)	उत् + डीयते	उड्डिड्ये	उड्डयिता	उड्डयिष्यते	डीयताम्
ढौक्	(१ आ०, जाना)	ढौकते	डुढौके	ढौकिता	ढौकिष्यते	ढौकताम्
तक्ष्	(१ प०, छीलना)	तक्षति	ततक्ष	तक्षिता	तक्षिष्यति	तक्षतु
तड्	(१० उ०, पीटना)	ताडयति	ताडयांचकार	ताडयिता	ताडयिष्यति	ताडयतु
तन्	(८ उ०, फैलाना)	प०—तनोति	ततान	तनिता	तनिष्यति	तनोतु
		आ०—तनुते	तेने	तनिता	तनिष्यते	तनुताम्
तन्त्र्	(१० आ०, पालन०)	तन्त्रयते	तन्त्रयाचक्रे	तन्त्रयिता	तन्त्रयिष्यते	तन्त्रताम्
तप्	(१ प०, तपना)	तपति	तताप	तप्ता	तप्स्यति	तपतु
तर्क्	(१० उ०, सोचना)	तर्कयति	तर्कयांचकार	तर्कयिता	तर्कयिष्यति	तर्कयतु
तर्ज्	(१ प०, भर्त्सनाक०)	तर्जति	ततर्ज	तर्जिता	तर्जिष्यति	तर्जतु
तर्ज्	(१० आ०, डाँटना)	तर्जयते	तर्जयाचक्रे	तर्जयिता	तर्जयिष्यते	तर्जयताम्
तर्द्	(१ प०, सताना)	तर्दति	ततर्द	तर्दिता	तर्दिष्यति	तर्दतु
तंस्	(१० उ०, सजाना)	अव + तंसयति	तंसयाचकार	तंसयिता	तंसयिष्यति	तंसयतु
*तिजि	(१ आ०, क्षमाक०)	तितिक्षते	तितिक्षाचक्रे	तितिक्षिता	तितिक्षिष्यते	तितिक्षताम्
तुद्	(६ उ०, दुःख देना)	तुदति–ते	तुतोद	तोत्ता	तोत्स्यति	तुदतु
तुल्	(१० उ०, तोलना)	तोलयति	तोलयाचकार	तोलयिता	तोलयिष्यति	तोलयतु
तुष्	(४ प०, तुष्ट होना)	तुष्यति	तुतोष	तोष्टा	तोक्ष्यति	तुष्यतु
तृप्	(४ प०, तृप्त होना)	तृप्यति	ततर्प	तर्पिता	तर्पिष्यति	तृप्यतु
तृष्	(४ प०, प्यासा होना)	तृष्यति	ततर्ष	तर्षिता	तर्षिष्यति	तृष्यतु
तॄ	(१ प० तैरना)	तरति	ततार	तरिता	तरिष्यति	तरतु
त्यज्	(१ प०, छोड़ना)	त्यजति	तत्याज	त्यक्ता	त्यक्ष्यति	त्यजतु
त्रप्	(१ आ०, लजाना)	त्रपते	त्रेपे	त्रपिता	त्रपिष्यते	त्रपताम्
त्रस्	(४ प०, डरना)	त्रस्यति	तत्रास	त्रसिता	त्रसिष्यति	त्रस्यतु
त्रुट्	(६ प०, टूटना)	त्रुटति	तुत्रोट	त्रुटिता	त्रुटिष्यति	त्रुटतु
त्रुट्	(१० आ०, तोड़ना)	त्रोटयते	त्रोटयांचक्रे	त्रोटयिता	त्रोटयिष्यते	त्रोटयताम्

*तिजेः क्षमायां सन्।

लङ्	विधिलिङ्	आशीर्लिङ्	लुङ्	लृङ्	णिच्	कर्मवाच्य
अजानात्	जानीयात्	ज्ञेयात्	अज्ञासीत्	अज्ञास्यत्	ज्ञापयति	ज्ञायते
अजानीत	जानीत	ज्ञासीष्ट	अज्ञास्त	अज्ञास्यत	ज्ञापयति	ज्ञाप्यते
अज्ञापयत्	ज्ञापयेत्	ज्ञाप्यात्	अजिज्ञपत्	अज्ञापयिष्यत्	ज्ञापयति	ज्ञाप्यते
अज्वरत्	ज्वरेत्	ज्वर्यात्	अज्वारीत्	अज्वरिष्यत्	ज्वरयति	ज्वर्यते
अज्वलत्	ज्वलेत्	ज्वल्यात्	अज्वालीत्	अज्वलिष्यत्	ज्वालयति	ज्वल्यते
अटकयत्	टकयेत्	टक्यात्	अटटकत्	अटकयिष्यत्	टकयति	टक्यते
अडयत	डयेत	डयिषीष्ट	अडयिष्ट	अडयिष्यत	डाययति	डीयते
अडीयत	डीयेत	डयिषीष्ट	अडयिष्ट	अडयिष्यत	डाययति	डीयते
अढौकत	ढौकेत	ढौकिषीष्ट	अढौकिष्ट	अढौकिष्यत	ढौकयति	ढौक्यते
अतक्षत्	तक्षेत्	तक्ष्यात्	अतक्षीत्	अतक्षिष्यत्	तक्षयति	तक्ष्यते
अताडयत्	ताडयेत्	ताड्यात्	अतीतडत्	अताडयिष्यत्	ताडयति	ताड्यते
अतनोत्	तनुयात्	तन्यात्	अतानीत्	अतनिष्यत्	तानयति	तन्यते
अतनुत	तन्वीत	तनिषीष्ट	अतनिष्ट	अतनिष्यत	तानयति	तन्यते
अतन्त्रयत	तन्त्रयेत	तन्त्रयिषीष्ट	अततन्त्रत	अतन्त्रयिष्यत	तन्त्रयति	तन्त्र्यते
अतपत्	तपेत्	तप्यात्	अताप्सीत्	अतप्स्यत्	तापयति	तप्यते
अतर्कयत्	तर्कयेत्	तर्क्यात्	अततर्कत्	अतर्कयिष्यत्	तर्कयति	तर्क्यते
अतर्जत्	तर्जेत्	तर्ज्यात्	अतर्जीत्	अतर्जिष्यत्	तर्जयति	तर्ज्यते
अतर्जयत	तर्जयेत	तर्जयिषीष्ट	अततर्जत	अतर्जयिष्यत	तर्जयति	तर्ज्यते
अतर्दत्	तर्देत्	तर्द्यात्	अतर्दीत्	अतर्दिष्यत्	तर्दयति	तर्द्यते
अतसयत्	तसयेत्	तस्यात्	अततसत्	अतसयिष्यत्	तसयति	तस्यते
अतितिक्षत	तितिक्षेत	तितिक्षिषीष्ट	अतितिक्षिष्ट	अतितिक्षिष्यत	तेजयति	तितिक्ष्यते
अतुदत्	तुदेत्	तुद्यात्	अतौत्सीत्	अतोत्स्यत्	तोदयति	तुद्यते
अतोलयत्	तोलयेत्	तोल्यात्	अतूतुलत्	अतोलयिष्यत्	तोलयति	तोल्यते
अतुष्यत्	तुष्येत्	तुष्यात्	अतुषत्	अतोक्ष्यत्	तोषयति	तुष्यते
अतृप्यत्	तृप्येत्	तृप्यात्	अतृपत्	अतर्पिष्यत्	तर्पयति	तृप्यते
अतृष्यत्	तृष्येत्	तृष्यात्	अतृषत्	अतर्षिष्यत्	तर्षयति	तृष्यते
अतरत्	तरेत्	तीर्यात्	अतारीत्	अतरिष्यत्	तारयति	तीर्यते
अत्यजत्	त्यजेत्	त्यज्यात्	अत्याक्षीत्	अत्यक्ष्यत्	त्याजयति	त्यज्यते
अत्रपत	त्रपेत	त्रपिषीष्ट	अत्रपिष्ट	अत्रपिष्यत	त्रपयति	त्रप्यते
अत्रस्यत्	त्रस्येत्	त्रस्यात्	अत्रसीत्	अत्रसिष्यत्	त्रासयति	त्रस्यते
अत्रुटत्	त्रुटेत्	त्रुट्यात्	अत्रुटीत्	अत्रुटिष्यत्	त्रोटयति	त्रुट्यते
अत्रोटयत	त्रोटयेत	त्रोटयिषीष्ट	अतुत्रुटत	अत्रोटयिष्यत	त्रोटयति	त्रोट्यते

धातु	अर्थ	लट्	लिट्	लुट्	लृट्	लोट्
त्रै	(१ आ०, बचाना)	त्रायते	तत्रे	त्राता	त्रास्यते	त्रायताम्
त्वच्	(१ प०, छीलना)	त्वचति	तत्वच	त्वचिता	त्वचिष्यति	त्वचतु
त्वर्	(१आ०,जल्दीकरना)	त्वरते	तत्वरे	त्वरिता	त्वरिष्यते	त्वरताम्
त्विष्	(१ उ०, चमकना)	त्वेषति-ते	तित्वेष	त्वेष्टा	त्वेक्ष्यति	त्वेषतु
दण्ड	(१०उ०,दण्डदेना)	दण्डयति-ते	दण्डयाचकार	दण्डयिता	दण्डयिष्यति	दण्डयतु
दम्	(४प०, दमन करना)	दाम्यति	ददाम	दमिता	दमिष्यति	दाम्यतु
दम्भ्	(५प०,धोखा देना)	दम्नोति	ददम्भ	दम्भिता	दम्भिष्यति	दम्नोतु
दय्	(१आ०,दयाकरना)	दयते	दयाचक्रे	दयिता	दयिष्यते	दयताम्
दरिद्रा	(२प०,दरिद्रहोना)	दरिद्राति	ददरिद्रौ	दरिद्रिता	दरिद्रिष्यति	दरिद्रातु
दंश्	(१ प०, डँसना)	दशति	ददंश	दंष्टा	दंक्ष्यति	दशतु
दह्	(१ प०, जलाना)	दहति	ददाह	दग्धा	धक्ष्यति	दहतु
दा	(१ प०, देना)	यच्छति	ददौ	दाता	दास्यति	यच्छतु
दा	(२ प०, काटना)	दाति	ददौ	दाता	दास्यति	दातु
दा	(३ उ०, देना)	प०–ददाति	ददौ	दाता	दास्यति	ददातु
		आ०–दत्ते	ददे	दाता	दास्यते	दत्ताम्
दिव्	(४प०,चमकनाआदि)	दीव्यति	दिदेव	देविता	देविष्यति	दीव्यतु
दिव्	(१० आ, रुलाना)	देवयते	देवयांचक्रे	देवयिता	देवयिष्यते	देवयताम्
दिश्	(६उ०,देना,कहना)	दिशति-ते	दिदेश	देष्टा	देक्ष्यति	दिशतु
दीक्ष्	(१आ०,दीक्षादेना)	दीक्षते	दिदीक्षे	दीक्षिता	दीक्षिष्यते	दीक्षताम्
दीप्	(४आ०,चमकना)	दीप्यते	दिदीपे	दीपिता	दीपिष्यते	दीप्यताम्
दु	(५प०,दुःखित होना)	दुनोति	दुदाव	दोता	दोष्यति	दुनोतु
दुष्	(४ प०, बिगड़ना)	दुष्यति	दुदोष	दोष्टा	दोक्ष्यति	दुष्यतु
दुह्	(२उ०, दुहना)	प०–दोग्धि	दुदोह	दोग्धा	धोक्ष्यति	दोग्धु
		आ०–दुग्धे	दुदुहे	दोग्धा	धोक्ष्यते	दुग्धाम्
दू	(४आ०,दुःखितहोना)	दूयते	दुदुवे	दविता	दविष्यते	दूयताम्
दृ	(६आ०,आदरकरना) आ+	आद्रियते	आदद्रे	आदर्ता	आदरिष्यते	आद्रियताम्
दृप्	(४प०, गर्व करना)	दृप्यति	ददर्प	दर्पिता	दर्पिष्यति	दृप्यतु
दृश्	(१ प०, देखना)	पश्यति	ददर्श	द्रष्टा	द्रक्ष्यति	पश्यतु
दॄ	(६प०, फाड़ना)	दृणाति	ददार	दारिता	दारिष्यति	दृणातु
दा	(४प०, काटना)	द्यति	ददौ	दाता	दास्यति	द्यतु
द्युत्	(१आ०, चमकना)	द्योतते	दिद्युते	द्योतिता	द्योतिष्यते	द्योतताम्

लङ्	विधिलिङ्	आशीर्लिङ्	लुङ्	लृङ्	णिच्	कर्मवाच्य
अत्रायत	त्रायेत	त्रासीष्ट	अत्रास्त	अत्रास्यत	त्रापयति	त्रायते
अत्वक्षत्	त्वक्षेत्	त्वक्ष्यात्	अत्वक्षीत्	अत्वक्षिष्यत्	त्वक्षयति	त्वक्ष्यते
अत्वरत	त्वरेत	त्वरिषीष्ट	अत्वरिष्ट	अत्वरिष्यत	त्वरयति	त्वर्यते
अत्विषत्	त्विषेत्	त्विष्यात्	अत्विक्षत्	अत्वेक्ष्यत्	त्वेषयति	त्विष्यते
अदण्डयत्	दण्डयेत्	दण्ड्यात्	अददण्डत्	अदण्डयिष्यत्	दण्डयति	दण्ड्यते
अदाम्यत्	दाम्येत्	दम्यात्	अदमत्	अदमिष्यत्	दमयते	दम्यते
अदम्नोत्	दम्नुयात्	दम्यात्	अदम्भीत्	अदम्भिष्यत्	दम्भयति	दम्यते
अदयत	दयेत	दयिषीष्ट	अदयिष्ट	अदयिष्यत	दाययति	दय्यते
अदरिद्रात्	दरिद्रियात्	दरिद्र्यात्	अदरिद्रीत्	अदरिद्रिष्यत्	दरिद्रयति	दरिद्र्यते
अदशत्	दशेत्	दश्यात्	अदाङ्क्षीत्	अदङ्क्ष्यत्	दशयति	दश्यते
अदहत्	दहेत्	दह्यात्	अधाक्षीत्	अधक्ष्यत्	दाहयति	दह्यते
अयच्छत्	यच्छेत्	देयात्	अदात्	अदास्यत्	दापयति	दीयते
अदात्	दायात्	दायात्	अदासीत्	अदास्यत्	दापयति	दायते
अददात्	दद्यात्	देयात्	अदात्	अदास्यत्	दापयति	दीयते
अदत्त	ददीत	दासीष्ट	अदित	अदास्यत	दापयति	दीयते
अदीव्यत्	दीव्येत्	दीव्यात्	अदेवीत्	अदेविष्यत्	देवयति	दीव्यते
अदेवयत	देवयेत	देवयिषीष्ट	अदीदिवत	अदेवयिष्यत	देवयति	देव्यते
अदिशत्	दिशेत्	दिश्यात्	अदिक्षत्	अदेक्ष्यत्	देशयति	दिश्यते
अदीक्षत	दीक्षेत	दीक्षिषीष्ट	अदीक्षिष्ट	अदीक्षिष्यत	दीक्षयति	दीक्ष्यते
अदीप्यत	दीप्येत	दीपिषीष्ट	अदीपिष्ट	अदीपिष्यत	दीपयति	दीप्यते
अदुनोत्	दुनुयात्	दूयात्	अदौषीत्	अदोष्यत्	दावयति	दूयते
अदुष्यत्	दुष्येत्	दुष्यात्	अदुषत्	अदोक्ष्यत्	दूषयति	दुष्यते
अधोक्	दुह्यात्	दुह्यात्	अधुक्षत्	अधोक्ष्यत्	दोहयति	दुह्यते
अदुग्ध	दुहीत	धुक्षीष्ट	अधुक्षत	अधोक्ष्यत	दोहयति	दुह्यते
अदूयत	दूयेत	दविषीष्ट	अदविष्ट	अदविष्यत	दावयति	दूयते
आद्रियत	आद्रियेत	आदृषीष्ट,	आदृत	आदरिष्यत	आदारयति	आद्रियते
अदृप्यत्	दृप्येत्	दृप्यात्	अदृपत्	अदर्पिष्यत्	दर्पयति	दृप्यते
अपश्यत्	पश्येत्	दृश्यात्	अद्राक्षीत्	अद्रक्ष्यत्	दर्शयति	दृश्यते
अदृणात्	दृणीयात्	दीर्यात्	अदारीत्	अदरिष्यत्	दारयति	दीर्यते
अधयत्	धयेत्	देयात्	अदात्	अदास्यत्	दापयति	दीयते
अद्योतत	द्योतेत	द्योतिषीष्ट	अद्योतिष्ट	अद्योतिष्यत	द्योतयति	द्युत्यते

धातु अर्थ	लट्	लिट्	लुट्	लृट्	लोट्
द्रा (२ प०, सोना) नि +	निद्राति	निदद्रौ	निद्राता	निद्रास्यति	निद्रातु
द्रु (१ प०, पिघलना)	द्रवति	दुद्राव	द्रोता	द्रोष्यति	द्रवतु
द्रुह् (४ प०, द्रोहकरना)	द्रुह्यति	दुद्रोह	द्रोहिता	द्रोहिष्यति	द्रुह्यतु
द्विष् (२उ०, द्वेषकरना)	द्वेष्टि	दिद्वेष	द्वेष्टा	द्वेक्ष्यति	द्वेष्टु
धा (३उ०, धारणकरना) प०–	दधाति	दधौ	धाता	धास्यति	दधातु
आ०–	धत्ते	दधे	धाता	धास्यते	धत्ताम्
धाव् (१उ०, दौड़ना, धोना)	धावति-ते	दधाव	धाविता	धाविष्यति	धावतु
धु (५ उ०, हिलाना)	धुनोति	दुधाव	धोता	धोष्यति	धुनोतु
धुक्ष् (१आ०, जलना)	धुक्षते	दुधुक्षे	धुक्षिता	धुक्षिष्यते	धुक्षताम्
धू (५ उ०, हिलाना)	धूनोति	दुधाव	धोता	धोष्यति	धूनोतु
धूप् (१प०, सुखाना)	धूपायति	धूपायाञ्चकार	धूपायिता	धूपायिष्यति	धूपायतु
धृ (१ उ०, रखना)	धरति-ते	दधार	धर्ता	धरिष्यति	धरतु
धृ (१० उ०, रखना)	धारयति-ते	धारयाञ्चकार	धारयिता	धारयिष्यति	धारयतु
धृष् (१०उ०, दबाना)	धर्षयति-ते	धर्षयाञ्चकार	धर्षयिता	धर्षयिष्यति	धर्षयतु
धेट् (१प०, पालना, चूसना)	धयति	दधौ	धाता	धास्यति	धयतु
ध्मा (१ प०, फूँकना)	धमति	दध्मौ	ध्माता	ध्मास्यति	धमतु
ध्यै (१ प०, सोचना)	ध्यायति	दध्यौ	ध्याता	ध्यास्यति	ध्यायतु
ध्वन् (१प०, शब्दकरना)	ध्वनति	दध्वान	ध्वनिता	ध्वनिष्यति	ध्वनतु
ध्वंस् (१आ०, नष्टहोना)	ध्वंसते	दध्वंसे	ध्वंसिता	ध्वंसिष्यते	ध्वंसताम्
नद् (१ प०, नादकरना)	नदति	ननाद	नदिता	नदिष्यति	नदतु
नन्द् (१ प०, प्रसन्नहोना)	नन्दति	ननन्द	नन्दिता	नन्दिष्यति	नन्दतु
नम् (१ प०, झुकना) प्र +	नमति	ननाम	नन्ता	नंस्यति	नमतु
नर्द् (१ प०, गर्जना)	नर्दति	ननर्द	नर्दिता	नर्दिष्यति	नर्दतु
नश् (४ प०, नष्टहोना)	नश्यति	ननाश	नशिता	नशिष्यति	नश्यतु
नह् (४ उ०, बाँधना)	नह्यति-ते	ननाह	नद्धा	नत्स्यति	नह्यतु
निज् (३ उ०, धोना)	नेनेक्ति	निनेज	नेक्ता	नेक्ष्यति	नेनेक्तु
निन्द् (१ प०, निन्दा०)	निन्दति	निनिन्द	निन्दिता	निन्दिष्यति	निन्दतु
नी (१उ०, लेजाना) प०–	नयति	निनाय	नेता	नेष्यति	नयतु
आ०–	नयते	निन्ये	नेता	नेष्यते	नयताम्
नु (२ प०, स्तुति०)	नौति	नुनाव	नविता	नविष्यति	नौतु
नुद् (६उ०, प्रेरणादेना)	नुदति-ते	नुनोद	नोत्ता	नोत्स्यति	नुदतु

लङ्	विधिलिङ्	आशीर्लिङ्	लुङ्	लृङ्	णिच्	कर्मवाच्य
न्यद्रात्	निद्रायात्	निद्रायात्	न्यद्रासीत्	न्यद्रास्यत्	निद्रापयति	निद्रायते
अद्रवत्	द्रवेत्	द्रूयात्	अदुद्रुवत्	अद्रोष्यत्	द्रावयति	द्रूयते
अद्रुह्यत्	द्रुह्येत्	द्रुह्यात्	अद्रुहत्	अद्रोहिष्यत्	द्रोहयति	द्रुह्यते
अद्वेट्	द्विष्यात्	द्विष्यात्	अद्विक्षत्	अद्वेक्ष्यत्	द्वेषयति	द्विष्यते
अदधात्	दध्यात्	धेयात्	अधात्	अधास्यत्	धापयति	धीयते
अधत्त	दधीत	धासीष्ट	अधित	अधास्यत	धापयति	धीयते
अधावत्	धावेत्	धाव्यात्	अधावीत्	अधाविष्यत्	धावयति	धाव्यते
अधुनोत्	धुनुयात्	धूयात्	अधौषीत्	अधोष्यत्	धावयति	धूयते
अधुक्षत	धुक्षेत	धुक्षिषीष्ट	अधुक्षिष्ट	अधुक्षिष्यत	धुक्षयति	धुक्ष्यते
अधूनोत्	धूनुयात्	धूयात्	अधावीत्	अधोष्यत्	धूनयति	धूयते
अधूपायत्	धूपायेत्	धूपाय्यात्	अधूपायीत्	अधूपायिष्यत्	धूपाययति	धूपाय्यते
अधरत्	धरेत्	ध्रियात्	अधार्षीत्	अधरिष्यत्	धारयति	ध्रियते
अधारयत्	धारयेत्	धार्यात्	अदीधरत्	अधारयिष्यत्	धारयति	धार्यते
अधर्षयत्	धर्षयेत्	धर्ष्यात्	अदधर्षत्	अधर्षयिष्यत्	धर्षयति	धर्ष्यते
अधयत्	धयेत्	धेयात्	अधात्	अधास्यत्	धापयते	धीयते
अधमत्	धमेत्	ध्मायात्	अध्मासीत्	अध्मास्यत्	ध्मापयति	ध्मायते
अध्यायत्	ध्यायेत्	ध्यायात्	अध्यासीत्	अध्यास्यत्	ध्यापयति	ध्यायते
अध्वनत्	ध्वनेत्	ध्वन्यात्	अध्वनीत्	अध्वनिष्यत्	ध्वनयति	ध्वन्यते
अध्वसत	ध्वसेत	ध्वसिषीष्ट	अध्वसिष्ट	अध्वसिष्यत	ध्वसयति	ध्वस्यते
अनदत्	नदेत्	नद्यात्	अनादीत्	अनदिष्यत्	नादयति	नद्यते
अनन्दत्	नन्देत्	नन्द्यात्	अनन्दीत्	अनन्दिष्यत्	नन्दयति	नन्द्यते
अनमत्	नमेत्	नम्यात्	अनंसीत्	अनंस्यत्	नमयति	नम्यते
अनर्दत्	नर्देत्	नर्द्यात्	अनर्दीत्	अनर्दिष्यत्	नर्दयति	नर्द्यते
अनश्यत्	नश्येत्	नश्यात्	अनाशीत्	अनशिष्यत्	नाशयति	नश्यते
अनह्यत्	नह्येत्	नह्यात्	अनात्सीत्	अनत्स्यत्	नाहयति	नह्यते
अनेनेक्	नेनिज्यात्	निज्यात्	अनिजत्	अनेक्ष्यत्	नेजयति	निज्यते
अनिन्दत्	निन्देत्	निन्द्यात्	अनिन्दीत्	अनिन्दिष्यत्	निन्दयति	निन्द्यते
अनयत्	नयेत्	नीयात्	अनैषीत्	अनेष्यत्	नाययति	नीयते
अनयत	नयेत	नेषीष्ट	अनेष्ट	अनेष्यत	नाययति	नीयते
अनौत्	नुयात्	नूयात्	अनावीत्	अनविष्यत्	नावयति	नूयते
अनुदत्	नुदेत्	नुद्यात्	अनौत्सीत्	अनोत्स्यत्	नोदयति	नुद्यते

धातु	अर्थ	लट्	लिट्	लुट्	लृट्	लोट्
नृत्	(४ प०, नाचना)	नृत्यति	ननर्त	नर्तिता	नर्तिष्यति	नृत्यतु
पच्	(१उ०,पकाना)प०—	पचति	पपाच	पक्ता	पक्ष्यति	पचतु
	आ०—	पचते	पेचे	पक्ता	पक्ष्यते	पचताम्
पठ्	(१ प०, पढ़ना),	पठति	पपाठ	पठिता	पठिष्यति	पठतु
पण्	(१आ०,खरीदना)	पणते	पेणे	पणिता	पणिष्यते	पणताम्
पत्	(१ प०, गिरना)	पतति	पपात	पतिता	पतिष्यति	पततु
पद्	(४ आ०, जाना)	पद्यते	पेदे	पत्ता	पत्स्यते	पद्यताम्
पर्द्	(१आ०,कुशब्दकरना)	पर्दते	पपर्दे	पर्दिता	पर्दिष्यते	पर्दताम्
पश्	(१० उ०, बाँधना)	पाशयति-ते	पशयाचकार	पाशयिता	पाशयिष्यति	पाशयतु
पा	(१ प०, पीना)	पिबति	पपौ	पाता	पास्यति	पिबतु
पा	(२प०, रक्षा करना)	पाति	पपौ	पाता	पास्यति	पातु
पाल्	(१०उ०, पालना)	पालयति-ते	पालयांचकार	पालयिता	पालयिष्यति	पालयतु
पिष्	(७ प०, पीसना)	पिनष्टि	पिपेष	पेष्टा	पेक्ष्यति	पिनष्टु
पीड्	(१०उ०,दुःखदेना)	पीडयति-ते	पीडयाचकार	पीडयिता	पीडयिष्यति	पीडयतु
पुष्	(४प०, पुष्टकरना)	पुष्यति	पुपोष	पोष्टा	पोक्ष्यति	पुष्यतु
पुष्	(६ प०,पुष्ट करना)	पुष्णाति	पुपोष	पोषिता	पोषिष्यति	पुष्णातु
पुष्	(१० उ०, पालना)	पोषयति-ते	पोषयाचकार	पोषयिता	पोषयिष्यति	पोषयतु
पुष्प्	(४ प०, खिलना)	पुष्प्यति	पुपुष्प	पुष्पिता	पुष्पिष्यति	पुष्प्यतु
पू	(१ आ०, पवित्र०)	पवते	पुपुवे	पविता	पविष्यते	पवताम्
पू	(९ उ०, पवित्र०)	पुनाति	पुपाव	पविता	पविष्यति	पुनातु
पूज्	(१० उ०, पूजना)	पूजयति-ते	पूजयाचकार	पूजयिता	पूजयिष्यति	पूजयतु
पूर्	(१० उ०, भरना)	पूरयति-ते	पूरयाचकार	पूरयिता	पूरयिष्यति	पूरयतु
पॄ	(३ प०, पालना)	पिपर्ति	पपार	परिता	परिष्यति	पिपर्तु
पॄ	(१० उ०, पालना)	पारयति-ते	पारयाचकार	पारयिता	पारयिष्यति	पारयतु
पै	(१ प०, शोषण क०)	पायति	पपौ	पाता	पास्यति	पायतु
प्यै	(१आ०,बढ़ना)आ +	प्यायते	पप्ये	प्याता	प्यास्यते	प्यायताम्
प्रच्छ्	(६ प०, पूछना)	पृच्छति	पप्रच्छ	प्रष्टा	प्रक्ष्यति	पृच्छतु
प्रथ्	(१ आ०, फैलना)	प्रथते	पप्रथे	प्रथिता	प्रथिष्यते	प्रथताम्
प्री	(४आ०,प्रसन्नहोना)	प्रीयते	पिप्रिये	प्रेता	प्रेष्यते	प्रीयताम्
प्री	(९उ०,प्रसन्नकरना)	प्रीणाति	पिप्राय	प्रेता	प्रेष्यति	प्रीणातु
प्री	(१०उ०,प्रसन्नक०)	प्रीणयति	प्रीणयांचकार	प्रीणयिता	प्रीणयिष्यति	प्रीणयतु
प्लु	(१ आ०, कूदना)	प्लवते	पुप्लुवे	प्लोता	प्लोष्यते	प्लवताम्
प्लुष्	(१ प०, जलाना)	प्लोषति	पुप्लोष	प्लोषिता	प्लोषिष्यति	प्लोषतु

लङ्	विधिलिङ्	आशीर्लिङ्	लुङ्	लृङ्	णिच्	कर्मवाच्य
अनृत्यत्	नृत्येत्	नृत्यात्	अनर्तीत्	अनर्तिष्यत्	नर्तयते	नृत्यते
अपचत्	पचेत्	पच्यात्	अपाक्षीत्	अपक्ष्यत्	पाचयति	पच्यते
अपचत	पचेत	पक्षीष्ट	अपक्त	अपक्ष्यत	पाचयति	पच्यते
अपठत्	पठेत्	पठ्यात्	अपाठीत्	अपठिष्यत्	पाठयति	पठ्यते
अपणत	पणेत	पणिषीष्ट	अपणिष्ट	अपणिष्यत्	पाणयति	पण्यते
अपतत्	पतेत्	पत्यात्	अपतत्	अपतिष्यत्	पातयति	पत्यते
अपद्यत	पद्येत	पत्सीष्ट	अपादि	अपत्स्यत	पादयति	पद्यते
अपर्दत	पर्देत	पर्दिषीष्ट	अपर्दिष्ट	अपर्दिष्यत	पार्दयति	पर्द्यते
अपाशयत्	पाशयत्	पाश्यात्	अपीपशत्	अपाशयिष्यत्	पाशयति	पाश्यते
अपिबत्	पिबेत्	पेयात्	अपात्	अपास्यत्	पाययति	पीयते
अपात्	पायात्	पायात्	अपासीत्	अपास्यत्	पालयति	पायते
अपालयत्	पालयेत्	पाल्यात्	अपीपलत्	अपालयिष्यत्	पालयति	पाल्यते
अपिनट्	पिंष्यात्	पिष्यात्	अपिषत्	अपेक्ष्यत्	पेषयति	पिष्यते
अपीडयत्	पीडयेत्	पीड्यात्	अपिपीडत्	अपीडयिष्यत्	पीडयति	पीड्यते
अपुष्यत्	पुष्येत्	पुष्यात्	अपुषत्	अपोक्ष्यत्	पोषयति	पुष्यते
अपुष्णात्	पुष्णीयात्	पुष्यात्	अपोषीत्	अपोषिष्यत्	पोषयति	पुष्यते
अपोषयत्	पोषयेत्	पोष्यात्	अपूपुषत्	अपोषयिष्यत्	पोषयति	पोष्यते
अपुष्प्यत्	पुष्प्येत्	पुष्प्यात्	अपुष्पत्	अपुष्पिष्यत्	पोष्पयति	पुष्प्यते
अपवत	पवेत	पविषीष्ट	अपविष्ट	अपविष्यत्	पावयति	पूयते
अपुनात्	पुनीयात्	पूयात्	अपावीत्	अपविष्यत्	पावयति	पूयते
अपूजयत्	पूजयेत्	पूज्यात्	अपूपुजत्	अपूजयिष्यत्	पूजयति	पूज्यते
अपूरयत्	पूरयेत्	पूर्यात्	अपूपुरत्	अपूरयिष्यत्	पूरयति	पूर्यते
अपिपः	पिपूर्यात्	पूर्यात्	अपारीत्	अपरिष्यत्	पारयति	पूर्यते
अपारयत्	पारयेत्	पार्यात्	अपीपरत्	अपारयिष्यत्	पारयति	पार्यते
अपायत्	पायेत्	पायात्	अपासीत्	अपास्यत्	पाययति	पायते
अप्यायत	प्यायेत	प्यासीष्ट	अप्यास्त	अप्यास्यत	प्याययति	प्यायते
अपृच्छत्	पृच्छेत्	पृच्छ्यात्	अप्राक्षीत्	अप्रक्ष्यत्	प्रच्छयति	पृच्छ्यते
अप्रथत	प्रथेत	प्रथिषीष्ट	अप्रथिष्ट	अप्रथिष्यत	प्रथयति	प्रथ्यते
अप्रीयत	प्रीयेत	प्रेषीष्ट	अप्रेष्ट	अप्रेष्यत	प्राययति	प्रीयते
अप्रीणात्	प्रीणीयात्	प्रीयात्	अप्रैषीत्	अप्रेष्यत्	प्रीणयति	प्रीयते
अप्रीणयत्	प्रीणयेत्	प्रीण्यात्	अपिप्रिणत्	अप्रीणयिष्यत्	प्रीणयति	प्रीण्यते
अप्लवत	प्लवेत	प्लोषीष्ट	अप्लोष्ट	अप्लोष्यत	प्लावयति	प्लूयते
अप्लोषत्	प्लोषेत्	प्लुष्यात्	अप्लोषीत्	अप्लोषिष्यत्	प्लोषयति	प्लुष्यते

धातु	अर्थ	लट्	लिट्	लुट्	लृट्	लोट्
फल्	(१ प०, फलना)	फलति	पफाल	फलिता	फलिष्यति	फलतु
बध्	(१आ०, बीभत्स होना)	बीभत्सते	बीभत्साचक्रे	बीभत्सिता	बीभत्सिष्यते	बीभत्सताम्
बध्	(१० उ०, बाँधना)	बाधयति	बाधयांचकार	बाधयिता	बाधयिष्यति	बाधयतु
बन्ध्	(६ प०, बाँधना)	बध्नाति	बबन्ध	बन्द्धा	भन्त्स्यति	बध्नातु
बाध्	(१आ०, पीड़ा देना)	बाधते	बबाधे	बाधिता	बाधिष्यते	बाधताम्
बुध्	(१ उ०, समझना)	बोधति-ते	बुबोध	बोधिता	बोधिष्यति	बोधतु
बुध	(४ आ०, जानना)	बुध्यते	बुबुधे	बोद्धा	भोत्स्यते	बुध्यताम्
ब्रू	(२ उ०, बोलना)	प०—ब्रवीति	उवाच	वक्ता	वक्ष्यति	ब्रवीतु
		आ०—ब्रूते	ऊचे	वक्ता	वक्ष्यति	ब्रूताम्
भक्ष्	(१० उ०, खाना)	प०-भक्षयति	भक्षयाचकार	भक्षयिता	भक्षयिष्यति	भक्षयतु
		आ०—भक्षयते	भक्षयांचक्रे	भक्षयिता	भक्षयिष्यते	भक्षयताम्
भज्	(१उ०, सेवा करना)	भजति-ते	बभाज	भक्ता	भक्ष्यति	भजतु
भञ्ज्	(७ प०, तोड़ना)	भनक्ति	बभञ्ज	भक्ता	भंक्ष्यति	भनक्तु
भण्	(१ प०, कहना)	भणति	बभाण	भणिता	भणिष्यति	भणतु
भर्त्स्	(१०आ०, डाँटना)	भर्त्सयते	भर्त्सयांचक्रे	भर्त्सयिता	भर्त्सयिष्यते	भर्त्सयताम्
भा	(२ प०, चमकना)	भाति	बभौ	भाता	भास्यति	भातु
भाष्	(१ आ०, कहना)	भाषते	बभाषे	भाषिता	भाषिष्यते	भाषताम्
भास्	(१आ०, चमकना)	भासते	बभासे	भासिता	भासिष्यते	भासताम्
भिक्ष्	(१आ०, माँगना)	भिक्षते	बिभिक्षे	भिक्षिता	भिक्षिष्यते	भिक्षताम्
भिद्	(७ उ०, तोड़ना)	भिनत्ति	बिभेद	भेत्ता	भेत्स्यति	भिनत्तु
भिदि	(१प०, टुकड़े करना)	भिंदति	बिभिंद	भिंदिता	भिंदिष्यति	भिंदतु
भी	(३ प०, डरना)	बिभेति	बिभाय	भेता	भेष्यति	बिभेतु
भुज्	(७ प०, पालना)	भुनक्ति	बुभोज	भोक्ता	भोक्ष्यति	भुनक्तु
	(७ आ०, खाना)	भुङ्क्ते	बुभुजे	भोक्ता	भोक्ष्यते	भुङ्क्ताम्
भू	(१ प०, होना)	भवति	बभूव	भविता	भविष्यति	भवतु
भूष्	(१ प०, सजाना)	भूषति	बुभूष	भूषिता	भूषिष्यति	भूषतु
भृ	(१ उ०, पालना)	भरति-ते	बभार	भर्ता	भरिष्यति	भरतु
भृ	(३ उ०, पालना)	बिभर्ति	बभार	भर्ता	भरिष्यति	बिभर्तु
भ्रम्	(१ प०, घूमना)	भ्रमति	बभ्राम	भ्रमिता	भ्रमिष्यति	भ्राम्यतु
भ्रम्	(४ प०, घूमना)	भ्राम्यति	बभ्राम	भ्रमिता	भ्रमिष्यति	भ्राम्यतु
भ्रंश्	(१ आ०, गिरना)	भ्रंशते	बभ्रंशे	भ्रंशिता	भ्रंशिष्यते	भ्रंशताम्

लङ्	विधिलिङ्	आशीलिंङ्	लुङ्	लृङ्	णिच्	कर्म०
अफलत्	फलेत्	फल्यात्	अफालीत्	अफलिष्यत्	फालयति	फलते
अबीभत्सत	बीभत्सेत	बीभत्सिषीष्ट	अबीभत्सिष्ट	अबीभत्सिष्यत	बीभत्सयति	बीभत्स्यते
अबाधयत्	बाधयेत्	बाध्यात्	अबीबधत्	अबाधयिष्यत्	बाधयति	बाध्यते
अबध्नात्	बध्नीयात्	बध्यात्	अभान्त्सीत्	अभन्त्स्यत्	बन्धयति	बध्यते
अबाधत	बाधेत	बाधिषीष्ट	अबाधिष्ट	अबाधिष्यत	बाधयति	बाध्यते
अबोधत्	बोधेत्	बुध्यात्	अबुधत्	अबोधिष्यत्	बोधयति	बुध्यते
अबुध्यत	बुध्येत	भुत्सीष्ट	अबोधि	अभोत्स्यत	बोधयति	बुध्यते
अब्रवीत्	ब्रूयात्	उच्यात्	अवोचत्	अवक्ष्यत्	वाचयति	उच्यते
अब्रूत	ब्रुवीत	वक्षीष्ट	अवोचत	अवक्ष्यत	वाचयति	उच्यते
अभक्षयत्	भक्षयेत्	भक्ष्यात्	अबभक्षत्	अभक्षयिष्यत्	भक्षयति	भक्ष्यते
अभक्षयत	भक्षयेत	भक्षयिषीष्ट	अबभक्षत	अभक्षिष्यत	भक्षयति	भक्ष्यते
अभजत्	भजेत्	भज्यात्	अभाक्षीत्	अभक्ष्यत्	भाजयति	भज्यते
अभनक्	भञ्ज्यात्	भज्यात्	अभाङ्क्षीत्	अभङ्क्ष्यत्	भञ्जयति	भज्यते
अभणत्	भणेत्	भण्यात्	अभाणीत्	अभणिष्यत्	भाणयति	भण्यते
अभर्त्सयत	भर्त्सयेत	भर्त्सयिषीष्ट	अबभर्त्सत	अभर्त्सयिष्यत	भर्त्सयति	भर्त्स्यते
अभात्	भायात्	भायात्	अभासीत्	अभास्यत्	भापयति	भायते
अभाषत	भाषेत	भाषिषीष्ट	अभाषिष्ट	अभाषिष्यत	भाषयति	भाष्यते
अभासत	भासेत	भासिषीष्ट	अभासिष्ट	अभासिष्यत	भासयति	भास्यते
अभिक्षत	भिक्षेत	भिक्षिषीष्ट	अभिक्षिष्ट	अभिक्षिष्यत	भिक्षयति	भिक्ष्यते
अभिनत्	भिन्द्यात्	भिद्यात्	अभिदत्	अभेत्स्यत्	भेदयति	भिद्यते
अभिन्दत्	भिन्देत्	भिन्द्यात्	अभिन्दीत्	अभिन्दिष्यत्	भेदयति	भिन्द्यते
अबिभेत्	बिभीयात्	भीयात्	अभैषीत्	अभेष्यत्	भाययति	भीयते
अभुनक्	भुञ्ज्यात्	भुज्यात्	अभौक्षीत्	अभोक्ष्यत्	भोजयति	भुज्यते
अभुङ्क्त	भुञ्जीत	भुक्षीष्ट	अभुक्त	अभोक्ष्यत	भोजयति	भुज्यते
अभवत्	भवेत्	भूयात्	अभूत्	अभविष्यत्	भावयति	भूयते
अभूषत्	भूषेत्	भूष्यात्	अभूषीत्	अभूषिष्यत्	भूषयति	भूष्यते
अभरत्	भरेत्	भ्रियात्	अभार्षीत्	अभरिष्यत्	भारयति	भ्रियते
अबिभः	बिभृयात्	भ्रियात्	अभार्षीत्	अभरिष्यत्	भारयति	भ्रियते
अभ्रमत्	भ्रमेत्	भ्रम्यात्	अभ्रमीत्	अभ्रमिष्यत्	भ्रमयति	भ्रम्यते
अभ्राम्यत्	भ्राम्येत्	भ्रम्यात्	अभ्रमत्	अभ्रमिष्यत्	भ्रमयति	भ्रम्यते
अभ्रशत	भ्रशेत	भ्रशिषीष्ट	अभ्रशिष्ट	अभ्रशिष्यत	भ्रशयति	भ्रश्यते

धातु	अर्थ	लट्	लिट्	लुट्	लृट्	लोट्
भ्रस्ज्	(६ उ०, भूनना)	भृज्जति-ते	बभ्रज्ज	भ्रष्टा	भ्रक्ष्यति	भृज्जतु
भ्राज्	(१आ०, चमकना)	भ्राजते	बभ्राजे	भ्राजिता	भ्राजिष्यते	भ्राजताम्
मण्ड्	(१०उ०, सजाना)	मण्डयति-ते	मण्डयाचकार	मण्डयिता	मण्डयिष्यति	मण्डयतु
मथ्	(१ प०, मथना)	मथति	ममाथ	मथिता	मथिष्यति	मथतु
मद्	(४प०, प्रसन्नहोना)	माद्यति	ममाद	मदिता	मदिष्यति	माद्यतु
मन्	(४ आ०, मानना)	मन्यते	मेने	मन्ता	मंस्यते	मन्यताम्
मन्	(८ आ०, मानना)	मनुते	मेने	मनिता	मनिष्यते	मनुताम्
मन्त्र्	(१०आ०, मंत्रणा०)	मन्त्रयते	मन्त्रयाचक्रे	मन्त्रयिता	मन्त्रयिष्यते	मन्त्रयताम्
मन्थ्	(९ प०, मथना)	मथ्नाति	ममन्थ	मन्थिता	मन्थिष्यति	मथ्नातु
मस्ज्	(६ प०, डूबना)	मज्जति	ममज्ज	मङ्क्ता	मङ्क्ष्यति	मज्जतु
मह्	(१प०, पूजाकरना)	महति	ममाह	महिता	महिष्यति	महतु
मा	(२ प०, नापना)	माति	ममौ	माता	मास्यति	मातु
मा	(३ आ०, नापना)	मिमीते	ममे	माता	मास्यते	मिमीताम्
मान्	(१आ०, जिज्ञासा०)	मीमांसते	मीमांसाचक्रे	मीमांसिता	मीमांसिष्यते	मीमांसताम्
मान्	(१०उ०, आदर०)	मानयति-ते	मानयाचकार	मानयिता	मानयिष्यति	मानयतु
मार्ग्	(१० उ०, ढूँढ़ना)	मार्गयति-ते	मार्गयाचकार	मार्गयिता	मार्गयिष्यति	मार्गयतु
मार्ज्	(१०उ०, साफकरना)	मार्जयति-ते	मार्जयाचकार	मार्जयिता	मार्जयिष्यति	मार्जयतु
मिल्	(६ उ०, मिलना)	मिलति-ते	मिमेल	मेलिता	मेलिष्यति	मिलतु
मिश्र्	(१०उ०, मिलाना)	मिश्रयति-ते	मिश्रयांचकार	मिश्रयिता	मिश्रयिष्यति	मिश्रयतु
मिह्	(१प०, गीलाकरना)	मेहति	मिमेह	मेढा	मेक्ष्यति	मेहतु
मील्	(१प०, आँखमींचना)	मीलति	मिमील	मीलिता	मीलिष्यति	मीलतु
१८—कुत्सितेन परामर्शेण सर्वेषां स्वान्तं नितान्तं दूयते।	१८—कुत्सितेन परामर्शेन सर्वेषां स्वान्तं नितान्तं दूयते।
१९—तेजस्वी नान्यस्य समुन्नतिं विषोढुं क्षमः।	१९—तेजस्वी नान्यस्य समुन्नतिं विसोढुं क्षमः।
२०—रघुवंशिनो राजानः स्वतेजसा सुरासुरलोकानप्यभूवन्।	२०—रघुवंशिनो राजानः स्वतेजसा सुरासुरलोकान्प्यभूवन्।

लिङ्ग सम्बन्धी अशुद्धियाँ

१—सर्वे पदाः हस्तिपदे निमग्नाः।	१—सर्वे पादाः हस्तिपादे निमग्नाः।
२—यादृशी शीतला देवी तादृशो वाहनः खरः।	२—यादृशी शीतला देवी तादृशं वाहनं खरः।
३—द्वौ द्वौ चत्वारो भवन्ति।	३—द्वे द्वे चत्वारि भवन्ति।

१३—यहाँ पर 'कस्कादिषु च ।८।३।४८।' से 'स्' हुआ, 'ष्' नहीं। १४—अङ्गुलिषङ्गं में 'समासेऽङ्गुलेः सङ्गः ।८।३।८०।' अङ्गुलि के साथ सङ्ग का समास होने पर 'स्' को 'ष्' हो जाता है। १५—'प्रातर्' रकारान्त अव्यय है। १६—नश्छव्यप्रशान् ।८।३।७ से नकारान्त पद को रु हो गया, रु का विसर्ग और फिर सत्व हो गया, तथा उसके पूर्व अनुस्वार। १७—अनुनासिक के असिद्ध होने से मृन्मयानि होगा। १८—शकार के व्यवधान होने से णत्व नहीं होता। १९—सोढः ।८।३।११५। से सकी मूर्धन्यादेश नहीं हुआ। २०—नकार के पूर्व ह्रस्व न होने से "ङमो ह्रस्वादचि ङमुण् नित्यम् ।८।३।३२।" सूत्र यहाँ नहीं लगता।

१—पद शब्द नित्य नपुंसक लिङ्ग है और पाद नित्य पुंलिङ्ग। २—वाहन शब्द नपुंसक लिङ्ग है और खर शब्द विशेषण भी नहीं है जिससे यहाँ पुंलिङ्ग सार्थक हो। ३—'सामान्ये नपुंसकम्' इस नियम के अनुसार नपुंसक लिङ्ग।

अशुद्ध	शुद्ध
४—सर्पनं वाऽग सम्मानं खलानां प्रीतये कुतः ।	४—सर्पनं वाऽग सम्मानः खलानां प्रीतये कुतः ।
५—इमानि कन्दराणि श्वापदाकुलानीति भयं जनयन्ति जनानाम् ।	५—इमे कन्दराः श्वापदाकुला इति भयं जनयन्ति जनानाम् ।
६—शुचौ शुष्यन्ति पल्वलाः ।	६—शुचौ शुष्यन्ति पल्वलानि ।
७—कियत्यो वितस्तयो विस्तारः अस्याः शाटिकायाः ।	७—कियन्तो वितस्तयो विस्तारः अस्याः शाटिकायाः ।
८—महानयमाजिर्न जानाति कश्चित् कदाऽवसास्यति ।	८—महतीयमाजिर्न जानाति कश्चित् कदाऽवसास्यति ।
९—पुराणीयं कलिर्नैषा शक्या शमयितुम् ।	९—पुराणोऽयं कलिर्नैष शक्यः शमयितुम् ।
१०—अतीते महायुधि लक्षशो योधाः मृताः ।	१०—अतीतायां महायुधि लक्षशो योधाः मृताः ।
११—एषा ध्वनिः श्रवणयोर्मूर्च्छति ।	११—एष ध्वनिः श्रवणयोर्मूर्च्छति ।
१२—सर्वपाणि स्वया पीतिम्ना दिशः अनुरञ्जयन्ति ।	१२—सर्षपाणि स्वेन पीतिम्ना दिशः अनुरञ्जयन्ति ।
१३—गरुडो ध्वजाया यस्य स गरुडध्वजो विष्णुः ।	१३—गरुडो ध्वजे यस्य स गरुडध्वजो विष्णुः ।
१४—श्रुतौ स्त्रीणामविकारोऽस्ति न वा इतिविवादास्पदो विषयः ।	१४—श्रुतौ स्त्रीणामधिकारोऽस्ति न वा इति विवादास्पदं विषयः ।
१५—दानवीरेण घनश्यामदासश्रेष्ठिना ग्रामेऽस्मैककम् औषधालयं समुद्घाटितम् ।	१५—दानवीरेण घनश्यामदासश्रेष्ठिना ग्रामेऽत्रैकः औषधालयः समुद्घाटितः ।

४—सम्मान शब्द घञ् प्रत्यय से बनता है, अतः पुँल्लिङ्ग है। ५—कन्दर शब्द पुँल्लिङ्ग तथा स्त्रीलिङ्ग है, नपुंसक लिङ्ग नहीं। ६—पल्वल शब्द अमरकोश के अनुसार नपुंसक लिङ्ग है। ७—वितस्ति शब्द पुँल्लिङ्ग है। ८—लिङ्गानुशासन के अनुसार आजि शब्द स्त्री लिङ्ग है। ९—कलि शब्द पुँल्लिङ्ग है। १०—युध् शब्द स्त्री लिङ्ग है। ११—'शब्दे निनादनिनदध्वनिध्वानरवस्वनाः" अमरकोश के अनुसार ध्वनि-शब्द पुँल्लिङ्ग है। १२—पीतिमन् शब्द इमनिजन्त होने से नित्य पुँल्लिङ्ग है। १३—'केतनं ध्वजमस्त्रियाम्' अमरकोश के अनुसार ध्वज शब्द स्त्रीलिङ्ग नहीं है। १४—'आस्पद' शब्द अजहल्लिङ्ग अर्थात् नित्य नपुंसक लिङ्ग है। १५—पुंसि संज्ञायां घः प्रायेण ।४।३।११८। इस सूत्र के अनुसार घाजन्त शब्द पुँल्लिङ्ग होते हैं।

१६—दुर्जनाः परकार्येषु बहूनि विघ्नानि कुर्वन्ति।	१६—दुर्जनाः परकार्येषु बहून् विघ्नान् कुर्वन्ति।
१७—कोकिलायाः कण्ठस्वरमतिमधुरमस्ति।	१७—कोकिलायाः कण्ठस्वरोऽति मधुरोऽस्ति।
१८—अथमपथः अन्यमार्गेण याहि।	१८—इदमपथम् अन्यमार्गेण याहि।
१९—अत्र तिलकक्रियाया कियन्त्यक्षतानि अपेक्षन्ते।	१९—अत्र तिलकक्रियायां कियन्तोऽक्षताः अपेक्षन्ते।
२०—गम्भीर मिदं जलाशयं नात्र स्नातव्यम्।	२०—गम्भीरोऽयं जलाशयः नात्र स्नातव्यम्।

स्त्रीप्रत्यय की अशुद्धियाँ

१—पिता रत्नाकरो यस्य लक्ष्मीर्यस्य सहोदरी।	१—पिता रत्नाकरो यस्य लक्ष्मीर्यस्य सहोदरा।
२—पापीयं नापिती, इयं हि यत्र तत्र विग्राहयति जनान्।	२—पापेयं नापिती, इयं हि यत्र तत्र विग्राहयति जनान्।
३—एतादृशाया अवस्थायाः कः प्रतीकारः इति विभावयन्तु विज्ञाः।	३—एतादृश्या अवस्थायाः कः प्रतीकारः इति विभावयन्तु विज्ञाः।
४—सुन्दरया अनया बालया को न युवको विस्मापितः।	४—सुन्दर्या अनया बालया को न युवको विस्मापितः।
५—इदानीन्तमासु भाषासु संस्कृत इव नान्या कापि सुललिता गम्भीरा च।	५—इदानीन्तनीषु भाषासु संस्कृत इव नान्या कापि सुललिता गम्भीरा च।

१६—'विघ्नोऽन्तरायः प्रत्यूहः' अमरकोश के अनुसार विघ्न शब्द पुँल्लिङ्ग है। १७—स्वर शब्द पुँल्लिङ्ग है। १८—'अपथं नपुंसकम् ।२।४।३०। सूत्र के अनुसार 'अपथः' अशुद्ध है। १९—'लाजाः अक्षताः' आदि शब्द पुँल्लिङ्ग में ही प्रयुक्त होते हैं। २०—'आशेरते जलानि अत्र इति जलाशयः' जलाशय शब्द में 'एरच् ।३।३।५६। सूत्र से अच् प्रत्यय हुआ, और घाजन्त शब्द पुँल्लिङ्ग होते हैं।

१—सहोदरी में किसी नियम से भी ङीप् नहीं हो सकता, अतः टाप् होकर सहोदरा शुद्ध रूप बनता है। २—पापा नापिती शुद्ध रूप है, केवल मामकभागधेयपाप० ।४।१।३०। से संज्ञा एवं छन्द में ही ङीप् होता है। ३—कञ् प्रत्यय होने से स्त्रीलिङ्ग में ङीप् होता है। ४—षिद्गौरादिभ्यश्च ।४।१।४१। से ङीष प्रत्यय होता है। ५—ट्युल् प्रत्यय होने पर 'इदानीन्तनीषु' ऐसा रूप ही शुद्ध है।

६—इयं सुरापी क्षनिया, इय च क्षीरपी, अत इमौ भिद्येते नियेन।
७—अहा रम्येय रशाना त्रिसूत्रा !
८—सुधाधरीस्तस्या वाचो निशम्य अवर्णनीय रसमन्वभूवम्।
९—नैजा क्षमता विचार्यैव कार्यसम्पादने मति कुरु।
१०—पाञ्चाल प्रदेशे हडप्पानाम्नि स्थाने चिरन्तना मृन्मया: मुद्रा आनुसन्धानिकैर्लब्धा।
११—इयमार्या भणितिः कस्य चेता नावर्जयति।
१२—नूत्नीषु प्रथासु प्रीतिमास्तम्, प्राचीनासु कमपि गुण नेक्षसे इति नोचितम्।

६—इयं सुरापी क्षनिया इय च क्षीरपा, अत इमौ भिद्येत नियेन।
७—अहो रम्येय रशना त्रिसूत्रो !
८—सुधाधरास्तस्या वाचो निशम्यावर्णनीय रसमन्वभूवम्।
९—नैजीं क्षमता विचार्यैव कार्यसम्पादने मति कुरु।
१०—पाञ्चालप्रदेशे हडप्पानाम्नि स्थाने चिरन्तन्यः मृन्मय्यो मुद्रा आनुसन्धानिकैर्लब्धाः।
११—इयमार्षी भणितिः कस्य चेतो नावर्जयति।
१२—नूतनासु प्रथासु प्रीतिमास्तवम्, प्राचीनासु कमपि गुण नेक्षसे इति नाचितम्।

विभक्तियों की अशुद्धियाँ

१-दिष्ट्याऽध्यायपरीक्षायामुत्तीर्णोऽस्मि।
२—दुष्टाना नाशोऽवश्य भाव्य.।

१—दिष्ट्याऽध्यायपरीक्षामुत्तीर्णोऽस्मि।
२—दुष्टाना नाशेनावश्य भाव्यम्।

६—क्षीरपा ही शुद्ध रूप है, क्योंकि टक् की प्राप्ति नहीं, आताऽनुपसर्गे कः ।३।२।३। से क प्रत्यय होता है और फिर टाप् हो जाता है। सुरापी शुद्ध रूप है क्योंकि 'सुरासीध्वोः' ऐसे वक्तव्य से 'गापोष्टक् ।३।२।८।' से टक् हुआ और फिर ङीप् प्रत्यय हुआ। ७—त्रीणि सूत्राणि यस्याः इस प्रकार बहुव्रीहि होने से ङीप् नहीं हो सकता, अतः त्रिसूत्रा ही शुद्ध रूप है। ८—सुधायाः धरः इति धरशब्दः पचाद्यजन्तः, अतः सुधाधराः ही शुद्ध रूप है। ९—नैज शब्द अणन्त है, अतः नैजीम् ही शुद्ध है। १०—चिरन्तन्यः, मृन्मय्यः ही शुद्ध हैं, पूर्व वाले में ट्युल् प्रत्यय है और बाद वाले में मयट्। ११—तद्धित अण् प्रत्यय होने पर स्त्रीलिङ्ग में ङीप् होता है, आर्षी ही शुद्ध रूप है। १२—नूतन में तनप् प्रत्यय है, टाप् होने पर नूतना बनता है।

१—पार जाने के अर्थ में तरति सकर्मक है, तैरने के अर्थ में ही अकर्मक है।
२—भाव्य शब्द कृत्य प्रत्ययान्त है। 'ओरावश्यके ।३।१।१२५।' सूत्र से ण्यत् होता है, क्योंकि भाव में यह प्रत्यय हुआ है, अतः अनुक्त कर्ता में तृतीया होती है, अतः नाशेन शुद्ध है।

३—कः वर्णयेत्तस्य वीरस्य गुणान् परश्शतेष्वपि श्लोकेषु ।	३—को वर्णयेत्तस्य वीरस्य गुणान् परश्शतैरपि श्लोकैः ।
४—तरन्ति सन्तो जगतो महान्तः ।	४—तरन्ति सन्तो जगत् महान्तः ।
५—घोराया निद्राया शेतेऽयमनात्मज्ञः ।	५—घोरया निद्रया शेतेऽयमनात्मज्ञः ।
६—दयासागरोऽपि त्वं कथं न दयसे मयि ।	६—दयासागरोऽपि त्वं कथं न दयसे मम मां वा ।
७—कैकयी वरमयाचत यद् रामश्चतुर्दशभ्यो वर्षेभ्यो वनं गच्छेत् ।	७—कैकयी वरमयाचत यद् रामश्चतुर्दशवर्षाणि वनं गच्छेत् ।
८—नद्यामाप्लवमानस्य कूपेभ्यः किं प्रयोजनम् ।	८—नद्यामाप्लवमानस्य कूपैः किं प्रयोजनम् ।
९—यन्मह्यं प्रियं नावश्यं तत्सर्वेभ्यः प्रियं स्यात् ।	९—यन्मम प्रियं नावश्यं तत्सर्वेषां प्रियं स्यात् ।
१०—कादयो मावसाना वर्णाः पञ्चसु वर्गेषु विभक्ताः ।	१०—कादयो मावसाना वर्णाः पञ्चभिः वर्गैः विभक्ताः ।
११—परमात्मनि संश्रितः साधुर्न कुतश्चन बिभेति ।	११—परमात्मानं संश्रितः साधुर्न कुतश्चन बिभेति ।
१२—ये सर्वायुषि सुकर्म क्षिपन्ति मुक्तिषु चायुश्यन्ति ते पापात्मानः ।	१२—ये सर्वमायुः सुकर्म क्षिपन्ति मुक्तिभ्यः चासूयन्ति ते पापात्मानः ।

३—अपवर्गे तृतीया ।२।३।६। से तृतीया होकर परश्शतैः शुद्ध रूप होगा । ४—जगत् तरति का कर्म है, जगतः पञ्चमी रूप अशुद्ध है । ५—इत्थं भूतलक्षणे ।२।३।२१। इस सूत्र से तृतीया हुई, सप्तमी का कोई अर्थ यहाँ पर आधार का नहीं है, दूसरे शब्दों में कह सकते हैं—घोरं निद्राणः शेतेऽयमनात्मज्ञः । ६—अधीगर्थदयेशां कर्मणि ।२।३।५२। से कर्म की शेषत्व विवक्षा में षष्ठी होती है, अतः षष्ठी का रूप 'मम' होगा । दयति सकर्मक है, अतः द्वितीया 'माम्' भी शुद्ध है । ७—चतुर्दशवर्षाणि में अत्यन्त संयोगे च ।२।१।२९। से द्वितीया हुई । ८—'गम्यमानापि क्रिया कारकविभक्तेः प्रयोजिका' वामन के इस वचन से कूपैः करण में तृतीयान्त होगा । ९—प्रिय शब्द क्त प्रत्ययान्त है, क्तयोगलक्षणा से षष्ठी होने से 'मम-सर्वेषाम्' शुद्ध रूप होंगे । १०—विभाग विषय 'कादयो मावसानाः वर्णाः' है, वह विभाग पञ्चभिः वर्गैः' इष्ट है, अतः 'इत्थं भूतलक्षणे ।२।३।२१। से तृतीया हुई । ११—संश्रि धातु सकर्मक है, अतः 'परमात्मानम्' ही शुद्ध रूप है । १२—कालाध्वनोरत्यन्तसंयोगे ।२।३।५। इस सूत्र से द्वितीया हुई, अतः 'सर्वमायुः' शुद्ध है, 'मुक्तिभ्यः' में क्रुध द्रुहेर्ष्यासूयार्थानाम्० ।१।४।३७। से सम्प्रदान होने से चतुर्थी हुई ।

अशुद्ध	शुद्ध
१३—हरीतकीं भुङ्क्ष्व पान्थ मातेव हितकारिणीम्।	१३—हरीतकीं भुङ्क्ष्व पान्थ मातरमिव हितकारिणीम्।
१४—ब्रह्मैव जगद्रूपे परिणतमित्याहुः पण्डिताः।	१४—ब्रह्मैव जगद्रूपेण परिणतमित्याहुः पण्डिताः।
१५—ये वदितारो जनापवादाना ग्रहीतारो वोत्कोचाना ते नार्हन्ति सम्मानम्।	१५—ये वदितारो जनापवादान् ग्रहीतारो वोत्कोचांस्ते नार्हन्ति सम्मानम्।
१६—अस्मभ्यं तु शंकरप्रभृतयः अधिकप्रमाणाः प्रतीयन्ते।	१६—अस्माकं तु शंकरप्रभृतयः अधिकप्रमाणाः प्रतीयन्ते।
१७—किमिति वृथा प्रकुप्यसि गुरौ।	१७—किमिति वृथा प्रकुप्यसि गुरवे।
१८—नहि कुशलोऽपि स्वस्कन्धे समारोढुं क्षमः।	१८—न हि कुशलोऽपि स्वस्कन्धमारोढुं क्षमः।
१९—नृशंसास्ते खलु ये बालेष्वपि नादयन्त।	१९—नृशंसास्ते खलु ये बालानां (बालान् वा) नादयन्त।
२०—यो दुष्टे मार्गे सचरते स आत्मनि शत्रूयते।	२०—यो दुष्टेन मार्गेण संचरते स आत्मनि शत्रूयते।
२१—नाटिका हि प्रायेण चतुर्ष्वङ्केषु पूर्यते।	२१—नाटिका हि प्रायेण चतुर्भिरङ्कैः पूर्यते।
२२—देवभाषाव्यवहारो हिन्दुजात्यै न सुपरिहरः।	२२—देवभाषाव्यवहारो हिन्दुजात्या न सुपरिहरः।

१३—मातेव इति प्रथमा अनुपयुक्त है, मातरमिव उचित है। १४—प्रकृत्यादिभ्यः इससे अथवा इत्थं भूतलक्षणे इससे तृतीया हुई, जैसा कि प्रयोग मिलता है—'पयो दधिभावेन परिणमते।" १५—न लोकाव्ययनिष्ठा० ।२।३।६९। इस सूत्र से षष्ठी का निषेध है, अतः जनापवादान्, उत्कोचान् ये दोनों द्वितीया के रूप शुद्ध हैं। १६—अस्माकम् इस में शैषिकी षष्ठी है। १७—प्रकुप्यसि के साथ मह्यम् चतुर्थी होती है, क्रुधद्रुहेर्ष्यासूयार्थानां यंप्रतिकोपः ।१।४।३७। इस सूत्र द्वारा। १८—आरुह धातु सकर्मक है, अतः स्कन्धमारोढुम् ही शुद्ध है। १९—बालान् अथवा बालानाम् शुद्ध है, सप्तमी के लिए कोई आधार यहाँ पर नहीं है। २०—समस्तृतीया युक्तात् ।१।३।५४। इससे तृतीया हुई। कालिदासने मेघदूत में प्रयोग किया है—'क्वचित् पथा संचरते घनानाम्।' २१—अपवर्गे तृतीया ।२।३।६। से तृतीया हुई, 'चतुर्भिरङ्कैः' यही शुद्ध है। २२—भाव में तथा अकर्मक क्रिया से ही खलर्थ प्रत्यय होते हैं, अतः कर्ता के अनुक्त होने पर 'हिन्दुजात्या' यही शुद्ध रूप होगा।

२३—मासत्रयात् प्रवृत्तस्य विवादस्याथ श्रान्तो जातः।

२४—स साधुर्यो न केनचिद् द्वेष्टि न स्निह्यति कस्य चित्।

२५—संस्कृतावहेलनं भारतवासिभ्यो न शोभते।

२६—दुर्जनः सर्वैरविशेषेण विश्वासघातं करोति।

२७—कौसल्यया रामो जातः सुमित्रया न लक्ष्मणः।

२८—धन्यास्ते ये हिंसावृत्तेर्विवर्जिताः।

२९—धिक् तं यस्मान्न पिता प्रसीदति न च गुरुः।

३०—वर्तमानायां बहुदेवतार्चायाम् उपहसन्ति केचित्।

३१—न जाने किं तेन करिष्यति नृशंसो दुरात्मा।

३२—नहि शुकवच् छक्यते पाठयितुं बालान्।

२३—मासत्रयं प्रवृत्तस्य विवादस्याथ श्रान्तो जातः।

२४—स साधुर्यो न कंचिद् द्वेष्टि न स्निह्यति कस्मिंश्चित्।

२५—संस्कृतावहेलनं भारतवासिनां च शोभते।

२६—दुर्जनः सर्वेषामविशेषेण विश्वासघातं करोति।

२७—कौसल्यायां रामो जातः सुमित्रायां च लक्ष्मणः।

२८—धन्यास्ते ये हिंसावृत्त्या विवर्जिताः।

२९—धिक् तं यस्मिन् न पिता प्रसीदति न च गुरुः।

३०—वर्तमानां बहुदेवतार्चाम् उपहसन्ति केचित्।

३१—न जाने किं तं करिष्यति नृशंसो दुरात्मा।

३२—न हि शुकवच्छक्यन्ते पाठयितुं बालाः।

२३—अत्यन्तसंयोगे च।२।१।२९। इस सूत्र से मासत्रयम् द्वितीया ही शुद्ध है। २४—द्विष् धातु सकर्मक है और स्निह् धातु अकर्मक है, अतः न कंचिद् द्वेष्टि न स्निह्यति कस्मिंश्चित ये ही शुद्ध रूप हैं, सम्बन्ध षष्ठी में कस्य चित् रूप भी ठीक है। २५—भारतवासिनाम् इति शेषे षष्ठी। विषय सप्तमी का प्रयोग भी हो सकता है। २६—सर्वेषाम शुद्ध रूप है, यहाँ सह का अर्थ नहीं है, अतः तृतीया नहीं होगी। २७—यहाँ अधिकरण की विवक्षा ही लोक में प्रसिद्ध है। २८—हिंसा वृत्त्या इति अनुक्त कर्ता में तृतीया ही ठीक है। २९—स्मिन इसमें वैषयिकी सप्तमी है। ३०—देवतार्चाम् यहाँ पर कर्म में द्वितीया हुई, क्योंकि उपहस् सकर्मक है, मेघदूत में कालिदास ने लिखा है—"गौरीवक्त्रभ्रुकुटिरचना या विहस्येव फेनैः।" ३१—तेन इसमें तृतीया ठीक नहीं है, किं तं करिष्यति यही शिष्ट प्रयोग है। महाभारत में प्रयोग है—'क्रुद्धः किं मा करिष्यति।' ३२—बालाः कर्म है, कर्मवाची प्रधान क्रिया के कर्म के मानने पर 'शक्यन्ते पाठयितुं बालाः' ऐसा होना चाहिए था, प्रधान क्रिया के अनुक्त होने पर भी प्रधान क्रिया उक्त है, भाव में प्रत्यय हुआ तो भी दोष नहीं।

३३—दुराचारो नार्हति भवार्णवादुत्तरीतुम् ।	३३—दुराचारो नार्हति भवार्णवमुत्तरीतुम् ।
३४—एते हि नैकत्र शक्नुवन्ति चिरकालाय स्थातुम् ।	३४—एते हि नैकत्र शक्नुवन्ति चिरकाल स्थातुम् ।

प्रकीर्ण अशुद्धियाँ

१—वाङ् मनोतीताय ब्रह्मणे नमः ।	१—वाङ् मनसातीताय ब्रह्मणे नम. ।
२—भारते वर्षे स्त्रियः प्रायशः स्वपत्या सह बहिर्न पर्यटन्ति ।	२—भारत वर्षे स्त्रियः प्रायशः स्वपतिना सह बहिर्न पर्यटन्ति ।
३—नौ देहि माहिष दधि ।	३—आवाभ्या देहि माहिष दधि ।
४—स्व स्त भूपतये सपुत्राय सामात्याय ।	४—स्वस्ति भूपतये सह पुत्राय सहामात्याय ।
५—योऽय विहरति स तदापि अविहरत् ।	५—योऽय विहरति स तदापि व्यहरत् ।
६—कदानीं भवान् यास्यसि ? मया तु परश्वो गमिष्यते ।	६—कदानीं भवान् यास्यति ? मया तु परश्वो गस्यते ।
७—भवानेतानि फलानि किमिति न परिक्रीणाति ।	७—भवानेतानि फलानि किमिति न परिक्रीणीते ।
८—दिवाकरः सदैवोष्णीभूतो भ्राम्यति ।	८—दिवाकरः सदैवोष्णो भ्राम्यति ।

३३—उत्तृ सकर्मक है, अतः भवार्णवम् यही प्रयोग ठीक है । ३४—अत्यन्त सयोग में द्वितीया हुई, चिरकालाय यह अशुद्ध प्रयोग है ।

१—अचतुरविचतुरसुचतुरस्त्रीपुंस० ।५।४।७७। इत्यादि सूत्र से अजन्त निपातन होने से 'वाङ्मनसातीताय' ऐसा शुद्ध प्रयोग होगा । २—पतिः समास एव ।१।४।८। इस सूत्र से समास में पति शब्द की घिसंज्ञा होने से "आङोनाऽस्त्रियाम् ।७।३।१२०।" इस सूत्र से न के अभाव में 'स्वपतिना' ऐसा रूप बनेगा । ३—अनुदात्त सर्वमपादादौ ।८।१।१८। इत्यधिकृत्य "युष्मदस्मदोः षष्ठीचतुर्थीद्वितीया० ।८।१।२२।" से अस्मद् के 'आवाभ्याम्' के स्थान पर 'नौ' आदेश नहीं हुआ । ४—प्रकृत्याशिषि ।६।३।८३। इस सूत्र से आशीर्वाद अर्थ में सह शब्द को प्रकृतिभाव हो जाता है । ५—'अविहरत्' में अट् उपसर्ग धातु के पूर्व और वि के बाद में लगेगा, अतः व्यहरत् शुद्ध रूप बनेगा । ६—गमेरिट् परस्मैपदेषु ।७।२।५८। इस सूत्र से परस्मैपद में इट् होता है, आत्मनेपद में नहीं, अतः गंस्यते रूप ही शुद्ध है । ७—परिव्यवेभ्यः क्रियः ।१।३।१८। से परिपूर्वक क्री धातु को आत्मनेपद हो जाता है अतः परिक्रीणीते रूप बनेगा । ८—अभूततद्भाव होने पर ही च्वि प्रत्यय होता है, सूर्य का अनुष्ण होना असम्भव है, अतः उष्णीभूतः के स्थान पर केवल उष्णः होगा ।

९—विभाकरी दिने प्रकाशकर्त्ता रात्रौ चाग्निसोमौ ।
१०—कविः द्वौ श्लोकौ विरच्य प्रेषितवान् ।
११—क्रीडन्तं बालं दृष्ट्वा माता अहासीत् ।
१२—शीतलेन जलेन पान्थस्य कण्ठमार्द्रं बभूव ।
१३—सुरापानेषु देशेषु विप्रा न यान्ति ।
१४—क्रीडनकं प्राप्य बालोऽसौ सानन्दमाक्रीडति ।
१५—उत्तरस्यां दक्षिणस्यां च ध्रुवौ स्तः पूर्वस्यां पश्चिमस्यां च रवेरुदयास्तौ ।
१६—बालः श्वेतैः पुष्पैर्भ्रातारं स्वसारं च भूषयति ।
१७—अग्नि सन्तमसयोऽपि दहिष्यति ।
१८—कृष्णे जाते कंसप्रहरिमण्डलः असुस्वपत् ।
१९—सर्वे छात्रा गुरुं प्रश्नान् पप्रच्छुः ।

९—दिवाकरो दिने प्रकाशकर्त्ता रात्रौ चाग्नीषोमौ ।
१०—कविः द्वौ श्लोकौ विरचय्य प्रेषितवान् ।
११—क्रीडन्तं बालं दृष्ट्वा माता अहसीत् ।
१२—शीतलेन जलेन पान्थस्य कण्ठः आर्द्रो बभूव ।
१३—सुरापाणेषु देशेषु विप्रा न यान्ति ।
१४—क्रीडनकं प्राप्य बालोऽसौ सानन्दमाक्रीडते ।
१५—उत्तरस्यां दक्षिणस्यां च ध्रुवौ स्तः पूर्वस्यां पश्चिमायाम् च रवेरुदयास्तम् ।
१६—बालः श्वेतैः पुष्पैर्भ्रातरं स्वसारं च भूषयति ।
१७—अग्नि सन्ततमयोऽपि धक्ष्यति ।
१८—कृष्णे जाते कंसप्रहरिमण्डलः अस्वापत् ।
१९—सर्वे छात्रा गुरुं प्रश्नान् पप्रच्छुः

९—ईदग्नेः सोमवरुणयोः ।६।३।२७। अग्नेः स्तुत्स्तोमसोमाः ।८।३।८२। इन सूत्रों से ईत्व और षत्व होने से अग्नीषोमौ होगा। १०—ल्यपि लघुपूर्वात् ।६।४।५६। से अय् आदेश होने से विरचय्य बनेगा। ११—ह्म्यन्तक्षणश्वसजागृणिश्व्येदिताम् ।७।२।५। इस सूत्र से वृद्धि का निषेध हो गया। अतः 'अहसीत्' रूप होगा। १२—'कण्ठो गलोऽथ ग्रीवायाम्' के अनुसार कण्ठ शब्द पुंल्लिङ्ग है। १३—पानं देशे ।८।४।९। इस सूत्र से न को ण हो गया, अतः सुरापाणेषु रूप बनेगा। १४—क्रीडोऽनुसम्परिभ्यश्च ।१।३।२१। इस सूत्र से आङ् पूर्वक क्रीड् धातु को आत्मनेपद होता है, अतः 'आक्रीडते' रूप बनेगा। १५—सर्वनाम संज्ञा के न होने से 'पश्चिमायाम्' रूप बनेगा और अव्यय होने से 'उदयास्तम्' रूप होगा। १६—अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृ०।६।४।११। से दीर्घ के निषेध होने से 'भ्रातरम्' रूप बनेगा। १७—दह् धातु अनिट् है, अतः धक्ष्यति रूप बनेगा। १८—णि के अनावश्यक होने से 'अस्वपत्' रूप होगा। १९—ग्रहिज्यावयिव्यधि० ।६।१।१६। इस सूत्र से किन् में ही संप्रसारण होने से यहाँ पर 'पप्रच्छुः' रूप बनेगा।

२०—विषयी दरिद्राति त्यागिनस्तु न दरिद्रान्ति ।	२०—विषयी दरिद्राति त्यागिनस्तु न दरिद्रति ।
२१—अस्मिन् वृक्षे द्वे फलेऽन्तिरा संशोभेते ।	२१—अस्मिन् वृक्षे द्वे फले अतितरा संशोभेते ।
२२—स्वामिनं प्रार्थयित्वा गृहं गच्छत ।	२२—स्वामिनं प्रार्थ्य गृहं गच्छत ।
२३—वाराङ्गना विलसद्भ्या दृग्भ्या वीक्षते ।	२३—वाराङ्गना विलसन्तीभ्यां दृग्भ्यां वीक्षते ।
२४—भगवद्भक्तः भूमिस्थोऽपि वासवं हसति ।	२४—भगवद्भक्तः भूमिष्ठोऽपि वासवं हसति ।
२५—विडालोऽयं नित्यं भोजनसमये उपतिष्ठति ।	२५—विडालोऽयं नित्यं भोजनसमये उपतिष्ठते ।
२६—श्रूयते यद् रावणसेनायां त्रिमूर्धनश्चतुर्मूर्धानश्च दैत्या आसन् ।	२६—श्रूयते यद् रावणसेनायां त्रिमूर्धाश्चतुर्मूर्धानश्च दैत्या आसन् ।
२७—तस्याचरणं बोधश्च प्रशस्यौ स्तः ।	२७—तस्याचरणं बोधश्च प्रशस्ये स्तः ।
२८—पिकशावः काकीभिः पाल्यते न तु काकीशावः पिकैः ।	२८—पिकशावः काकीभिः पाल्यते न तु काकशावः पिकैः ।
२९—कः श्रुतिमान् मधुरगानं न शुश्रूषति ?	२९—कः श्रुतिमान् मधुरगानं न शुश्रूषते ?

२०—अदभ्यस्तात् ।७।१।४। से अत् आदेश होने पर दरिद्रति रूप बनेगा। २१—ईदूदेद् द्विवचनं प्रगृह्यम् ।१।१।११। से प्रगृह्य संज्ञा होने से प्रकृतिभाव हुआ, अतः 'फले अततराम्' होगा। २२—प्रार्थयित्वा अशुद्ध है, यहाँ पर त्वा को ल्यप् हो जाता है, अतः 'प्रार्थ्य' रूप बनेगा। २३—विलसद्भ्याम् यहाँ पर 'विलसत्' शब्द दृश् (स्त्रीलिङ्ग) का विशेषण है, अतः स्त्रीलिङ्ग बनाने के लिए उगितश्च ।४।१।६। इस सूत्र से ङीप् होकर 'विलसन्तीभ्याम्' ऐसा रूप बनेगा। २४—अम्बाम्बगोभूमिसव्यापद्वि० ८।३।९७। इस सूत्र से भूम के पश्चात् 'स्थ' होने से स को ष हो गया, अतः 'भूमिष्ठः' ही ठीक रूप होगा। २५—उपाद्देवपूजासंगतकरणमित्रकरणपथिष्विति वक्तव्यम् ।वा०। उप पूर्वक स्था को आत्मनेपद हो गया। २६—द्वित्रिभ्यां ष मूर्ध्नः ।५।४।११५। इस सूत्र से समासान्त में ष हो जाता है, चूंकि यहाँ पर बहुव्रीहि समास है, अतः त्रिमूर्धाः दैत्याः होगा। २७—नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम् ।१।२।६९। अक्लीब और क्लीब के साथ समास होने पर क्लीब शेष रहता है। २८—कुक्कुट्यादीनामण्डादिषु ।वा०। इस से पुंलिङ्ग हो गया, अतः कुक्कुटाण्डम्, मृगक्षीरम्, काकशावः आदि रूप निष्पन्न होते हैं। २९—शाश्रुस्मृदृशां सनः ।१।३।५७। इस सूत्र से आत्मनेपद हो गया।

३०—देवी खड्गेन शुम्भस्य शिरोऽप्रहरत् ।	३०—देवी खड्गेन शुम्भस्य शिरः प्राहरत् ।
३१—सन्तसभायां धर्मोपदेशो भवति, रक्षः सभासु च पापोपदेशः ।	३१—सन्तसभायां धर्मोपदेशो भवति रक्षःसभेषु च पापोपदेशः ।
३२—भो छात्राः पठत एवं स्म आचार्य उवाच ।	३२—भो छात्राः पठत एवमाचार्य आह स्म ।
३३—हा धिक् । अपि स्वसारमताडयत् भवान् ।	३३—हा धिक् । अपि स्वसारं ताडयति भवान् ।
३४—अस्मिन् बिले नकुलकुलानि विशन्ति निविशन्ति च तस्मिन् मूषकाः ।	३४—अस्मिन् बिले नकुलकुलानि विशन्ति निविशन्ते च तस्मिन् मूषकाः ।
३५—पटोलस्य फलं मूलं छर्दं च रोगं महन्ति ।	३५—पटोलस्य फलं मूलं छर्दश्च रोगं घ्नन्ति ।

पद तथा वाक्य की अशुद्धियाँ

१—न जातु दुष्टः कदापि स्वभावं त्यजति ।	१—न जातु दुष्टः स्वभावं त्यजति ।
२—एके सूर्यवंशिनो ह्यपरे सोमवंशिनः ।	२—एके सूर्यवंश्या ह्यपरे सोमवंशीयाः ।

३०—लुङ्लङ्लृङ्क्ष्वडुदात्तः ।६।४।७१। लुङ् आदि के परे रहने पर धातु के पूर्व में व्यवधानरहित अट् का आगम होता है। अतः प्र+अहरत् (प्राहरत्) रूप बनेगा। ३१—सभा राजाऽमनुष्यपूर्वा ।२।४।२३। राजपर्यायपूर्व तथा अमनुष्यपूर्व समासान्त तत्पुरुष नपुंसकलिङ्ग होता है, अतः रक्षःसभेषु रूप होगा। ३२—लट् स्मे ।३।२।११८। स्म के साथ लट् का प्रयोग होता है। ३३—गर्हायां लडपिजात्वोः ।३।३।१४२। निन्दा में केवल लट् होगा अन्य लकार नहीं, यथा—अपि जायां त्यजसि जातु गणिकामाधत्से गर्हितमेतत् (सि०कौमुदी)। ३४—नेर्विशः ।१।३।१७। इस सूत्र से निपूर्वक विश् धातु को आत्मनेपद हो गया—निविशन्ते रूप होगा। ३५—'छर्दः पुमान्' अमरकोश के अनुसार छर्द शब्द पुंल्लिङ्ग है और तीनों के साहचर्य से बहुवचन होगा—अघ्नन्ति।

१—जातु तथा कदापि का एक ही अर्थ है, अतः इन दोनों में से एक ही का प्रयोग करना चाहिए। २—'सूर्यवंश एगामस्तीति सूर्यवंशिनः' ऐसी व्युत्पत्ति होने पर भी इस शब्द (सूर्यवंशिनः) का प्रयोग शिष्टसम्मत नहीं है, शुद्ध प्रयोग हैं—सूर्यवंश्याः, सूर्यवंशीयाः, सोमवंश्याः, सोमवंशीयाः।

३—द्वाभ्यां त्रिभिर्वाऽपत्यामा तुष्येता दम्पती आधुनिके युगे।	३—द्वाभ्यामपत्याभ्यां त्रिभिर्वा अपत्यैः स्तुष्येता दम्पती आधुनिके युगे।
४—बहुरोऽस्य परिजना अमिताश्च परिच्छदा इत्यराजापि राजेव प्रतिभात्यसौ।	४—बहुरस्य परिजनः अमितश्च परिच्छदः इत्यराजापि राजेव प्रतिभात्यसौ।
५—सत्यये गच्छन्तोऽपि ये परा सत्ये निर्नीयन्ति ते हि महान्तः।	५—सत्येन गच्छन्तोऽपि ये परा सत्येन निर्नीयन्ति ते हि महान्तः।
६—दशरथस्य कोसल्याया रामो नाम पुत्ररत्नमजनि।	६—दशरथात् कौसल्यायां रामो नाम पुत्ररत्नमजनि।
७—पारस्परिकं कलहः राष्ट्राणां नाशायैव भवतीति निश्चितम्।	७—परस्परं कलहः राष्ट्राणां नाशायैव भवतीति निश्चितम्।
८—स सर्वं जीवनमध्ययनमध्यापनं चाकरोत्।	८—स सर्वमायुरध्ययनमध्यापनं चाकरोत्।
९—परिणीताया दशाया यदि दम्पती संयमेन तिष्ठन्स्तदारोग्यसुखं लभेते।	९—यदि दम्पती संयमेन तिष्ठतः तदा आरोग्यसुखं लभेते।
१०—मार्गोऽयं समाजस्य व्यक्तेश्च समं हिताय भवति।	१०—मार्गोऽयं समष्टेर्व्यक्तेश्च समं हिताय भवति।
११—अस्या वार्ताया मिथ्याभवने न कोऽपि सन्देहः।	११—अस्या वार्ताया मिथ्यात्वे (इद मिथ्येत्यत्र) न कोऽपि सन्देहः।

३—"द्वाभ्यामपत्याभ्याम् त्रिभिरपत्यैः" ऐसा प्रयोग होना चाहिए। ४—'बहुरस्यपरिजनः अमितश्च परिच्छदः' एक वचन में प्रयोग करना चाहिए, परिजन-परिच्छदौ इस प्रकार एकवचन का प्रयोग करने पर भी शब्द-शक्ति-स्वभाव से बहुत्व का भान होता है। ५—सत्येन ·तृतीया होनी चाहिए 'सत्ये' सप्तमी नहीं, क्योंकि कविवर कालिदास ने भी तृतीया में ही प्रयोग किया है—"प्रजासु कः केन पथा प्रयातीति।" ६—'दशरथात् कौसल्यायाम्' ऐसा व्यवहार है, सम्बन्ध मात्र की विवक्षा में षष्ठी (दशरथस्य) भी ठीक है। ७—पारस्परिक शब्द का प्रयोग आधुनिक लोग करते हैं, किन्तु 'परस्परं कलहः' यही परम्परागत व्यवहार है। ८—'आयुः जीवनकालः' इस प्रकार कोशकारों का मत है। ९—जाया और पति 'दम्पती' होते हैं, उनमें एक परिणेता होता है और दूसरी परिणीता, विवाह होकर ही दम्पती होते हैं, अतः 'परिणीताया दशायाम्' निरर्थक है। १०—समाज के स्थान पर समष्टि का प्रयोग होना चाहिए, क्योंकि व्यक्ति शब्द का प्रयोग किया गया है। ११—मिथ्याभवने अशुद्ध प्रयोग है, मिथ्यात्वे अथवा इद मिथ्येत्यत्र न कोऽपि सन्देहः ऐसा प्रयोग शिष्ट-सम्मत है।

१२—भक्ता भक्तिप्रह्वाः सन्तो मठाधीशस्य चरणं स्पृशन्ति ।	१२—भक्ता भक्तिप्रह्वाः सन्तो मठाधीशस्य चरणौ स्पृशन्ति ।
१३—अतिराजेते खल्वस्योपानहौ पादयोः परिहिते ।	१३—अतिराजेते खल्वस्योपानहौ पादयोः बद्धे ।
१४—जिज्ञासाभराक्रान्तोऽहं कियतामेव विपश्चिता सकासमगमम् ।	१४—जिज्ञासाभराक्रान्तोऽहं बहूनां विपश्चितां सकाशमगमम् ।
१५—विविधाभिः खेलाभिर्व्यत्येति बालाना बाल्यम् ।	१५—विविधाभिः खेलाभिर्व्यत्येति बालाना वयः(बालाना कालो वा)।
१६—परेषामधीनतया नात्मश्रेयः सम्पादयितुं समर्था वयम् ।	१६—परदास्ये वर्तमानाः(परैः परवन्तोः) नात्मश्रेयः सम्पादयितुं समर्था वयम् ।
१७—आगतेषु दुर्दिनेषु मित्राण्यपि त्यजन्ति ।	१७—समुपस्थिते विषमे समये मित्राण्यपि त्यजन्ति ।
१८—न हि कारणं विना कार्योत्पत्तिः सम्भवा ।	१८—न हि कारणं विना कार्योत्पत्तिः संभविनी ।
१९—जगतः समुत्पत्तौ कियन्ति वर्षाणि व्यतीतानि ।	१९—जगतः समुत्पत्तेः (समुत्पन्नस्य जगतः वा) कियन्ति वर्षाणि व्यतीतानि ।

१२—चरण आदि शब्द प्रायः द्विवचनान्त होते हैं, 'चरणौ स्पृश्येते' ऐसा प्रयोग शिष्टसम्मत एवं ठीक है—चरणस्पर्श की विधि इस प्रकार है—"वामेन हस्तेन वामश्चरणः स्प्रष्टव्यः दक्षिणेन च दक्षिणः।" १३—उपानहौ हि बध्येते न परिधीयेते उपानह् शाटिकाकी भाँति पहने नहीं जाते अपितु बाँधे जाते हैं, इसी कारण 'परिमुक्तोपानत्कः, अवमुक्तोपानत्कः' इत्यादि प्रयोग मिलते हैं। १४—कियत् शब्द का संख्याप्रश्न में प्रयोग होता है, एव का यहाँ पर कोई अर्थ नहीं; बहूनाम् का प्रयोग करना उचित है। १५—बालाना भाव एव बाल्यं भवति। अतः या तो बालानाम् हटा देना चाहिए या वयः का प्रयोग करना चाहिए। १६—अधीनता शब्द अव्यावहारिक है, या तो 'परदास्ये वर्तमानाः' या 'परैः परवन्तो वयम्' ऐसा प्रयोग होना चाहिए। १७—मेघ से घिरे दिन को ही दुर्दिन कहते हैं, अतः विषमे समये समुपस्थिते ऐसा कहना चाहिए। १८—संभवनं सभवः ऋदोरप् ।३।३।५७। से अप् प्रत्यय हुआ। पचाद्यजन्त भी यह नहीं है, जिससे संभवा स्त्रीलिङ्ग रूप बन जाय। इस कारण 'संभविनी' शब्द का प्रयोग करना उचित है। १९—अधिकरण का कोई आधार नहीं है, यहाँ पर शैषिकी षष्ठी होगी, अतः 'जगतः समुत्पत्तेः' ठीक प्रयोग है।

२०—नाहं लवणप्रियः। नास्ति मे लवणस्य प्रयोजनम्।	२०—नाहं लवणप्रियः। नास्ति मे लवणेन प्रयोजनम्।
२१—तथा वर्तताम् यथा जीवनमादर्शः स्याल्लोकस्य।	२१—तथा वर्तेत यथा वर्तनं (वृत्तिर्वा) आदर्शः स्याल्लोकस्य।
२२—प्रभो तव शरणं प्राप्तोऽहं। पाहि माम्।	२२—अहं त्वा शरणं प्राप्तोऽस्मि। पाहि माम्।
२३—धृष्टोऽसौ भृत्यः। ममादेशं मस्तके न निदधाति।	२३—धृष्टोऽसौ भृत्यः। ममादेशं शिरसा न वहति (अथवा मूर्ध्ना नादत्ते)।
२४—विगते महति युद्धे पदातीनां संख्या विंशतिकोटिरासीत्।	२४—विगते महति युद्धे पदातयः विंशतिः कोट्य आसन् (विंशतिकोटीर्वा)।
२५—भगवतः शपथेन कथयामि नैतन्मया कदापि कृतम्।	२५—भगवता शपे। नैतन्मया कदापि कृतम्।
२६—पाकिस्तानस्था दिवा वा रात्रौ वा भारतस्य विरुद्धं विषमुद्वमन्ति।	२६—पाकिस्तानस्था दिवा वा दोषा वा भारतस्य विरोधे (भारतं प्रति वा) विषमुद्वमन्ति।
२७—संस्कृतज्ञान् विहाय नान्येऽस्योपरि विचारयन्ति इति खेदः।	२७—संस्कृतज्ञान् विहाय नान्ये इदं विचारयन्ति इति खेदः।

२०—'नास्ति मे लवणेन प्रयोजनम्' ऐसा ही लोक व्यवहार है। २१—वृत्तिः अथवा वर्तनम् होना चाहिए, क्योंकि जीवन तो प्राणधारण होता है। २२—'शरणं गृहरक्षित्रोः' अमर कोश के अनुसार शरण रक्षक होता है न कि रक्षण, अतः 'अहं त्वा शरणं प्राप्तोऽस्मि' यही ठीक है। २३—शिष्ट व्यवहार के अनुसार तृतीया होनी चाहिए, सप्तमी नहीं। २४—पदातयः विंशतिः कोट्य आसन्' ऐसा कहना चाहिए। विंशतिकोटिः ऐसा समस्त पद भी नहीं बन सकता। विंशतिः कोटयः समाहृताः, विंशतेः कोटीनां समाहारः ऐसा विग्रह करने पर 'विंशतिकोटीः' ऐसा द्विगु समास होगा। २५—'सत्येन शापयेद्विप्रम्' इत्यादि प्रयोगों के देखने से ज्ञात होता है कि तृतीया का प्रयोग ही ठीक है। २६—दिवा वा दोषा वा ऐसा प्रयोग अच्छा है। भारतस्य विरोधे, भारतं प्रति वा ऐसा कहना ठीक है। २७—'नान्ये इदं विचारयन्ति' ऐसा कहना चाहिए, 'अस्योपरि विचारयन्ति' ऐसा कहना ठीक नहीं।

२८—शासनमतिकामतोऽपि तस्य न किमपि कर्तुं शशाक शासकः।	२८—शासनमतिक्रामन्तं तं न किमपि कर्तुं शशाक शासकः।
२९—मन्दाक्षस्यापि जनस्य नेदं तिरोहितम्।	२९—मन्ददृष्टेरपि (मन्ददर्शनस्यापि वा) जनस्य नेदं तिरोहितम्।
३०—नायमर्थो जनसाधारणस्य गोचरः।	३०—नायमर्थो जनसामान्यस्य (जनसमष्टेर्वा) गोचरः।
३१—इदानीमाविष्काराणा समातिप्राय वर्तत इति मूर्खा वदन्ति।	३१—इदानीमाविष्काराणा प्रायेण समाप्तिर्वर्तत इति मूर्खा वदन्ति।
३२—न कोऽपि सहजं स्वभावमतिक्रमितुं समर्थः।	३२—न कोऽपि स्वभावमतिक्रमितुं समर्थः।
३३—विज्ञा हि विविधाभिर्विधाभिः प्रतिष्ठामर्हन्ति।	३३—विज्ञा हि विविधा प्रतिष्ठाम् अर्हन्ति।
३४—नेदानीं सन्त्युपयुक्ता ग्रन्था इति न सत्यम्।	३४—नेदानीं सन्त्युपयोगिनो ग्रन्था इति न सत्यम्।
३५—दशवर्षावस्थायामेव शङ्कराचार्यः शास्त्रौघमवेदीत्।	३५—दशवर्षे एव अथवा वयसा दशहायने शङ्कराचार्यः शास्त्रौघमवेदीत्।
३६—शास्त्रपारंगतः स आचार्यचरणात् विद्यावाचस्पतिपदं लेभे।	३६—शास्त्रपारंगतः स आचार्यचरणेभ्यः वाचस्पतिपदं लेभे।

२८—'क्रुद्धः किं मा करिष्यति' महाभारत में इस प्रकार के प्रयोग देखने से 'शासनमतिक्रामन्तं तम्' ऐसा द्वितीया का प्रयोग होना चाहिए। नागानन्द नाटक के द्वितीय अङ्क में "भगवन्कुसुमायुध, येन त्व रूपशोभया निर्जितोऽसि तस्य त्वया न किमपि कृतम्" इस प्रकार षष्ठी का प्रयोग देखने से 'आक्रमतोऽपि तस्य' भी ठीक है। २९—मन्दाक्ष शब्द लज्जार्थ में रूढ है, यहाँ पर मन्ददृष्टि अथवा मन्ददर्शन शब्द का प्रयोग होना चाहिए। ३०—जन सामान्यस्य जनसमष्टेर्वा कहना उचित है, 'जन साधारणम् जनैः साधारणम्' है। ३१—'प्रायेण समाप्तिः' अथवा 'आविष्काराः समाप्तप्रायाः' कहना चाहिए। ३२—स्वस्य भावः स्वभावः, स सहजः सहभूरेव भवति इस प्रकार विशेषण से कोई अर्थ विशेष नहीं निकलता। ३३—विशिष्टा विभिन्ना विधा यस्याः सा विविधा, विविधा प्रतिष्ठाम् अर्हन्ति ऐसा कहना चाहिए, व्यर्थ के वाक्प्रपंच में न पड़ना चाहिए। ३४—'उपयुक्ताः' नियमपूर्वक अधीत होते हैं, उपयोग या येन केन प्रकारेण नीताः ऐसा अर्थ होगा। ३५—दशवर्षावस्था ऐसा समस्त शब्द नहीं बन सकता। ३६—तत्पुरुष समास में उत्तरपद चरण शब्द पूजार्थक बहुत्वविवक्षा में होगा, एकवचन नहीं।

३७—तत्राभिनये विद्यालयस्य प्राध्यापका सूत्रधारस्य पात्र बहन्ति ।	३७—तत्राभिनये विद्यालयस्य प्राध्यापका सूत्रधारस्य वेष परिगृह्णन्ति ।
३८—एव सर्व स्थालीपुलाक परीक्षित स्यात् ।	३८—एव सर्व स्थालीपुलाकन्यायेन परीक्षित स्यात् ।
३९—प्राणिमात्राणि सुखमात्मन इच्छन्ति न दु खम् ।	३९—प्राणिमात्रम् सुखमात्मन इच्छति न दु खम् ।
४०—ऋषिमुनीना शक्त्या सह स्वशक्तिर्न जातु तोलनीया ।	४०—ऋषिमुनीना शक्त्या स्वशक्तिर्न जातु तुलनीया ।
४१—वल्गा सनियम्य मन्दीकुरु रथ वेगम् ।	४१—वल्गा सनियम्य मन्दीकुरु रथ वेगम् ।
४२—महान् एव गम्भीरो विषयो विशेषत भवादृशा विषये ।	४२—महानेव गभीरो विषयो विशेषता भवादृशाम ।
४३—आदर्शविनीता इमे किकरा ।	४३—विनयादर्शा इमे किकरा ।
४४—अथ केन मूल्येनेमे ग्रन्था परिक्रीता	४४—अथ केन मूल्येनेमे ग्रन्था क्रीता ।
४५—वयमयेषा परीक्षा परिगृह्णीम स्व तु न परीक्षामहे ।	४५—वयमन्यान्परीक्षामहे, नत्वात्मानम् ।
४६—कुशल सवादमिम श्रुत्वा सर्वे ते प्राहृष्यन् ।	४६—कुशलवृत्तान्तमिम श्रुत्वा सर्वे ते प्राहृष्यन् ।

३७—पात्र का अर्थ अभिनेता है, अत सूत्रधारस्य पात्रम् इसका उटपटाग अर्थ हो जायगा । ३८—स्यात् पुलाकस्तुच्छधान्ये इत्यमर । ३९—'प्राणिमात्रम्' शुद्ध रूप है, कृत्स्ना प्राणिन प्राणिमात्रम् । 'मात्र कार्त्स्न्येऽवधारणे' इत्यमर । ४०—यहाँ सह शब्द निरर्थक है, यहाँ पर 'तुला करोति तुलयति' ऐसा प्रयोग होता है, न तु चौरादिक 'तुल उन्माने' धातु का रूप । मेघदूत में एक स्थल पर आया है—'प्रासादास्त्वा तुलयितुमल यत्र तैस्तैर्विशेषै" । ४१—वल्गा का प्रयोग रश्मि के समान ही बहुवचन में होता है, जैसे कि "आलाने गृह्यते हस्ती वाजी वल्गासु गृह्यते ।" ४२—'भादृशाम्' ही रहेगा, 'विषये' नहीं रखना चाहिए । यहाँ पर सम्बन्ध मात्र विवक्षित है, वैषयिक अधिकरण नहीं । ४३—'विनयादर्शा इमे किकरा' ऐसा प्रयोग करना चाहिए । 'विनयस्य आदर्शा इति वा, विनयमादर्शयन्तीति वा" ऐसा विग्रह होगा । ४४—नियतकालमूल्यस्वीकरणे परिक्रयणम् भवति न तु क्रयणमात्रम् । ४५—'वयमन्यान् परीक्षामहे नत्वात्मानम्' ऐसा कहना चाहिए । ४६—'सवाद' 'सलाप' होता है, 'वृत्तान्त' नहीं होता, अत कुशलवृत्तान्तमिम श्रुत्वा' ऐसा कहना चाहिए ।

(ख) अनुवादार्थ गद्य-पद्य-संग्रह

१—हा कथं महाराजदशरथस्य धर्मदाराः प्रियसखी मे कौसल्या। क एतत्प्रत्येति सैवेयमिति।"""धिक् प्रहसनम्। अयमृष्यशृङ्गाश्रमादरुन्धतीपुरस्कृतान् महाराजदशरथस्य दारानधिष्ठाय भगवान् वसिष्ठः प्राप्तः। तत्किमेवं प्रलपसि। (उत्तर०)

२—चन्द्रापीडस्य सहपांसुक्रीडिततया सहसंवृद्धतया च सर्वविश्रम्भस्थानं द्वितीयमिव हृदयं वैशम्पायनः परं मित्रमासीत्। (कादम्बर्याम् ७६)।

३—स्वयमेवोत्पद्यन्ते एवं विधाः कुलपांसवो निःस्नेहाः पशवो येषां क्षुद्राणां प्रज्ञा पराभिसन्धानाय न ज्ञानाय, पराक्रमः प्राणिनामुपघाताय नोपकाराय, धनपरित्यागः कामाय न धर्माय, किं बहुना, सर्वमेव येषां दोषाय न गुणाय। (काद००)

४—राजा विस्फारितेन निश्चलेन चक्षुषा पिबन्निवालग्न्निव मनोरथसहस्रप्राप्तदर्शनं सस्पृहमीक्षमाणस्तनयाननं मुमुदे कृतकृत्यं चात्मानं मेने। (कादम्बर्याम् ७२)

५—सर्वथा निष्प्रतीकारेयमापदुपस्थिता। किमिदानीं कर्तव्यं का दिशं गन्तव्यमित्येते चान्ये च विपण्णहृदयस्य मे सङ्कल्पाः प्रादुरासन्। (कादम्बर्याम् १५७)

६—राजवाहनो रसालतरुषु कोकिलादीनां पक्षिणामालापाञ्छावं श्रावं विकसितानि सरांसि दर्शं दर्शमगन्दलालया ललनासमीपमवाप। (दशकुमारचरिते १-५)

७—अतिप्रबलपिपासावसन्नानि गन्तुमल्पमपि मे नालमङ्गकानि। अलमप्रभुरस्म्यात्मनः। सीदति मे हृदयम्। अन्धकारतामुपयाति चक्षुः। अपि नाम खलो विधिरनिच्छतोऽपि मे मरणमद्यैवोपपादयेत्। (कादम्बर्याम् ६)

८—सखे पुण्डरीक सुविदितमेतन्मम। केवलमिदमेव पृच्छामि, यदेतदारब्धं भवता किमिदं गुरुभिरुपदिष्टमुत धर्मशास्त्रेषु पठितमुत मोक्षप्राप्तियुक्तिरियमाहोस्विदन्यो नियमप्रकारः ?" (कादम्बर्याम् १५५)

९—एवं कदलीदलेनानवरतं वीजयता समुदभून्मे मनसि चिन्ता। नास्ति खल्वसाध्यं मनोभुवः। क्वायं हरिण इव वनवासनिरतः स्वभावमुग्धो जनः क्व च विविधविलासरसराशिर्गन्धर्वराजपुत्री महाश्वेता! (कादम्बर्याम् १५७)

१—दार—स्त्री। २—पांसु—धूलि। विश्रम्भस्थान—विश्वासपात्र। ३—अभिसन्धान—धोखा। ४—विस्फारित—खोला हुआ। ईक्ष्—देखना। ५—निष्प्रतीकार—इलाज के बिना। विपण्ण—खिन्न। ६—ललना—स्त्री। ७—अवसन्न—गमास। सीद्—दुःखित होना। विधि—भाग्य। अनुरोध = लिहाज। प्रणय = प्रेम। ८—आहोस्वित् = अथवा। ९—कदली = केला। अनवरत = निरन्तर। विलास = कौतुक।

१०—स मद्वचनानन्तरमेव न वेद्मि किमसह्यवृत्तेर्मदनज्वरस्य वेगाद्युत, सद्यो-विपाकस्यात्मनो दुष्कृतस्य गौरवादाहोस्विन्मद्वचस एव सामर्थ्यादाच्छिन्नमूलस्तरुरिव क्षितावपतत्। (कादम्बर्याम्)

११—तदेवप्रायेऽतिकुटिलकष्टचेष्टासहस्रदारुणे राज्यतन्त्रेऽस्मिन् महामोहान्धकारकारिणि च यौवने कुमार! तथा प्रयतेथा यथा नोपहस्यसे जनैर्नोपालभ्यसे सुहृद्भिर्नाक्षिप्यसे विषयैर्न विकृष्यसे रागेण नापह्रियसे सुखेन। (कादम्बर्याम् १०६)

स किं सखा साधु न शास्ति योऽधिप
हिताम्न यः संशृणुते स किं प्रभुः।
सदानुकूलेषु हि कुर्वते रतिं
नृपेष्वमात्येषु च सर्वसम्पदः॥ १२॥ (किराता०)

मदसिक्तमुखैर्मृगाधिपः करिभिर्वर्तयते स्वयं हतैः।
लघयन् खलु तेजसा जगन्न महानिच्छति भूतिमन्यतः॥ १३॥

किमपेक्ष्य फलं पयोधरान्ध्वननः प्रार्थयते मृगाधिपः।
प्रकृतिः खलु सा महीयसः सहते नान्यसमुन्नतिं यया॥

(शाकुन्तले)

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया
कण्ठस्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमपि स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः॥१५॥ (शाकु०)

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी
यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः॥१६॥ (शाकु०)

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः
सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्॥१७॥ (शाकु०)

१०—मदन = काम, विपाक = फल। दुष्कृत = पाप। क्षिति = पृथ्वी। ११—दारुण = दुःखप्रद। उपालम्भ = ताना मारना। १२—अमात्य = मन्त्री। १३—मृगाधिपः = सिंह, करिन् = हाथी, वर्तयते = गुजारा करता है। भूति = ऐश्वर्य। १४—पयोधर = मेघ, प्रकृति = स्वभाव, महीयस् = महापुरुष। १५—प्रतीप = विपरीत। अनुत्सेक = निरभिमान। १७—ऋजु = सीधा।

अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे,
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला।
तनयमचिरात्प्राचीवार्कं प्रसूय च पावनम्
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि ॥१८॥ (शाकु०)

अर्थो हि कन्या परकीय एव
तामद्य संप्रेष्य परिग्रहीतुः।
जातो ममायं विशदः प्रकामं
प्रत्यर्पितन्यास इवान्तरात्मा ॥१९॥ (शाकु०)

(कुमारसम्भवे)

विधिप्रयुक्तां परिगृह्य सत्क्रियां परिश्रमं नाम विनीय च क्षणम्।
उमां स पश्यन्नृजुनैव चक्षुषा प्रचक्रमे वक्तुमनुज्झितक्रमः ॥२०॥
अपि क्रियार्थं सुलभं समित्कुशं जलान्यपि स्नानविधिक्षमाणि ते।
अपि स्वशक्त्या तपसि प्रवर्तसे शरीरमाद्यं खलु धर्मसाधनम् ॥२१॥
किमित्यपास्याभरणानि यौवने, धृतं त्वया वार्धकशोभि वल्कलम्।
वद प्रदोषे स्फुटचन्द्रतारका, विभावरी यद्यरुणाय कल्पते ॥२२॥
वपुर्विरूपाक्षमलक्ष्यजन्मता, दिगम्बरत्वेन निवेदितं वसु।
वरेषु यद् बालमृगाक्षि मृग्यते, तदस्ति किं व्यस्तमपि त्रिलोचने ॥२३॥
द्वयं गतं सम्प्रति शोचनीयतां, समागमप्रार्थनया कपालिनः।
कला च सा कान्तिमती कलावतस्त्वमस्य लोकस्य च नेत्रकौमुदी ॥२४॥
उवाच चैनं परमार्थतो हरं न वेत्सि नूनं यत एवमात्थ माम्।
अलोकसामान्यमचिन्त्यहेतुकं द्विषन्ति मन्दाश्चरितं महात्मनाम् ॥२५॥
निवार्यतामालि किमप्ययं बटुः पुनर्विवक्षुः स्फुरितोत्तराधरः।
न केवलं यो महतोऽपभाषते शृणोति तस्मादपि यः स पापभाक् ॥२६॥
इतो गमिष्याम्यथवेति वादिनी चचाल बाला स्तनभिन्नवल्कला।
स्वरूपमास्थाय च तां कृतस्मितः समाललम्बे वृषराजकेतनः ॥२७॥
तं वीक्ष्य वेपथुमती सरसाङ्गयष्टिर्निक्षेपणाय पदमुद्धृतमुद्वहन्ती।
मार्गाचलव्यतिकराकुलितेव सिन्धुः शैलाधिराजतनया न ययौ न तस्थौ ॥२८॥

१६—आभरण = जेवर, वल्कल = छाल, विभावरी = रात्रि, प्रदोष = निशा का आरम्भ-काल। २०—वसु = धन, व्यस्त = अलग-अलग, त्रिलोचन = शिवजी। २१—कपालिन् = शिवजी, कौमुदी = प्रकाश। २३—आली = सखी, बटु = ब्रह्मचारी। २४—वृषराजकेतन = शिवजी। २६—अह्नाय = शीघ्र ही। २७—रंहस् = वेग।

अयमग्रभृत्यवनताङ्गि ! तवास्मि दास क्रीतस्तपोभिरिति वादिनि चन्द्रमौलौ ।
अह्नाय सा नियमज क्लममुत्ससर्ज क्लेश. फलेन हि पुनर्नवता विधत्ते ॥२६॥

(रघुवंशे)

अलं महीपाल तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा स्यात् ।
न पादपोन्मूलनशक्तिरंहः शिलोच्चये मूर्छति मारुतस्य ॥३०॥

एकातपत्रं जगतः प्रभुत्वं नवं वयः कान्तमिदं वपुश्च ।
अल्पस्य हेतोर्बहु हातुमिच्छन् विचारमूढः प्रतिभासि मे त्वम् ॥३१॥

रघुमेव निवृत्तयौवनं तममन्यन्त नवेश्वरं प्रजाः ।
स हि तस्य न केवलां श्रियं प्रतिपेदे सकलान् गुणानपि ॥३२॥

वपुषा करणोज्झितेन सा निपतन्ती पतिमप्यपातयत् ।
ननु तैलनिषेकबिन्दुना सह दीपार्चिरुपैति मेदिनीम् ॥३३॥

विललाप स बाष्पगद्गदं सहजामप्यपहाय धीरताम् ।
अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु ॥३४॥

स्रगियं यदि जीवितापहा हृदये किं निहिता न हन्ति माम् ।
विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया ॥३५॥

कुसुमान्यपि गात्रसङ्गमात्प्रभवन्त्यायुरपोहितुं यदि ।
न भविष्यति हन्त साधनं किमिवान्यत्प्रहरिष्यतो विधेः ॥३६॥

अथवा मम भाग्यविप्लवादशनिः कल्पित एष वेधसा ।
यदनेन तरुर्न पातितः क्षपिता तद्विटपाश्रिता लता ॥३७॥

गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ ।
करुणाविमुखेन मृत्युना हरता त्वां वद किं न मे हृतम् ॥३८॥

(नैषधे)

मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी ।
गतिस्तयोरेष जनस्तमर्दयन्नहो विधे त्वां करुणा रुणद्धि न ॥ ३९ ॥

पदे पदे सन्ति भटा रणोद्भटा न तेषु हिंसारस एष पूर्यते ।
धिगीदृशं ते नृपते कुविक्रमं कृपाश्रये यः कृपणे पतत्रिणि ॥ ४० ॥

इत्थममुं विलपन्तममुञ्चद्दीनदयालुतयावनिपालः ।
रूपमदर्शि धृतोऽसि यदर्थं गच्छ यथेच्छमथेत्यभिधाय ॥ ४१ ॥

३०—मेदिनी = पृथिवी । ३६—अयस् = लोहा । ३२—स्रक् = माला । ३४—अशनि = वज्र । ३६—वरटा = हंसी । ३७—पतत्रिन्—पक्षी । ३८—अवनिपाल = राजा (नल) । ३९—दिदृक्षा = देखने की इच्छा ।

सर्वोपमाद्रव्यसमुच्चयेन यथाप्रदेशं विनिवेशितेन ।
सा निर्मिता विश्वसृजा प्रयत्नादेकस्थसौन्दर्यदिदृक्षयेव ॥ ४२ ॥

नीतिसम्बन्धी रोचक श्लोक*

कनकभूषणसंग्रहणोचितो यदि मणिस्त्रपुणि प्रणिधीयते ।
न स विरौति न चापि स शोभते भवति योजयितुर्वचनीयता ॥ (१६५४)
शशिदिवाकरयोर्ग्रहपीडनं गजभुजङ्गमयोरपि बन्धनम् ।
मतिमता च निरीक्ष्य दरिद्रता विधिरहो बलवानिति मे मतिः ॥ (१६५१)
कुमुदवनमपश्रि श्रीमदम्भोजखण्डं
त्यजति मुदमुलूकः प्रीतिमांश्चक्रवाकः ॥
उदयमहिमरश्मिर्याति शीतांशुरस्तं
हतविधिनिहतानां हा विचित्रो विपाकः ॥३॥ (१६५४)
मातेव रक्षति पितेव हिते नियुङ्क्ते
कान्तेव चाभिरमयत्यपनीय खेदम् ।
कीर्तिं च दिक्षु विमलां वितनोति लक्ष्मीं
किं किं न साधयति कल्पलतेव विद्या ॥ ४ ॥ (१६४०)
न चौरहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि ।
व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम् ॥ ५ ॥ (१६५४)
तुल्यान्वयेत्यनुगुणेति गुणोन्नतेति दुःखे सुखे च सुचिरं सहवासिनीति ।
जानामि केवलमहं जनवादभीत्या सीते ! त्यजामि भवतीं न तु भावदोषात् ॥६॥
घृष्टं घृष्टं पुनरपि पुनश्चन्दनं चारुगन्धं
छिन्नं छिन्नं पुनरपि पुनः स्वादु चैवेक्षुकाण्डम् ।
दग्धं दग्धं पुनरपि पुनः काञ्चनं कान्तवर्णं,
प्राणान्तेऽपि प्रकृतिविकृतिर्जायते नोत्तमानाम् ॥ ७ ॥
यावत्स्वस्थमिदं शरीरमरुजं यावज्जरा दूरतो,
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो नायुषः ।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्
सन्दीप्ते भवने तु कूपखननं प्रत्युद्यमः कीदृशः ॥ ८ ॥
सारङ्गाः सुहृदो गृहं गिरिगुहा शान्तिः प्रिया गेहिनी,
वृत्तिर्वन्यलताफलैर्निवसनं श्रेष्ठं तरूणां त्वचः ।
तद्ध्यानामृतपूरमग्नमनसां येषामियं निर्वृति-
स्तेषामिन्दुकलावतंसयमिनां मोक्षेऽपि नो नः स्पृहा ॥ ९ ॥

---

*कोष्ठकों के भीतर (१६५४ आदि) अङ्कों से हाई स्कूल परीक्षा के वर्षों का संकेत है ।

लक्ष्मि क्षमस्व वचनीयमिदं यदुक्तमन्धीभवन्ति पुरुषास्त्वदुपासनेन ।
नो चेत्कथं कमलपत्रविशालनेत्रो नारायणः स्वपिति पन्नगभोगतल्पे ॥ (१६५४)

मित्रं प्रीतिरसायनं नयनयोरानन्दनं चेतसः
पात्रं यत् सुखदुःखयोः सह भवेन्मित्रं हि तद्दुर्लभम् ।
ये चान्ये सुहृदः समृद्धिसमये द्रव्याभिलाषाकुला-
स्ते सर्वत्र मिलन्ति तत्त्वनिकषग्रावा तु तेषां विपत् ॥११॥ (१६५२)

महाराज श्रीमन् ! जगति यशसा ते धवलिते
पयः पारावारं परमपुरुषोऽयं मृगयते
कपर्दी कैलासं करिवरमभौमं कुलिशभृत्
कलानाथं राहुः कमलभवनो हंसमधुना ॥ १२ ॥ (१६५२)

दूरादुच्छ्रितपाणिरार्द्रनयनः प्रोत्सारितार्धासनो
गाढालिङ्गनतत्परः प्रियकथाप्रश्नेषु दत्तादरः ।
अन्तर्भूतविषो बहिर्मधुमयश्चातीव मायापटुः
को नामायमपूर्वनाटकविधिर्यः शिक्षितो दुर्जनैः ॥१३॥ (१६५३)

प्राक् पादयोः पतति खादति पृष्ठमांसं
कर्णे कलं किमपि रौति शनैर्विचित्रम् ।
छिद्रं निरूप्य सहसा प्रविशत्यशङ्कः
सर्वं खलस्य चरितं मशकः करोति ॥१४॥ (१६५३)

कस्यादेशात् क्षपयति तमः सप्तसप्तिः प्रजानां
छायाहेतोः पथि विटपिनामञ्जलिः केन बद्धः ।
अभ्यर्थ्यन्ते जललवमुचः केन वा वृष्टिहेतोः
जात्यैवैते परहितविधौ साधवो बद्धकक्ष्याः ॥१५॥

वयमिह परितुष्टा वल्कलैस्त्वं च लक्ष्म्या
सम इह परितोषो निर्विशेषो विशेषः ।
स तु भवति दरिद्रो यस्य तृष्णा विशाला
मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः ॥१६॥

उचितमनुचितं वा कुर्वता कार्यजातं
परिणतिरवधार्या यत्नतः पण्डितेन ।
अतिरभसकृतानां कर्मणामाविपत्ते-
र्भवति हृदयदाही शल्यतुल्यो विपाकः ॥१७॥ (१६५४)

आश्वास्य पर्वतकुलं तपनोष्णतप्त-
मुद्दामदावविधुराणि च काननानि ।
नानानदीनदशतानि च पूरयित्वा
रिक्तोऽसि यज्जलद सैव तवोत्तमश्रीः ॥१८॥ (१६५०)

स हि गगनविहारी कल्मषध्वंसकारी दशशतकरधारी ज्योतिषां मध्यचारी ।
विधुरपि विधियोगाद् ग्रस्यते राहुणासौ लिखितमपि ललाटे प्रोज्झितु कः समर्थः ॥१६॥

सत्यं न मे विभवनाशकृतास्ति चिन्ता भाग्यक्रमेण हि धनानि भवन्ति यान्ति ।
एतत्तु मां दहति नष्टधनाश्रयस्य यत्सौहृदादपि जनाः शिथिलीभवन्ति ॥२०॥

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीर्दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या यत्ने कृते यदि न सिद्ध्यति कोऽत्र दोषः ॥२१॥

तानीन्द्रियाण्यविकलानि तदेव नाम सा बुद्धिरप्रतिहता वचनं तदेव ।
अर्थोष्मणा विरहितः पुरुषः स एव अन्यः क्षणेन भवतीति विचित्रमेतत् ॥२२॥

गुणा गुणज्ञेषु गुणा भवन्ति ते निर्गुणं प्राप्य भवन्ति दोषाः ।
आस्वाद्यतोयाः प्रभवन्ति नद्यः समुद्रमासाद्य भवन्त्यपेयाः ॥२३॥ (१९५२)

को वीरस्य मनस्विनः स्वविषयः को वा विदेशस्तथा
यं देशं श्रयते तमेव कुरुते बाहुप्रतापार्जितम् ।
यद्दंष्ट्रानखलाङ्गुलप्रहरणैः सिंहो वनं गाहते
तस्मिन्नेव हतद्विपेन्द्ररुधिरैस्तृष्णां छिनत्त्यात्मनः ॥२४॥

कल्याणानां त्वमसि महसां भाजनं विश्वमूर्ते,
धुर्यां लक्ष्मीमथ मयि भृशं धेहि देव प्रसीद ।
यद्यत्पापं प्रतिजहि जगन्नाथ नम्रस्य तन्मे,
भद्रं भद्रं वितर भगवन्भूयसे मङ्गलाय ॥२५॥

घर्मार्तं न तथा सुशीतलजलैः स्नानं न मुक्तावली
न श्रीखण्डविलेपनं सुखयति प्रत्यङ्गमप्यर्पितम् ।
प्रीत्यै सज्जनभाषितं प्रभवति प्रायो यथा चेतसः
सद्युक्त्या च पुरस्कृतं सुकृतिनामाकृष्टिमन्त्रोपमम् ॥२६॥

सरल हिन्दी में व्याख्या कीजिए —

नाद्रव्ये निहिता काचित् क्रिया फलवती भवेत् ।
न व्यापारशतेनापि शुकवत् पाठ्यते बकः ॥ १ ॥ (१९५३)

तृणानि भूमिरुदकं वाक् चतुर्थी च सूनृता ।
सतामेतानि गेहेषु नोच्छिद्यन्ते कदाचन ॥ २ ॥ (१९५२)

जातमात्रं न यः शत्रुं व्याधिं च प्रशमं नयेत् ।
अतिपुष्टाङ्गयुक्तोऽपि स पश्चात्तेन हन्यते ॥ ३ ॥ (१९५२)

सर्वं परवशं दुःखं सर्वमात्मवशं सुखम् ।
एतद् विद्यात् समासेन लक्षणं सुखदुःखयोः ॥ ४ (१९५१)

नीतो न केनापि न दृष्टपूर्वो न श्रूयते हेममयः कुरङ्गः।
तथापि तृष्णा रघुनन्दनस्य विनाशकाले विपरीतबुद्धिः ॥५॥

आरम्भगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात्।
दिनस्य पूर्वार्धपरार्धभिन्ना छायेव मैत्री खल-सज्जनानाम् ॥ ६ ॥

असौ नलिनीवनवल्लभः कुमुदिनीकुलकेलिकलारसः।
विधिवशेन विदेशमुपागतः कुटजपुष्परसं बहु मन्यते ॥ ७ ॥

विषौ विरुद्धे न पयः पयोनिधौ सुधीघसिन्धौ न सुधा सुधाकरे।
न वाञ्छितं सिद्ध्यति कल्पपादपे न हेम हेमप्रभवे गिरावपि ॥८॥

आयाति याति पुनरेव जलं प्रयाति
पद्माङ्कुराणि विचिनोति धुनोति पक्षौ।
उन्मत्तवद् भ्रमति कूजति मन्दमन्दं
कान्तावियोगविधुरो निशि चक्रवाकः ॥ ९ ॥

जनयति हृदि खेदं मङ्गलं न प्रसूते,
परिहरति यशांसि ग्लानिमाविष्करोति।
उपकृतिरहितानां सर्वभोगच्युतानां,
कृपणकरगतानां सम्पदां दुर्विपाकः ॥ १० ॥

पात्रं पवित्रयति नैव गुणान् क्षिणोति,
स्नेहं न संहरति नापि मलं प्रसूते।
दोषावसानरुचिरश्चलतां न धत्ते,
सत्सङ्गमः सुकृतसद्मनि कोऽपि दीपः ॥ ११ ॥

आदित्यस्य गतागतैरहरहः संक्षीयते जीवनं
व्यापारैर्बहुकार्यभारगुरुभिः कालो न विज्ञायते।
दृष्ट्वा जन्मजराविपत्तिमरणं त्रासश्च नोत्पद्यते
पीत्वा मोहमयीं प्रमादमदिरामुन्मत्तभूतं जगत् ॥ ११ ॥ (भर्तृहरिः)

(ग) आगरा विश्वविद्यालय के एम. ए. के प्रश्नपत्रों में से

अनुवादार्थ संगृहीत गद्य-पद्यांश

(१)

यस्मिंश्च राजनि गिरीणां विपक्षता, प्रत्ययानां परत्वं, दर्पणानामभिमुखावस्थानम्, शूलपाणिमूर्तिमानां दुर्गाश्लेषः, जलधराणां चापग्रहणम्, पद्मानां जलदिव्यं, वंशानां शिलीमुखक्षतिः, ग्रहाणां तुलारोहणं, अगस्त्योदयः विषविशुद्धिः, कुमार-

स्तुतिषु तारकोद्धरणं, शशिनो ज्येष्ठातिक्रमः, करेणा दानविच्छित्तिः, अचक्रीडासु शून्यगृहदर्शनं पृथिव्यामासीत्। (१६५०)

(२)

ततः स राजकुमारो दिवसकरोदयमिव उल्लसत्पद्माकरकमलामोदं, नाटकमिव प्रकटपताकाङ्कशोभितम्, ईशानशाहुवनमिव महाभोगिमण्डलसहस्राधिष्ठितप्रकोष्ठं, महाभारतमिव अनन्तगीताकर्णनानन्दितनरं, प्राग्वेशमिव नानासवपात्रसंकुलं, प्रभातसमयमिव पूर्वदिग्भागरागानुमेयमित्रोदयं, वर्षपर्वतसमूहमिव अन्तः स्थिता-परिमाणशृङ्गिहेमकूटं, स्फीतमपि अमत्तमलोकं राजकुलं विवेश। (१६५०)

(३)

अहो जगति जन्तूनामसमर्थितोपनतान्यापतन्ति वृत्तान्तान्तराणि। तथाहि-मया मृगयाया यदृच्छया निरर्थकमनुबध्नता तुरङ्गमुखमिथुनमयमतिमनोहरो मानवाना-मगम्यो दिव्यजनसंचरणोचितः प्रदेशो वीक्षितः। अत्र च सलिलमन्वेषमाणेन हृदयहारि सिद्धजनोपस्पृष्टजल सरो दृष्टम्। तत्तीरलेखाविश्रान्तेन चामानुषं गीत-माकर्णितम्। तच्चानुसरता मानुषदुर्लभदर्शना दिव्यकन्यकेयमालोकिता। न हि मे संशीतिरस्या दिव्यता प्रति। (१६५१)

(४)

तस्यां चैवंविधायां नगर्यां नल-नहुष-ययाति-धुन्धुमार-भारत-भगीरथ-दशरथ-प्रतिमः, भुजबलार्जितभूमण्डलः, फलितशक्तित्रयः, मतिमान्, उत्साहसम्पन्नः, नीति-शास्त्राखिन्नबुद्धिः, अधीतधर्मशास्त्रः, तृतीय इव तेजसा कान्त्या च सूर्याचन्द्रमसोः, अनेकसततन्तुपूतमूर्तिः, उपशमितसकलजगदुपप्लवः विहाय कमलवनान्यवगणय्य नारायणवक्षःस्थलवसतिमुखमुत्फुल्लारविन्दहस्तया शूरसमागमव्यसनिन्या निर्व्याज-मालिङ्गितो लक्ष्म्या, महामुनिजनसंसेवितस्य मधुसूदनचरण इव सुरसरित्प्रवाहस्य प्रभवः सत्यस्य, शिशिरस्यापि रिपुजनसन्तापकारिणः स्थिरस्यापि नित्यं भ्रमतो निर्मलस्यापि मलिनीकृतारातिवनितामुखकमलद्युतेरतिधवलस्यापि सर्वजनरागकारिणः सुधासूतेरिव सागर उद्भवो यशसः पाताल इवाश्रितो निजपक्षक्षतिभीतैः क्षितिभृत्कुटिलैः, ग्रहगण इव बुधानुगतः, मकरध्वज इवोरुसत्त्वविग्रहः, दशरथ इव सुमित्रोपेतः, पशु-पतिरिव महासेनानुयातः, भुजगराज इव क्षमाभरगुरुः, नर्मदाप्रवाह इव महावंश-प्रभवः, अवतार इव धर्मस्य, प्रतिनिधिरिव पुरुषोत्तमस्य, परिहृतप्रजापीडो राजा तारापीडोऽभूत्। (१६५३)

(५)

आसीच्चास्य मनसि—सरभसगरिवर्तनवलितवासुकिभ्रमितमन्दरेण मथ्नता जलधि-जलमिदमशवरत्नमनभ्युद्धरता किं नाम रत्नमुद्धृतं सुरासुरलोकेन। अनारोहता च-

मेरुशिलातलविशालमस्य वृक्षमारुखडलेन किमासादितं त्रैलोक्यराज्यफलम्। उच्चैःश्रवसा विस्मृतहृदयो वञ्चितःखलु जलनिधिना शतमखः। (१६५४)

(६)

तस्य च राज्ञो निखिलशास्त्रकलावगाहगभीरबुद्धिराशैशवादुपारूढनिर्भरप्रेमरसो नीतिशास्त्रप्रयोगकुशलो भुवनराज्यभारनौकर्णधारो महत्स्वपि कार्यसंकटेष्वविषण्णधीर्धाम धैर्यस्य स्थानं स्थितेः, सेतुः सत्यस्य गुरुर्गुणानामाचार्य आचाराणां धाता धर्मस्य शेषाहिरिव महीभारधारणक्षम सलिलनिधिरिव महासत्त्वो जरासन्ध इव घटितसंधिविग्रहस्त्र्यम्बक इव प्रसाधितदुर्गो युधिष्ठिर इव धर्मप्रभवः सकलवेदवेदाङ्गविद्शेषराज्यमङ्गलैकसारो बृहस्पतिरिव सुनासीरस्य कविरिव वृषपर्वणो वसिष्ठ इव दशरथस्य विश्वामित्र इव रामस्य धौम्य इवाजातशत्रोर्दमनक इव नलस्य सर्वकार्येष्वाहितमतिरमात्यो ब्राह्मणः शुकनासो नामासीत्। (१६५५)

(७)

यस्यामुत्तुङ्गसौधोत्सङ्गसङ्गीतसङ्गिनीनामङ्गनानामतिरमणीयेन गीतरवेणाकृष्यमाणाधोमुखरथःरङ्गः पुरः पर्यस्तरथपताकापटः कृतमहाकालप्रणाम इव प्रतिदिनं लक्ष्यते गच्छन्दिवसकरः। यस्यां च सन्ध्यारागारुणा इव सिन्दूरमणिकुट्टिमेषु प्रारब्धनीलकमलिनीपरिमण्डला इव मरकतवेदिकासु गगनतलं प्रसृता इव वैदूर्यमणिभूमिषु तिमिरपटलविघटनोद्यता इव कृष्णागुरुधूममण्डलेषु अभिभूततारकापङ्क्तय इव मुक्तामालस्वेषु विकचकमलचुम्बिन इव नितम्बिनीमुखेषु प्रभातचन्द्रिकामध्यपतिता इव स्फटिकभित्तिप्रभासु गगनसिन्धुतरङ्गावलम्बिन इव सितध्वजांशुकेषु पल्लविता इव सूर्यकान्तोपलेषु राहुमुखकुहरप्रविष्टा इवेन्द्रनीलवातायनविवरेषु विराजन्ते रविगभस्तयः। (१६५६)

(८)

कृष्णबालचरितमिव तटकदम्बशाखाधिरूढहरिकृतजलप्रपातक्रीडम्, मदनध्वजमिव मकराधिष्ठितम्, दिव्यमिवानिमिषलोचनरमणीयम्, अरण्यमिव विजृम्भमाणपुण्डरीकम् उरगकुलमिवानन्तशतपत्रपत्राच्छादितम्, कम्बलमिव मधुकरकुलोपगीयमानकुवलयापीडम्, कद्रूस्तनयुगलमिव नागसहस्रपीतपयोधरद्वयम्, मलयमिव चन्दनशिशिरवनम्, अशक्यसाधनामवाद्यतान्तम्, अतिमनोहरमाह्लादनं दृष्टेरच्छोदं नाम सरो दृष्टवान्। (१६५६)

(९)

म्लानस्य जीवकुसुमस्य विकाशनानि
सन्तर्पणानि सकलेन्द्रियमोहनानि।
एतानि ते सुवचनानि सरोरुहाक्षि
कर्णामृतानि मनसश्च रसायनानि। (१६५७)

(१०)

एको रसः करुण एव निमित्तभेदाद्
भिन्नः पृथक्पृथगिवाश्रयते विवर्तान्।
आवर्तबुद्बुदतरङ्गमयान् विकारान्
अम्भो यथा सलिलमेव तु तत्समग्रम्। (१६५०)

(११)

न सुवर्णमयी तनुः परं ननु किं वागपि तावकी तथा।
न परं पथि पक्षपातिताऽनवलम्बे किमु मादृशेऽपि सा। (१६५१)

(१२)

प्रतीपभूपैरपि किं ततो भिया विरुद्धधर्मैरपि भेत्तृतोज्झिता।
अमित्रजिन्मित्रजिदोजसा स यद् विचारदृक् चारदृगप्यवर्तत। (१६५१)

(१३)

पतत्पतङ्गप्रतिमस्तपोनिधिः पुरोऽस्य यावन्न भुवि व्यलीयत।
गिरेस्तडित्वानिव तावदुच्चकैर्जवेन पीठादुदतिष्ठदच्युतः। (१६५१)

(१४)

विघुलितमतिपूरैर्बाष्पमानन्दशोक-
प्रभवमवसृजन्ती तृष्णयोत्तानदीर्घा।
स्नपयति हृदयेशं स्नेहनिष्यन्दिनी ते
धवलबहुलमुग्धा दुग्धकुल्येव दृष्टिः। (१६५१)

(१५)

हृतसारमिवेन्दुमण्डलं दमयन्तीवदनाय वेधसा।
कृतमध्यबिलं विलोक्यते धृतगम्भीरखनीखनीलिम। (१६५२)

(१६)

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्। (१६५३)

(१७)

युगान्तकालप्रतिसंहृतात्मनो जगन्ति यस्यां सविकासमासत।
तनौ ममुस्तत्र न कैटभद्विषस्तपोधनाभ्यागमसंभवा मुदः। (१६५३)

(१८)

इदं किलाव्याजमनोहरं वपुस्तपःक्षमं साधयितुं य इच्छति ।
ध्रुवं स नीलोत्पलपत्रधारया शमीलतां छेत्तुमृषिर्व्यवस्यति । (१६५४)

(१९)

तव कुसुमशरत्वं शीतरश्मित्वमिन्दो-
र्द्वयमिदमयथार्थं दृश्यते मद्विधेषु ।
विसृजति हिमगर्भैरग्निमिन्दुर्मयूखै-
स्त्वमपि कुसुमबाणान् वज्रसारीकरोषि । (१६५४)

(२०)

प्रयातुमस्माकमियं कियत्पदं धरा तदम्भोधिरपि स्थलायताम् ।
इतीव वाहैर्निजवेगदर्पितैः पयोधिरोधक्षममुद्धतं रजः । (१६५४)

(२१)

हरत्यघं संप्रति हेतुरेष्यतः शुभस्य पूर्वाचरितैः कृतं शुभैः ।
शरीरभाजां भवदीयदर्शनं व्यनक्ति कालत्रितयेऽपि योग्यताम् । (१६५५)

(२२)

वृद्धास्ते न विचारणीयचरितास्तिष्ठन्तु किं वर्ण्यते
सुन्दस्त्रीदमनेऽप्यखण्डयशसो लोके महान्तो हि ते ।
यानि त्रीण्यकुतोमुखान्यपि पदान्यासन् खरायोधने
यद्वा कौशलमिन्द्रसूनुनिधने तत्राप्यभिज्ञो जनः । (१६५५)

(२३)

किमपि किमपि मन्दं मन्दमासत्तियोगात्
अविरलितकपोलं जल्पतोरक्रमेण ।
अशिथिलितपरिरम्भव्यापृतैकैकदोष्णो-
रविदितगतयामा रात्रिरेव व्यरंसीत् । (१६५६)

(२४)

सहजचापलदोषसमुद्धत श्चलितदुर्बलपक्षपरिग्रहः ।
तव दुरासदवीर्यविभावसौ शलभतां लभतामसुहृद्गणः । (१६५५)

(२५)

पुरीमवस्कन्द लुनीहि नन्दनं मुषाण रत्नानि हरामराङ्गनाः ।
विगृह्य चक्रे नमुचिद्विषा वली य इत्थमस्वास्थ्यमहर्दिवं दिवः । (१६५०, १६५२)

(२६)

तस्मिन्नद्रौ कतिचिदबलाविप्रयुक्तः स कामी
नीत्वा मासान्कनकवलयभ्रंशरिक्तप्रकोष्ठः ।
आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुं
वप्रक्रीडापरिणतगजप्रेक्षणीयं ददर्श । (१६५०)

(२७)

धूमज्योति सलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाचेतनेषु । (१६५२)

(२८)

आलोके ते निपतति पुरा सा बलिव्याकुला वा
मत्सादृश्यं विरहतनु वा भावगम्यं लिखन्ती ।
पृच्छन्ती वा मधुरवचना सारिका पञ्जरस्था
कच्चिद्भर्तुः स्मरसि रसिके त्वं हि तस्य प्रियेति । (१६५४)

(२९)

नन्वात्मानं बहु विगणयन्नात्मनैवावलम्बे
तत्कल्याणि त्वमपि नितरां मा गमः कातरत्वम् ।
कस्यैकान्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण । (१६५२)

(३०)

सन्तप्तानां त्वमसि शरणं तत्पयोद प्रियायाः
संदेशं मे हर धनपतिक्रोधविश्लेषितस्य ।
गन्तव्या ते वसतिरलका नाम यक्षेश्वराणां
बाह्योद्यानस्थितहरशिरश्चन्द्रिकाधौतहर्म्या । (१६५७)

(३१)

इत्याख्याते पवनतनयं मैथिलीवोन्मुखी सा
त्वामुत्कण्ठोच्छ्वसितहृदया वीक्ष्य संभाव्य चैव ।
श्रोष्यत्यस्मात्परमवहिता सौम्य सीमन्तिनीनां
कान्तोदन्तः सुहृदुपगतः संगमात्किञ्चिदूनः । (१६५८)

(३२)

श्यामास्वङ्गं चकितहरिणीप्रेक्षणे दृष्टिपातं
वक्त्रच्छाया शशिनि शिखिना बर्हभारेषु केशान्।
उत्पश्यामि प्रतनुषु नदीवीचिषु भ्रूविलासान्
हन्तैकस्थं क्वचिदपि न ते चण्डि सादृश्यमस्ति। (१६५०,१६६०)

(३३)

कच्चित्सौम्य व्यवसितमिदं बन्धुकृत्यं त्वया मे
प्रत्यादेशान्न खलु भवतो धीरतां कल्पयामि।
निःशब्दोऽपि प्रदिशसि जलं याचितश्चातकेभ्यः
प्रत्युक्तं हि प्रणयिषु सतामीप्सितार्थक्रियैव। (१६५१)

(३४)

एतत्कृत्वा प्रियमनुचितप्रार्थनावर्तिनो मे
सौहार्दाद्वा विधुर इति वा मय्यनुक्रोशबुद्ध्या।
इष्टान् देशाञ्जलद विचर प्रावृषा संभृतश्री-
र्मा भूदेवं क्षणमपि च ते विद्युता विप्रयोगः॥

वृत्त-परिचय*

समासयुक्तेषु वाक्येषु उपसर्गधातुषु च सन्धिर्नित्यः, अतः सन्धिस्तत्रावश्यमेव कर्तव्यः। समासादन्यत्र सन्धेर्वैकल्प्यं वर्तते। यत्र सन्धिना जटिलता, अर्थदुर्बोधत्वं जायेत तत्र सन्धिरुपेक्षणीयः। यदि कर्णकटुत्वं न भवेत्, उच्चारणसौकर्यं च स्यात्तदा सन्धिर्विधेयः।

निबन्धलेखने पठकैरवधेयं यत्, यद्विषयको निबन्धस्तद्विषयमुद्दिश्यैव निबन्ध आरम्भणीयः। तत्र (१) प्रतिज्ञा (२) हेतुः (३) निदर्शनम् (४) उपसंहारश्चेति चत्वारो मुख्यावयवाः।

ये विषया निबन्धे निवेशनीयास्ते खलु निबन्धस्य समारम्भणात् पूर्वमेव सम्यक् विचारणीयाः। एको हि भावः एकस्मिन् वाक्यपरिच्छेदे सन्निवेशनीयः। एवं त्रयश्चत्वारो वा वाक्यपरिच्छेदा निबन्धे कल्पनीयाः। द्वितीयवाक्यपरिच्छेदे विषयानुसारं यत्किञ्चिदपि वक्तव्यं भवति तत् सन्निवेशनीयम्। ततः स्वविषयोपपत्त्यर्थं प्रमाणत्वेन सुप्रसिद्धलेखकाना मतानि समुद्धरणीयानि। उपसंहारे च विहंगमदृष्ट्या स्वविषयपरिपोषणार्थम् ओजस्विभिर्भावपूर्णैः सहृदयाकर्षकैर्वाक्यैः स्वनिबन्धः समापनीयः। इति दिक्।

१—संस्कृतभाषाया वैशिष्ट्यं सौष्ठवं च

'सम्' पूर्वात् कृधातोर्निष्पन्नः शब्दः 'संस्कृतशब्दः'। संस्कृतभाषा देववाणी-भारती-विधेति पदैराख्यायते। प्रचलितासु विश्वभाषासु संस्कृतभाषैव प्राचीनतमेति सर्वसम्मतः पक्षः। संस्कृतभाषातः प्राकृत-सेमिटिकभाषाः निर्गताः, तासां जननी संस्कृतभाषैव। न केवलं तासामपितु अखिलभाषाणां जननी संस्कृतभाषैव। अस्या निखिला जगद्भाषाः प्रादुरभवन्निति सर्वेषां भाषातत्त्वविदां मतम्। अस्यामेव भाषायामाध्यात्मिकविषयेऽनेके ग्रन्थाः विरचिताः सन्ति। उपनिषत्सु दर्शनग्रन्थेषु च लोकोत्तरमाध्यात्मिकं ज्ञानतत्त्वं दरीदृश्यते। अस्यामेव संस्कृतभाषाया प्राचीनैराचार्यैः दर्शनशास्त्रेषु एकतः जीवब्रह्मणोः प्रकृतेश्च अतीव हृदयंगमं विवेचनं विहितम् अपरतश्च धर्मशास्त्र-नीतिशास्त्र-कामशास्त्र-राजतन्त्र-शिल्पकलादिविषयानधिकृत्य भारतीयाचार्यैः अतीव रोचकाश्चमत्कारकारकाश्च ग्रन्था विरचिताः। ललितसाहित्यविषयेऽपि रससिद्धैः कवीश्वरैः भास-कालिदास-भवभूति-माघप्रभृतिभिरक्षय्यो निधिः परिपूरितः।

संस्कृतभाषाया व्यावहारिकत्वमासीन्न वा। अत्रोच्यते। पाणिनेरष्टाध्याय्यां सूत्रद्वयं वर्तते। "दूराद्धूते च।८।२।८४, प्रत्यभिवादे शूद्रे।८।२।८३" इति सूत्राभ्यां प्लुतत्वविधानं संस्कृतभाषाया व्यावहारिकत्वं प्रमाणयति। भगवता यास्केनापि निरुक्ते "भाषिकेभ्यो धातुभ्यो नैगमाः कृतो भाष्यन्ते", "शवतिर्गतिकर्मा कम्बोजेषु भाष्यते" विकारमस्यार्येषु भाषन्ते शव इति। महाभाष्येऽपि "दातिर्लवनार्थे प्राच्येषु

दात्रमुदीच्येषु" एवमादिवचोभिः संस्कृतभाषाया भाषणव्यवहारगतत्वं ज्ञायते। भाषणव्यवहाराभावे तु प्राच्योदीच्यदेशभेदात्तत्तद्धातोपनतभेदस्य कथं सामञ्जस्य स्यात्।

संस्कृतभाषा किं जीवितभाषा अथवा मृतभाषेति प्रश्ने ब्रूमः। भगवता बुद्धदेवेन खैस्तशताब्द्याः ५०० वषप्राग्भवेन समादिष्ट यत्तदीया उपदेशा आदेशाश्च प्राकृतभाषायामेव प्रचारणीया न तु संस्कृतभाषायाम्। अत. सम्राजाऽशोकेन खैस्ततृतीयशताब्दया प्राग्भवेन ते उपदेशाः प्रस्तरखण्डेषु, ताम्रलेखेषु, कीर्तिस्तम्भेषु च अनेकप्राकृतभाषास्वेवोत्कीर्णा. विशेषरूपेण च मागधीभाषायाम्। एतावता इद मनुमातु सुकर यत् खैस्ततृतीयशताब्द्या. प्राक् संस्कृतभाषाया व्यावहारिकत्व मासीत्। यद्यपि बौद्धसैद्धान्तिका ग्रन्था तासु तासु प्राकृतभाषासु प्रकाशितास्तथापि शतश. सार्वजनिकताम्रलेखाः तदानीन्तनशासनीयलेखाश्च संस्कृतभाषायामेवाद्यापि समुपलभ्यन्ते। तथा च गणपाठेषु प्रयुक्तै. कडुपय-गुडुलु-नपाकु आलिगु-चटाकु-बहुस्क शिग्रु रुहोदप्रभृतिशब्दैरपि ज्ञायते यत् संस्कृतभाषा यदि तदानीं व्यवहृता नाभविष्यत्तर्हि सर्वसाधारणावबोधविषयीभूताना शब्दाना प्रयोगः संस्कृतभाषाया कथमभविष्यत्।

श्रीविद्वद्वरमैक्समूलरमहाभाग समुद्घोषयामास यच्छताब्दीपर्यन्त सुप्रतिष्ठितेऽपि आङ्गलसाम्राज्ये आङ्गलभाषाविदा समाजेऽपि संस्कृतभाषैव सर्वाधिकप्रचारा सर्वत्र भारतेऽवबुध्यमाना आभाष्यमाणा प्यासीत्। अद्यापि भारते बहूनि समाचारपत्राणि संस्कृतभाषायामेव प्रकाश्यन्ते। अमुद्रितग्रन्थानामद्यापि पाण्डुलिपिबद्धाना सख्या लक्षपरिमिता सख्यामतिक्रमते। शतशः विद्वासोऽद्यापि संस्कृतभाषयैव व्यवहरन्ति भाषणलेखनकर्मणि सुविदितमेव सर्वेषा नास्त्यत्र काचिदत्युक्तिः। वस्तुत. ग्रीक-लेटिन-ट्यूटानिक फ्रेञ्च जर्मन इङ्ग्लिशप्रभृतयः सर्वा अपि भाषा संस्कृत-(आर्य) भाषात एव प्रादुरभवन्निति भाषातत्त्वविदा मतम्। सम्प्रति अखिला अपि भारतीयभाषा द्राविडीभाषामन्तरा संस्कृतभाषात. एव लब्धप्रसवा इत्याकलयन्त्यालोचकाः। यदि संस्कृतभाषा व्यावहारिकी नाभविष्यत् तर्हि संस्कृतसाहित्य तद् भाषणादिचर्चापि नोपालप्स्यत। पर संस्कृतभाषणचर्चा बहुत्रोपलभ्यते। भगवता शङ्कराचार्येण यदा मण्डनमिश्रधाम्न' जिज्ञासाया प्रश्नः कृतस्तदा जलकुम्भवत्या कयाचिद्युवत्योत्तर निम्नाङ्कितेन पद्येन दत्तम्--

स्वत. प्रमाण परतः प्रमाण कीराङ्गना यत्र गिरो गिरन्ति।
द्वारस्थनीडान्तरसन्निरुद्धा जानीहि तन्मण्डनमिश्रधाम॥

इत्यादिप्रमाणैः स्फुट ध्वन्यते यत् पुरा संस्कृतभाषा लेखनभाषणादिव्यवहारे प्रयुक्ता आसीदेव नात्र सन्देहावसर.।

संस्कृतभाषायामितिवृत्तवैरल्यम्--केचन पाश्चात्यविद्वास अनेके भारतीया अपि वदन्ति यत् संस्कृतसाहित्ये इतिहासस्य अभावः वर्तते। ते खलु घोषयन्ति यत् पुरा

भारतीया इतिहासः नामेत्यपि नाजानन । तत्र ब्रूमः । यदि भारतीया इतिहासं नाजानन तदा संस्कृतसाहित्ये पदे पदे इतिहासशब्दस्य प्रयोगः किं प्रयोजनकः । छान्दोग्योपनिषदि नारदसनत्कुमारसंवादे—

"ऋग्वेदं भगवो अध्येमि यजुर्वेदं सामवेदं आथर्वणमितिहासपुराणं पञ्चमं वेदानां वेदमिति ।"

भगवता यास्काचार्येणापि निरुक्ते "इत्यैतिहासिकाः" इत्यैतिहासिकपक्षप्रसङ्ग उल्लिखितः । मीमांसायां कविराजेन राजशेखरेण इतिहासनामोल्लेखः कृतः—"इतिहासवेदधनुर्वेदौ गान्धर्वायुर्वेदावपि चोपवेदाः" इति । अथ किमर्थक उल्लेखोऽयम् ?

खैस्तद्वादशशतके महाकविकल्हणेन राजतरङ्गिणी प्रणीता या क्रमबद्धेतिहासस्य साक्षीभूता वर्तते । एतत्तु महदाश्चर्यजनकं यत् वैदेशिका विद्वांसः एकत्र कथयन्ति यत् भारतीयानामितिहासज्ञानमेव नासीत् अपरत्र ते वेदेष्वपीतिहासं मार्गयन्ति । वेदेषु चानित्येतिहासलेशोऽपि नास्ति, अर्थवादमात्रमेव तत्रेतिहासपदार्थः ।

अस्माकं तु निश्चितं मतं यत् संस्कृतमेव विश्वभाषापदमर्हति । जगति या अपि संस्कृत-प्राकृत-लेटिन-ग्रीक-इंग्लिशाद्या भाषाः तत्र तत्र देशेषु प्रचलिता दृश्यन्ते तासु संस्कृतमेव सौष्ठवे, सारल्ये, माधुर्ये च श्रेष्ठा । कस्यामपि अन्यस्यां भाषायां न तादृशं सर्वाङ्गपूर्णं व्याकरणम् यादृशं संस्कृतभाषायाम्, न चापि तादृशी वैज्ञानिकी लिपिः यादृशी संस्कृतभाषायाम् । संस्कृतभाषाया इयं विशेषता यत् तस्या यल्लिख्यते तदेव पठ्यते, अन्यासु भाषासु न तथा । अपि च यावन्तः कण्ठताल्वादिध्वनिविशेषाः संस्कृतभाषाया सम्भवन्ति तावन्तः सर्वे नान्यभाषासु । तथा हि फ्रेंचभाषायां टकार-डकारौ न वर्तेते, आङ्ग्लभाषायां तकारो नास्ति । आङ्ग्ललिप्यां च चकार-घकार-टकार-थकार-सकार-दकार-पकाराश्च न तादृशीं स्वतन्त्रसत्तां लभन्ते यादृशीं संस्कृतभाषायाम् । संस्कृतभाषाया यादृशः शब्दकोशः न तादृशः अन्यभाषासु । आंग्लभाषाया सूर्यवाचकः एकः शब्दः (सन) चन्द्रवाचकश्चापि एकः (मून), परन्तु संस्कृतभाषायामेकस्य वस्तुनः अनेकानि नामानि विद्यन्ते ।

सेयं दिव्या, भव्या, हृद्या चामरवाणी सांस्कृतिकैक्यप्रतिष्ठानाय, सद्भावनाप्रसाराय शान्तिकरत्वदम्भारोपणाय, विश्वबन्धुत्वसंस्थापनाय च सर्वथा विश्वभाषापदवीमर्हति ।

२—विद्याधनं सर्वधनप्रधानम्

अथवा

विद्ययाऽमृतमश्नुते

परमेश्वरेण जगति समुत्पादितेषु सर्वद्रव्येषु विद्यैव सर्वश्रेष्ठं द्रव्यम् । विद्याद्रव्येण विहीनः यो मानवोऽस्ति सः अगम्यः मूर्खः ग्रामीणः कथ्यते । ज्ञानेन विना यथा

पशुः धर्माधर्मयोर्विचारं कर्तुं न शक्नोति तथैव मानवोऽपि विद्यया विहीनः पाप-पुण्ययोः कर्त्तव्याकर्त्तव्ययोर्विचारं कर्तुं न पारयति। विद्याविहीनो मानवोऽन्ध एव निगद्यते। उक्तञ्च—

इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते॥ (आचार्यप्रवरः दण्डी)

अत्र शब्दाह्वयं ज्योतिः विद्यैव। यदि नामेयं विद्याज्योतिरस्मिन् जगति न भवेत् तर्हि जगदिदमखिलमपि अन्धकारावृतं समस्त्येत। विद्ययैवास्य जगतः यावज्ज्ञेयं तत्त्वं तावदखिलं सम्प्रकाश्यते। किं नाम तद्वस्तु यद्विद्यया न साध्यते। यत्कार्यमन्येन द्रविणादिनापि न साध्यते तत्कार्यं विद्याद्रविणेनानायासेन साध्यते। अत एव विद्याधनस्य सर्वेतरधनेभ्यः प्रधानतोक्ता कविभिः। तथा हि

"विद्याधनं सर्वधनप्रधानम्।"

इयं च विद्याधनस्य प्रधानता यदन्यानि धनानि व्ययीकृतानि क्षयं यान्ति, किन्तु विद्याधनं व्ययेन संवर्द्धते। एतद्वैशिष्ट्यं विद्याधनस्य यद्दानात्प्रवर्द्धते सञ्चयाच्चापचीयते। तथा चोक्तं कविभिः—

अपूर्वः कोऽपि कोशोऽयं विद्यते तव भारति।
व्ययतो वृद्धिमायाति क्षयमायाति सञ्चयात्॥

विद्याधनस्य इयमपि विशेषता यदिदं धनं न केनापि चोरयितुं शक्यते। क्रूरोऽपि कोऽपि नरपतिः विद्याधनं हर्तुं न प्रभवति। न कोऽपि विद्वान् पण्डितः राजाज्ञया विद्याविहीनः कर्तुं शक्यते। नापि विद्याधनं भ्रातृभाज्यं भवति। धनस्य राशिः पुनर्भारयुक्तो भवति, परं विद्याधनं न कदापि भारकारि भवति। समीचीनमुक्तं केनापि सुकविना—

न चौर्यहार्यं न च राजहार्यं न भ्रातृभाज्यं न च भारकारि।
व्यये कृते वर्धत एव नित्यं विद्याधनं सर्वधनप्रधानम्॥

अन्यदपि—

वसुमतीपतिना न सरस्वती बलवता रिपुणापि न नीयते।
समविभागहरैर्न विभज्यते विबुधबोधबुधैरपि सेव्यते॥

विद्याबलेनैव महर्षयः महाकवयश्च अमृता भवन्ति अमरपदवीं वा प्राप्नुवन्ति। अत एवोक्तम्—

विद्ययाऽमृतमश्नुते। (श्रुतिः)

विद्ययैव कालिदासभवभूतिभारविप्रभृतयः महाकवयः अमरत्वं प्राप्नुवन्। तेषां सरसपदावली इदानीमपि सहृदयानां कर्णकुहरेषु पीयूषधारां क्षरति। विद्यावन्तो जनाः सर्वत्र प्रतिष्ठां लभन्ते पूजनीयाश्च भवन्ति। राजानः विद्यावतां पुरस्तात् नत-

मस्तका जायन्ते। विद्या नामैकः खलु प्रदीपोऽस्ति। यदा मानवः जीवनस्य जटिल-समस्यापाशेन व्यामोहान्धतमसि निमज्जितो भवति तदा विद्याप्रदीप एव कर्माणि सम्लमार्गं प्रदीपयति। तथा च—

"घनान्धकारेष्विव दीपदर्शनम्"।

चतुर्वर्गस्य फलप्राप्तिसाधनमपि विद्यैव। विद्या विनयं ददाति, विनयेन मानवः पात्रता याति, पात्रत्वात् धनमाप्नोति। एवं चतुर्वर्गस्य प्रथमो वर्गः धनरूपः विद्ययैव प्राप्यते। अनेन मानवो दानं ददाति, तेन च पुण्यार्जनं करोति। उक्तञ्च

विद्या ददाति विनयं विनयाद् याति पात्रताम्।
पात्रत्वाद् धनमाप्नोति धनाद् धर्मः ततः सुखम्॥

धनेनैव कामरूपापि प्राप्तिर्भवति—धनेन जनोऽभ्रंकषं प्रासादं निर्माति, नानाऽऽस्वादजनकानि भोजनानि भुङ्क्ते, एवं तृतीयवर्गस्य कामस्य अर्जनं करोति। विद्ययैव मानवः आत्मपरमात्मनारभेदं पश्यति, स ब्रह्म जानाति, अतः तद्रूपो भवति। "ब्रह्म वद् ब्रह्मैव भवति" इति श्रुतिः।

एतदप्यवधारणीयं यत् या विद्या क्रियान्विता न भवति सा खल्वनर्थावैव कल्पते। कर्मकलापसमुचिता हि विद्या फलवती भवति न खलु तद्विरहिता। यः क्रियावान् सदाचारसम्पन्नः स एव विद्वान् कथ्यते। विद्यावान् कर्मविहीनो नरः मूर्ख एव निगद्यते। विद्याया आचरणप्रचारणयोश्च ज्ञानं धर्मेणैव मन्तुमर्हति अतएव कथ्यते—

विद्यामधीत्यापि भवन्ति मूर्खाः,
यस्तु क्रियावान् पुरुषः स विद्वान्।

यद्येवं तर्हि सा विद्या कथमुपार्जनीया। उच्यते। विद्यामभीप्सुना मानवेन सुख-दुःखे मनसापि न चिन्तनीये। अविश्रान्तश्रमम् अनवरतं गुरुणा वितरिता विद्या सर्वात्मना आत्मसात्करणीया। सुखाभिलाषुकाश्छात्रा विद्यामृतं न पिबन्ति। तथा च सम्यगुक्तम्—

सुखार्थिनः कुतो विद्या विद्यार्थिनः कुतः सुखम्।
सुखार्थी चेत्त्यजेद्विद्यां विद्यार्थी चेत्त्यजेत्सुखम्॥

आलस्यं सुखेच्छा च विद्यार्थिना निसर्गजः शत्रुः। ताभ्यामभिभूतोऽन्तेवासी न कदापि स्वेष्टं फलं लभते।

विद्यया मानवः विपुलां कीर्तिं धनञ्च लभते। को न जानाति यद् दिवंगतः रवीन्द्रनाथटाकुरः, वेङ्कटेश्वरमणः, राधाकृष्णो वा विद्ययैव विपुलं यशः प्रभूतं च धनं प्राप्नुवन्तः। विद्यायाः प्रशंसाया केनचित् कविना समुचितमेवाभिहितम्—

मातेव रक्षति पितेव हिते नियुङ्क्ते
कान्तेव चाभिरमयत्यपनीय खेदम्।
लक्ष्मीं तनोति वितनोति च दिक्षु कीर्तिं
किं किं न साधयति कल्पलतेव विद्या॥ इति।

३—वेदानां महत्त्वम्

अथ कोऽयं वेदः ? तत्रोच्यते—"विद्यन्ते ज्ञायन्ते लभ्यन्ते वा धर्मादिपुरुषार्था एभिरिति वेदाः।" ज्ञानार्थकाद् विद् धातोर्घञि प्रत्यये रूपमिदं सिद्ध्यति। सायणेन पुनः कृष्णयजुर्वेदीयभाष्यभूमिकायाम् उपन्यस्तम्—

"प्रत्यक्षेणानुमित्या वा यस्तूपायो न विद्यते।
एतं विदन्ति वेदेन तस्माद् वेदस्य वेदता॥", इति।

एवं वेदो हि नाम अशेषज्ञानविज्ञानराशिः। आम्नायः, आगमः, श्रुतिः, वेद इति समानार्थकाः शब्दाः। "इष्टप्राप्त्यनिष्टपरिहारयोरलौकिकमुपायं यो वेदयते स वेदः" इति सायणेन प्रतिपादितम्। अतः वेदः खलु अशेषविश्वविज्ञानविशेषपरिज्ञानप्रदं शाश्वतिकमपौरुषेयं शास्त्रम्।

वर्णाश्रमधर्मः—वेदेषु मनुष्याणां कर्मादिभेदतः पञ्च श्रेणिविभागा दृश्यन्ते—ब्राह्मणः, क्षत्रियः, वैश्यः, दासः, दस्युश्च। दस्यु खलु अनार्यः। आर्याश्चत्वारः। ते भेदाः पश्चाज्जातिभेदेन प्रचलिताः। परं सर्वैर्जनैः परस्परं प्रीतिभावेन वर्तितव्यम्—

"प्रियं मा कृणु देवेषु प्रियं राजसु मा कृणु।
प्रियं सर्वस्य पश्यत उत शूद्र उतार्ये॥ (अथर्व०)

चत्वार आश्रमाः—मानवजीवनं चतुर्षु विभागेषु विभक्तं विद्यते। चत्वारो विभागाः चत्वार आश्रमा उच्यन्ते—ब्रह्मचर्य गृहस्थ वानप्रस्थ सन्यासलक्षणाः। पञ्चविंशतिवर्षपर्यन्तम् एकस्मिन्नाश्रमे विश्रम्य चत्वारोऽप्याश्रमाः सेव्याः, तेषु प्रथमः सर्वैरपरिहार्यत्वेन सेव्यः। गृहस्थादित्रयः आश्रमास्तु ऐच्छिकाः। सोऽयं प्रथमः ब्रह्मचर्याश्रमः मानवजीवनस्याधारभूतः, यतः स एव शारीरिकीं मानसीं च शक्तिं विकासयति। तथा च—

'ब्रह्मचर्येण तपसा देवा मृत्युमुपाघ्नत।
इन्द्रो ह ब्रह्मचर्येण देवेभ्यः स्व राभरत्॥" इति।

ब्रह्मचर्यकाले ब्रह्मचारिणो गुरुकुलाश्रमे निवसन्तः आचार्यसकाशात् विविधा विद्याः, शिल्पकलाः, विज्ञानानि च शिक्षन्ते स्म निःशुल्कम्। ब्रह्मचर्याश्रमानन्तरं गृहस्थाश्रमस्य चोपक्रमः विवाहसंस्कारेण सञ्जायते।

स्त्रीपुरुषयोः समानाधिकारः—वेदेषु स्त्रीपुरुषयोः समानाधिकारः उपदिष्टः। उभयोः शिक्षा दीक्षा च नितरां समानभावेन सम्पादनीया। षोडशसंस्कारेषु विवाहः खलु प्रधानतमः। अयं सम्बन्धः अविच्छेद्योऽग्निसाक्षिकं मैत्रीभावरूपः मन्त्रैर्निर्धारितः। पाणिग्रहणानन्तरं वधूवरौ जगदतुः—

"समञ्जन्तु विश्वे देवा समापो हृदयानि नौ।
सम्मातरिश्वा सं धाता समु देष्ट्री दधातु नौ॥

पाणिग्रहणसंस्कारे प्रथमं तावत् पाणिग्रहणम्, ततो यज्ञाग्निपरिक्रमा, ततो लाजाहोमः, ततः शिलारोहणम्, ध्रुवदर्शनम्, सूर्यदर्शनम्, सप्तपदी च। ततः परस्परं समानं सौहार्दम् जायते। पतिकुलमपि परिणीताया देव्याः गौरवास्पदं पदम्—

"साम्राज्ञी श्वशुरे भव साम्राज्ञी श्वश्र्वां भव।
ननान्दरि साम्राज्ञी भव साम्राज्ञी अधिदेवृषु॥" इति॥

विवाहसम्बन्धस्याविच्छेद्यत्वं वेदे वर्तते। एष विवाहसम्बन्धः न तात्कालिकोऽपितु नित्यः यावज्जीवनस्थायी च। तथा च वेदेऽयमादेशः यदेकः पतिः एकामेव पत्नीं परिणयेत्। पत्न्यपि एकमेव पतिं वृणुयात्। अपि च वेदे भगिनी-भ्रातृविवाहः सर्वथा निषिद्धः।

वेदानामपौरुषेयत्वं नित्यत्वं च प्रायः सर्वेऽपि प्राचीनाचार्याः स्वीचक्रुः। "प्रलयकालेऽपि परमात्मनि वेदराशिः स्थितः" इति भगवता कुल्लूकभट्टेन वेदानां नित्यत्वं प्रदर्शयतोक्तम्। वस्तुतः सृष्ट्युत्पत्तिसमकालमेव आदिमहर्षीणां हृदयेषु वेदज्ञानं प्रादुरभूत्।

वैदिकधर्मस्य स्वरूपम्—वेदप्रतिपादितः धर्मः वैदिकधर्मः। वैदिकधर्मे ईश्वरः अजरः, अमरः, शुद्धः, व्यापकः, सर्वशक्तिमान्, जगन्नियन्ता, सर्वज्ञः, न्यायशीलः शुभाशुभकर्मफलदाता, सृष्टि-स्थिति-प्रलयकर्त्ता च। तथा चोक्तम्—

"तमेकं सत् विप्रा बहुधा वदन्ति।"
"ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत्।
तेन त्यक्तेन भुञ्जीथा मा गृधः कस्यस्विद्धनम्॥"

स एव ईश्वर उपास्यः।

वेदे मोक्षस्यानन्दः—वेदे मोक्षानन्दस्वरूपस्य वर्णनं दृश्यते—

"यत्र ज्योतिरजस्रं यस्मिन् लोके स्वर्हितम्। तस्मिन् मा धेहि पवमानामृते लोके अक्षित इन्द्रायेन्दो परिस्रव"॥ ऋक्।

स खलु मोक्षानन्दः सत्येन, तपसा, श्रद्धया तथा च आध्यात्मिकज्योतिष्प्रदीप्त्या एव सम्भवः।

यस्य च ज्योतिषा आत्मायं ज्योतिष्मान् भवति तं स्तौति—

"एक एवाग्निर्बहुधा समिद्ध एकः सूर्यो विश्वमनुप्रभूतः। एकैवोषा सर्वमिदं विभात्येकं वा इदं वि बभूव सर्वम्"॥ ऋक्।

वेदे पुनर्जन्म—पुनर्जन्मसम्बन्धि अतिरमणीयं तत्त्वं ऋचो वर्णयन्ति—

"आ यो धर्माणि प्रथमः ससाद ततो वपूंषि कृणुते पुरूणि। धास्युर्योनिं प्रथम आविवेश यो वाचमनुदितां चिकेत।" अथर्व०।

"भूतस्य जातः पतिरेक आसीत्"।
"यः देवेषु अधिदेव एक आसीत्"।

अत्र परमात्मैव हिरण्यगर्भः तदुपाधिभूताना पृथिव्यादीना भौतिकाना ब्रह्मणः सकाशादुत्पत्तेः। स एव एकोऽद्वितीयः सन् भूतस्य विकारभूतस्य ब्रह्माण्डादेः प्रतिरासीत्।

वेदे राष्ट्र-भावना—वेदेऽखिलमेव विश्व राष्ट्रत्वेनाभिमतम्। तादृशराष्ट्रस्य राजा तादृशो भवेत् य सर्वाः प्रजाः वाञ्छेयुः। उक्तञ्च—

"ध्रुव ते राजा वरुणो ध्रुव देवो बृहस्पति.।
"ध्रुव त इन्द्रश्चाग्निश्च राष्ट्र धारयता ध्रुवम्"। ऋक्।
"भद्रमिच्छन्त ऋषय स्वर्विदस्तपो दीक्षामुप निषेदुरग्रे।
ततो राष्ट्रं बलमोजश्च जात तदस्मै देवा उपसनमन्तु॥" अथर्व०।

एतादृशस्य एकच्छत्रवतो राज्ञ. राष्ट्र जनकल्याणकारि भवेदत्र न सदेहो भवितुमर्हति, एवं विधो नृपः पर्वत इवाचलः सन् राष्ट्र धारयति।

वेदे मांसभक्षणनिषेधः—वेदे गोमास मनुष्यमास-अश्वादिमासभक्षणस्य निषेधः। तथाहि—

यः पौरुषेयेण क्रविषा समङ्क्ते यो अश्व्येन पशुना यातुधानः।
यो अघ्न्याया भरति क्षीरमग्ने तेषा शीर्षाणि हरसा वि वृश्च॥ ऋक्।

पुरुष-अश्वादिमासभक्षयितुः शिरश्छेदो दण्डरूपेण विहितः। गोदुग्धपरिहर्तुश्चापि शिरश्छेदो व्यवस्थितः।

वेदे द्यूतनिषेधः कृषिप्रशंसा च—ऋग्वेदस्य दशममण्डले 'अक्षाख्य-द्यूतक्रीडाया' निन्दा निषेधश्चोपदिष्टः। तथा हि—

अक्षैर्मा दीव्यः कृषिमित् कृषस्व वित्ते रमस्व बहुमन्यमानः।
तत्र गावः कितव तत्र जाया तन्मे विचष्टे सवितायमर्यः॥ ऋक्।

प्रसविता अयमीश्वरः आचष्टे द्यूतं मा कुरु। कृषिमेव कृषस्व, तत्सम्पादिते धने रतिं कुरु। द्यूते पराजितस्य का दशा भवति?

जाया तप्यते कितवस्य हीना माता पुत्रस्य चरत. क्वस्वित्।
ऋणावा बिभ्यद्धनमिच्छमानोऽन्येषामस्तमुप नक्तमेति॥ ऋक्।

कितवस्य भार्या तप्यते। मातापि सतप्ता भवति। अक्षपराजयात् ऋणवान् कितवः भयमापन्नः कस्यचिद् धनिनः गृहे रात्रौ चौर्यमुपगच्छति, इति कीदृशः स शोच्यः।

एवं विधाः जनकल्याणकारिणउपदेशाः परामर्शाश्च वेदेषु निर्दिष्टाः सन्ति। तेषामनुष्ठानेन मानवसमाजस्य नितरा कल्याणं भवति।

४—वेदाङ्गानि तेषामुपयोगिता च

चतुर्णां वेदानां चत्वार उपवेदाः सन्ति। तेषु ऋग्वेदस्य आयुर्वेदः, यजुर्वेदस्य धनुर्वेदः, सामवेदस्य गान्धर्ववेदः, अथर्ववेदस्य च अर्थवेदः।

आयुर्वेदः—अयं ऋग्वेदस्योपवेदः। आयुर्वेदस्य प्रधानग्रन्थाः चरकसुश्रुतादयः सन्ति। चरकनिर्माणकालः खैस्तपूर्वद्वितीयशतकं विद्यते। भगवता पतञ्जलिमुनिना ग्रन्थोऽयं प्रणीतः। सुश्रुतसंहिता हि आयुर्वेदस्य शल्यशालक्यचिकित्सायाः सर्वोत्कृष्टः ग्रन्थः विद्यते, अन्येऽपि ग्रन्था आयुर्वेदे समुपलभ्यन्ते। तेषु वाग्भटस्य अष्टाङ्गहृदयाख्यो ग्रन्थः, माधवस्य माधवनिदानाख्यः, शार्ङ्गधराचार्यस्य शार्ङ्गधर-संहिता, भावमिश्रस्य च भावप्रकाशो ग्रन्थः सुप्रसिद्धः।

आयुर्वेदोऽयं शल्य-शालक्य-कायचिकित्सा-भूतविद्या-कौमारभृत्य-अगदरसायन-वाजीकरणतन्त्राख्येषु अष्टाङ्गेषु विभक्तः।

धनुर्वेदः—अयं यजुर्वेदस्योपवेदः। यद्यपि धनुर्वेदः इदानीं लुप्तप्रायस्तथापि इतरग्रन्थेषु चास्यास्तित्वमस्योद्धरणै ज्ञायते। धनुर्वेदश्च वसिष्ठ-विश्वामित्र-जामदग्न्य-वैशम्पायन-भरद्वाजप्रभृतिभिः प्रणीतः इति ख्यातिः।

गान्धर्ववेदः—अयं सामवेदस्योपवेदः। अयं सामगानस्य संगीतविद्यायाश्च प्रतिपादकः ग्रन्थः। रागरागिणीनां सप्तस्वरताल-लयादीनां परिचायकोऽयमुपवेदोऽपि लुप्तप्राय एव।

अर्थवेदः—अथर्ववेदस्यायमुपवेदः। अस्मिन्नुपवेदे राजनीतितन्त्र-अर्थतन्त्र-कृषि-वाणिज्य-समाज-शास्त्रादीनि तत्त्वानि प्रतिपादितानि सन्ति। एषोऽपि वेदः प्रणष्ट एव। अधुना तु इतस्ततः प्रकीर्णसामग्रीगवेषणया यत्किञ्चिदपि लब्धुमेव शक्यते।

वेदाङ्गानि—छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते।
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते॥
शिक्षा घ्राणास्तु वेदस्य मुखं तु व्याकरणं स्मृतम्
तस्मात्साङ्गमधीत्यैव ब्रह्मलोके महीयते॥
(पाणिनीयशिक्षायाम्)

वेदाङ्गानि—शिक्षा-कल्प-व्याकरण-निरुक्त-छन्दो-ज्योतिषमिति षट् संख्यकानि। तानि हि वेदानां सम्यगवबोधनार्थं प्रवृत्तानि। वेदाङ्गानां ज्ञानं विना वेदार्थः प्रतिपत्तुं नैव शक्यते। यतः "साक्षात् कृतधर्माण ऋषयो बभूवुः। तेऽवरेभ्योऽसाक्षात्कृतधर्मभ्य उपदेशेन मन्त्रान् सम्प्रादुरुपदेशाय ग्लायन्तोऽवरेभ्य बिल्मग्रहणायेमं ग्रन्थं समाम्नासिषुर्वेदञ्च वेदाङ्गानि च।" अतः वेदार्थावबोधसौकर्यार्थमेव वेदाङ्गानि समाम्नातानि महर्षिभिः।

शिक्षा—वर्णस्वराद्युच्चारणविधिरुपदिश्यते यया सा शिक्षा। वर्ण-स्वर-मात्रा-बल साम-सन्तानानामवबोधनमेव शिक्षायाः प्रयोजनम्। अधुना शिक्षाया ग्रन्था त्रिंशत् संख्याका उपलभ्यन्ते। तेषु पाणिनीयशिक्षैव आद्रियते विद्वद्भिः।

कल्पसूत्राणि—कर्मकाण्डविधिप्रतिपादका ग्रन्थाः कल्पसूत्रेति पदेन परिभाष्यन्ते। वेदविहितश्रुतिप्रतिपादितयज्ञयागादिविधानतद्विवरणप्रतिपादका ग्रन्थाः श्रौतसूत्राणि व्यपदिश्यन्ते। श्रुतिमूलकत्वात् गृह्यसूत्राणि तानि सन्ति येषु गृहाश्रमिणा जन्म-प्रभृतिमृत्युपर्यन्ताः संस्कारादयः उपदिश्यन्ते। धर्मसूत्राणि तानि भवन्ति येषु पारमार्थिकाः सामाजिकाः राजनीतिविषयकाश्च धर्मविशेषा व्यपदिश्यन्ते।

व्याकरणम्—इदमन्धतमः कृत्स्नं जायेत भुवनत्रयम्।
यदि शब्दाह्वयं ज्योतिरासंसारं न दीप्यते ॥ (दण्डी)

भाषां विना लोका नैजमाशयं प्रकाशयितुं न प्रभवेयुः। आशयं चाप्रकाशयन्तस्ते किमपि कर्तुं कथं समर्था भवेयुः। तदभावे तेषां कृते जगदिदमन्धकारमयं स्यात्। साधुशब्दा हि प्रयुक्ताः यथार्थमर्थं प्रकटयन्ति। साधुशब्दप्रयोगे व्याकरणमेव मूलभूतं कारणम्।

तथा चोक्तं रामायणे—नूनं व्याकरणं कृत्स्नमनेन बहुधा श्रुतम्।
बहु व्याहरतानेन न किञ्चिदपभाषितम् ॥

अवैयाकरणः साधुशब्दप्रयोगे नैव क्षमः। व्याकरणज्ञानं विना सम्यक् पद-पदार्थावबोधः नैव सम्भवः। आचार्यो वररुचिः व्याकरणप्रयोजनमुद्घोषयन्नाह—'रक्षोहागमलघ्वसन्देहाः प्रयोजनम्।'

कति व्याकरणानि ? लघु-त्रिमुनि-कल्पतरुकारः कथयति—
ऐन्द्रं चान्द्रं काशकृत्स्नं कौमारं शाकटायनम्।
सारस्वतं चापिशलं शाकलं पाणिनीयकम् ॥ इति।

सर्वेष्वपि व्याकरणेषु पाणिनीयव्याकरणस्यैव वेदाङ्गत्वम् नेतरेषाम्। यतः मुनिः पाणिनिः अक्षरसमाम्नायादारभ्य लोकवेदोभयपथा विचरन् विलक्षणं व्याकरणं प्रणिनाय। स्वकाले प्रयुक्तानेव शब्दान् लक्षीकृत्यैव पाणिनिः नैजं व्याकरणं प्रणिनाय। पश्चाच्च कांश्चिद् विपर्यस्तान् शब्दान् स्वकाले प्रयुक्तानुद्दिश्य कात्यायनो वार्तिकान् प्रणिनाय। तदनु च भगवान् पतञ्जलिः पूर्वदृष्टान् शब्दान् लक्षीकृत्य भाष्यं रचयामास। अतः पाणिनीयं व्याकरणं त्रिमुनिव्याकरणपदेन व्यपदिश्यते।

व्याकरणक्षेत्रे श्रीलक्ष्मीधरतनुजस्य भट्टोजिदीक्षितस्य नाम स्वर्णाक्षरैरङ्कितं भविष्यति। तेन विदुषा शब्दकौस्तुभः, तन्निष्कर्षरूपा वैयाकरणसिद्धान्तकौमुदी तद्व्याख्यानभूता मनोरमा चेति सन्दर्भा विरचिताः।

निरुक्तम्—अस्मिन् शास्त्रे पदविभागमन्त्रार्थदेवतानिरूपणमुपदिश्यते। यद्यपि पदार्थानामर्थावभासः व्याकरणेनापि सुलभः तथापि निरुक्तस्य व्याकरणात् किञ्चिद्-विशिष्टप्रयोजनं वर्तते। निरुक्तं हि पञ्चविधम्—

वर्णागमो वर्णविपर्ययश्च द्वौ चापरौ वर्णविकारनाशौ ।
धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥ (हरिकारिकायाम्)

छन्दःशास्त्रम्—"छन्दः पादौ तु वेदस्य" इति शिक्षायां प्रतिपादितम् । यथा वेदवाणी पद्यात्मिका तथा लोकवाण्यपि । पिङ्गलाचार्यकृत पिङ्गलसूत्रमेव सम्प्रत्युपलब्धेषु छन्दोग्रन्थेषु प्राचीनतमं वेदाङ्गत्वेन च स्वीकृतं मन्यते । पतञ्जलिरेवायं पिङ्गलाचार्य इति केचित् । अन्ये पुनस्तं पाणिनेरनुज इति प्रतिपादयन्ति ।

अन्यः प्रसिद्धतमश्छन्दो ग्रन्थः वृत्तरत्नाकरो नाम विद्वद्वरश्रीकेदारभट्टेन विरचितः ।

ज्यौतिषशास्त्रम्—वेदाङ्गेषु ज्यौतिषशास्त्रस्यापि नितरां महत्त्वं वर्तते । तथा हि—"वेदा हि यज्ञार्थमभिप्रवृत्ताः कालानुपूर्वा विहिताश्च यज्ञाः । तस्मादिदं कालविधानशास्त्रं यो ज्यौतिषं वेद स वेद यज्ञम् ।" (आर्यज्यौतिषम्)

सुमुहूर्त एव यज्ञयागादिक्रियाविशेषाः सम्पाद्यमानाः फलाय कल्पन्ते । मुहूर्तज्ञानं हि ज्यौतिषं विना नैव सम्भवति । वेदचतुष्टयस्यापि प्रतिवेदं भिन्न ज्यौतिषशास्त्रम्—ऋग्ज्यौतिषम्, यजुर्ज्यौतिषम्, सामज्यौतिषम्, अथर्वज्यौतिषञ्चेति । सामज्यौतिषम् लुप्तप्रायम् । वेदाङ्गदर्शनस्य प्रवर्तका अष्टादश महर्षयः—

"सूर्यः पितामहो व्यासो वशिष्ठोऽत्रिः पराशरः ।
कश्यपो नारदो गर्गो मरीचिः मनुरङ्गिराः ॥
लोमशः पौलिशश्चैव च्यवनो यवनो भृगुः ।
शौनकोऽष्टादशाश्चैते ज्यौतिषशास्त्रप्रवर्तकाः ॥

गणितशास्त्रम्—अङ्कगणितं बीजगणितं चेति द्वयमपि ग्रहविज्ञानस्याङ्गभूतं परिगण्यते । गणितशास्त्रप्रपञ्चोऽपि वेदाङ्गभूतः वेदादेव लब्धप्रभवः इति नात्र सन्देहः । धन-ऋण-गुण-विभागादीनां परिज्ञानमपि वेदमन्त्रेषु उपलभ्यते, यथा (यजुर्वेदे)—

"एका च मे तिस्रश्च मे तिस्रश्च मे पञ्च च मे पञ्च च मे सप्त च मे सप्त च मे नव च मे नव च मे...." अत्र गणितसिद्धान्तोल्लेखः दृश्यते ।

प्रातिशाख्यानि—वैदिकं व्याकरणं प्रातिशाख्यमुच्यते । वेदानां रक्षार्थमेव प्रातिशाख्यानां रचना । वैदिकशब्दानां व्याकरणप्रक्रियाप्रदर्शनं हि तेषां प्रधानं प्रयोजनम् । प्रातिशाख्यानां प्रतिपाद्यविषयाः—वर्णसमाम्नाय, स्वरव्यञ्जनानां गणना, तदुच्चारणविषयश्च ।

ब्राह्मणानि—ब्रह्मणेन प्रोक्तम् ब्राह्मणम् । ब्राह्मणप्रोक्तं यागविधि-बोधानुस्यूतं वचनम् ब्राह्मणम् । वेदप्रतिपादितयागविधयः एव ब्राह्मणानां प्रधानो विषयः ।

ब्रह्म वै वेदः, तद्व्याख्यानानि ब्राह्मणानि, अथवा ब्रह्मविद्भिः ब्राह्मणैः प्रोक्तत्वात् इमानि ब्राह्मणानि व्यपदिश्यन्ते । यज्ञयागादिरेव एषां प्रतिपाद्यो विषयः ।

विधिरूपमर्थवादरूपमुभयविधलक्षणद्वेति ब्राह्मणं द्विविधम्। तत्र देवतास्वरूप-मानबोधको विधि., यथा—"आग्नेयोऽष्टकपालो भवति" इत्यादि। ब्राह्मणानाम् उपदेशाः—

"यज्ञो वै श्रेष्ठतम कर्म"। (शतपथ०)
"अग्निर्वै धूमो जायते, धूमादभ्रमभ्राद् वृष्टिः"। (शतपथ०)
"नाऽपुत्रस्य लोकोऽस्ति"। (ऐत०)
"नानृत वदेत् न मासमश्नीयात्, न स्त्रियमुपेयात्"। (तैत्ति०)
"अमेध्यो वै पुरुषो योऽनृत वदति"। (शतपथ०)

आरण्यकानि—आरण्यकानि हि ब्राह्मणभागस्य परिशिष्टभागरूपाणि, गद्यपद्य मयानि विद्यन्ते। अरण्येऽध्ययनाद् इमे आरण्यकानि गद्यन्ते। एषा वानप्रस्थानामध्य-यनाध्यापनस्वाध्यायपराणि यज्ञयागादिविधिविधायकानि सन्ति। आरण्यकाना दशा निखिल विश्वमेतद् यज्ञमयम्। ज्ञानकर्मसमुच्चयसिद्धान्तः आरण्यकेषु अङ्कुरित. पश्चाच्च वेदान्तेषु पुष्पित. फलितश्च। आरण्यकानामपि बहवो ग्रन्था.। पर तेषु ऋग्वेदीयम् 'ऐतरेयारण्यकम्' प्रसिद्धम्। आरण्यकाना भाषा सरला, मधुरा, सस्निता क्रियाबहुला च, यथा—

"एतमेव विदित्वा मुनिर्भवति। एतमेव प्रव्राजिनो लोकमिच्छन्त प्रव्रजन्ति। एतद्ध स्म वै तत्पूर्वे विद्वास. प्रजा न कामयन्ते। किं प्रजया करिष्यामो येषा नोऽ-यमात्माऽय लोक इति।"

उपनिषदः—उप + नि पूर्वकस्य विशरणगत्यवसादनार्थकस्य षद्लृ धातो. क्विबन्तस्य रूपमिदम् उपनिषत्। उपनिषत्सु ब्रह्मविद्याया त्रिविधदुःखप्रमोक्षस्य मोक्षस्यैवोपदेशः। सा च परा विद्या कथ्यते। उपनिषदः वेदान्तस ज्ञयापि प्रसिद्धाः।

उपनिषत्सु द्वैताद्वैतौ द्वौ पक्षौ प्रतिपादितौ विलोक्येते। श्रीशङ्कराचार्योऽद्वैतमेव मन्यते, रामानुजाचार्यो विशिष्टाद्वैतवादम्, निम्बार्काचार्यो द्वैताद्वैतवाद, वल्लभा चार्यो विशुद्धाद्वैतवादम्, मध्वाचार्यश्च पुनर्द्वैतवादमेव मन्यते।

उपनिषद् ग्रन्था· अध्यात्मविद्याप्रधाना. सन्ति। तासु सवादरूपेण आख्यान रूपेण च विविधा विद्या· समुपदिष्टा। पर तासु तात्पर्यविषयीभूतोऽर्थः आत्मानम-धिकृत्यैव प्रस्तुत.। उपनिषत्साहित्यमेव सर्वेषा सम्प्रदायाना मूलभित्तिरिति मन्या-महे। उपनिषत्साहित्यमतीव शान्तिप्रद, ज्ञानप्रकाशक वर्तते, तदेव च मानव-संस्कृतेरादिजननी। विश्वतत्त्वज्ञानस्य आदिम स्रोतोऽपि उपनिषन्महानदीत एव प्रवाहितमिति नात्रसन्देह.। ब्रह्मविद्या हि मनस आत्मनश्च निरतिशयशान्तिप्रदा। तथा हि—

"उत्तिष्ठत जाग्रत प्राप्य वरान् निबोधत।"

उपनिषदा वचनामृतमेतत् सुधीभ्यो मुमुक्षुभ्यः प्रेरणाप्रद निरतिशयशान्तिप्रद चेति दिक्।

५—भारतीयसंस्कृतेः स्वरूपम्

अथ का नाम संस्कृतिः ? किं तस्याः स्वरूपम् ? तत्रोच्यते । संस्कृतिः संस्करणम् मनसः आत्मनो वेति संस्कृतिः । सम् पूर्वककृधातोः 'क्तिन्' प्रत्ययेन रूपमिदं सिद्ध्यति । संस्कृतिः मानवमनसोऽज्ञानमपनयति, संस्कृतिः चित्तभ्रममपहरति, संहरति चाविद्यातमः, प्रकाशयति च ज्ञानज्योतिः, संस्थापयति च सत्यवृत्तिम्, दारयति च दुर्गुणततिम्, प्रसादयति च निर्मलं चेतः, समादधाति च शान्तिम् । संस्कृतिः खलु मानवस्य, राष्ट्रस्य अखिलविश्वस्याप्युपकर्त्री । संस्कृतिमन्तरा न कोऽपि मानवः समाजो वा शान्तिमधिगन्तुं समर्थः, संस्कृतिरेव मानवस्य क्षेमकरी, जीवनसञ्चालिका स्वान्तः सुखदायिका च वर्तते । संस्कृतिरेव मानवहृदयेषु विश्व-बन्धुत्वसद्भावनामुत्पाद्य अखिललोकहिताय कल्पते । भारतीया संस्कृतिः खलु निखिलातिशायिगरिष्ठगुणगरिम्णा समस्तविश्वसंस्कृतिवियन्मण्डले सावित्रं ज्योति-रिव देदीप्यते ।

निम्नाङ्किता विषया भारतीयसंस्कृतेरङ्गभूता वरीवृत्यन्ते—

(१) धार्मिकी भावना—मानवेषु धर्मभावनैव तान् पशुभ्यः व्यवच्छेदयति । उक्तञ्च—

"धर्मो हि तेषामधिको विशेषो धर्मेण हीनाः पशुभिः समानाः" इति

"धारणाद्धर्म इत्याहुधर्मो धारयते प्रजाः ।
यः स्याद्धारणसंयुक्तः स धर्म इति निश्चयः ।"

"यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः" इति वैशेषिकदर्शनकृता महर्षिकणादे-नापि ऐहिकमामुष्मिकं चोभयं क्षेमकरं धर्म इति पदेन व्यवस्थापितम् । सा एव धर्म-भावना मानवेषु विशेषा, सा च पशुषु नैव विद्यते ।

(२) सदाचारः—सदाचारोऽपि मानवेषु तान् पशुभ्यः पृथक् करोति । 'आचारः परमो धर्म' इति वचनात् आचारः सर्वोत्तमं तपः । सदाचारः ब्रह्मचर्यादिनियमाना पालनम्, तेन इन्द्रियाणां निग्रहो भवति । तथाचोक्तं महाभारते—

"वृत्तं यत्नेन संरक्षेत् वित्तमेति च याति च ।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतोहतः ॥" इति ।

(३) पारलौकिकी भावना—सर्वेषां धर्मशास्त्राणामध्ययनेन परिज्ञायते यत् जगदिदं विनश्वरं कीर्तिरेव कल्पान्तस्थायिनी अविनाशिनी वा । भौतिकाश्च विषयाः परिभोगरम्याः किन्तु अन्ते परिणामिनः सन्ति । भौतिकपदार्थानामुपभोगेन सुखावाप्तिः सुलभा, किन्तु मानवरत्नमप्यदुर्लभं न । अतएव धीरा मनस्विनः कर्त्तव्यप्राधान्यं जानन्तः भौतिकविषयेषु विरता अभूवन्, कर्त्तव्यपालनं च कुर्वन्तस्ते न कदापि प्राणानपि गणयामासुः । अद्यापि तेषामेव विमला कीर्तिः प्रसरति तराम् संसारे ।

(४) **आध्यात्मिकी भावना**—निखिलमपि संस्कृतवाङ्मयं विशेषतश्चोपनिषत्साहित्यं व्याप्तमनया भावनया। अध्यात्मविद्याप्रधानासु उपनिषत्सु संवादरूपेण अतिमनोहरा उपदेशाः समुल्लसन्ति। सर्वेषां संवादानां तात्पर्यविषयीभूतोऽर्थः आत्मानमधिकृत्यैव प्रस्तुतः। छान्दोग्योपनिषद् बृहदारण्यकोपनिषच्चेति उपनिषद्द्वयम् अतीव महत्त्वपूर्णं बृहदाकारकञ्च। तत्र छान्दोग्योपनिषदि तृतीये भागे घोराङ्गिरसनाम्नो महर्षेः श्रीकृष्णेन ब्रह्मविद्योपार्जितेति वर्णितम्। षष्ठे च भागे उद्दालकारुणेयात् तदात्मजेन श्वेतकेतु-आरुणेयेन ब्रह्मविद्याप्राप्तिनिवेचनम्। एवमुपनिषन्नाम अध्यात्मविद्यापरमलीनोज्ज्वल मनस आत्मनश्च अतीव शान्तिप्रद ब्रह्मविद्यातन्त्रम्।

(५) **वर्णव्यवस्था**—वेदपर्यालोचनेनेदं विज्ञायते यत् वर्णाश्चत्वारः सन्ति—ब्राह्मण-क्षत्रिय-वैश्य शूद्रभेदात्। यथाऽस्माकं शरीरे मुख, बाहू, ऊरू, पदश्चेति चतुःसंख्यकानि अङ्गानि सन्ति तथैव समाजशरीरे ब्राह्मणादयः चत्वारः अङ्गविशेषाः सन्ति कार्यभारसञ्चालनार्थम्। सुप्रसिद्धे पुरुषसूक्ते 'ब्राह्मणोऽस्य मुखमासीद् बाहूराजन्यः" इत्यस्मिन् वर्णव्यवस्थायाः निर्देशो विहितः। यदा सर्वेऽमी ब्राह्मणादयो वर्णाः सम्भूय कार्यं स्वस्वधर्मं वानुतिष्ठन्ति तदानीमेव विश्वसमुन्नतिः सम्भवा नान्यथा।

(६) **आश्रमव्यवस्था**—संस्कृतवाङ्मयाध्ययनेन ज्ञायते यत् मानवजीवनं चतुर्षु विभागेषु विभक्तम्। ते विभागाश्चत्वार आश्रमा अप्युच्यन्ते। आश्रम्यते स्थीयते यस्मिन् स आश्रमः। चत्वार आश्रमाः—ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-सन्यासनामकाः। पञ्चविंशतिवर्षपर्यन्तमेकस्मिन् आश्रमे विश्रम्य चत्वारोऽपि आश्रमाः सेव्याः, तत्रापि प्रथमाश्रमः ब्रह्मचर्याश्रमः सर्वैरपि मानवैः अपरिहार्यत्वेन परिपालनीयः। गृहस्थादिनयः आश्रमास्तु ऐच्छिकाः। आश्रमाणां सर्वोत्कृष्टः ब्रह्मचर्याश्रमः मानवजीवनस्य आधारभूतः स एव मानसीं शारीरिकीं च शक्तिं विकासयति। अस्मिन्नाश्रमे ब्रह्मचारिणः गुरुकुलाश्रमे निवसन्तः गुरोः सकाशात् विविधा विद्याः, विज्ञानानि शिक्षन्ते निःशुल्कम्।

(७) **वैदिकधर्मनिष्ठा**—वेदप्रतिपादितो धर्मः वैदिकधर्मः। वैदिकधर्मे ईश्वर एव सर्वशक्तिमान्, सृष्टिस्थितिप्रलयकर्त्ता, व्यापकः, अजरः, अमरः, शुद्धः, बुद्धः, जगन्नियन्ता, जीवेभ्यः शुभाशुभकर्मफलप्रदाता, सर्वज्ञः, न्यायशीलश्च वर्तते। भारतीय-संस्कृतौ मानवस्य वैदिकधर्मं प्रति नितरां निष्ठा वर्तते।

(८) **पुनर्जन्मवादः**—पुनर्जन्माधिकृत्य अतिरोचकं तत्त्वम् ऋचो वर्णयन्ति। तत्र परमात्मेव हिरण्यगर्भः तदुपाधिभूतानां पृथिव्यादीनां भौतिकानां ब्रह्मणः सकाशादुत्पत्तेः तदुपहितत्वात् तदुत्पन्नत्वव्यपदेशो वर्तते। "भूतस्यजातः पतिरेक आसीदिति" स एव एकोऽद्वितीयः सन् भूतस्य विकारजातस्य ब्रह्माण्डादेः पतिरासीत्। यश्च पुनः पृथिवीं पुनर्द्यां च धारयतीति।

(९) मोक्षावाप्तिः—मोक्षानन्दस्य वर्णनं वेदेषु दरीदृश्यते—

"यत्र ज्योतिरजस्रं यस्मिन् लोके स्वर्हितम् ।
तस्मिन् मा धेहि पवमानामृते लोके अक्षित इन्द्रायेन्दो परिस्रव ॥ ऋक् ।

स खलु मोक्षानन्दानुभवः सत्येन, श्रद्धया, तपसा च आध्यात्मिकज्योतिष्प्रदीप्त्या एव सम्भवः । यस्य ज्योतिषा योऽयमात्मा ज्योतिष्मान् भवति विश्वं चैतद् विभाति स एव ज्योतिषा ज्योतिः स्वरूपः परमेश्वरः स्तूयते ।

(१०) अभयत्वभावना—प्राणभृतां निर्भयता सर्वोत्कृष्टो गुणः । निर्भयो जनः विलक्षणानि लोकोत्तराणि कार्याणि कर्तुं समर्थः न हि भीरुः । भीरवो हि मरणात् पूर्वमेव बहुशो म्रियन्ते, ते हि शरीरेण धृता अपि मृता एव जीवन्ति । अत एव श्रुतौ प्रार्थना—"अभयं मित्रादभयममित्रादभयं ज्ञातादभयं पुरोयः ।" अपि च—

"यतो यतः समीहसे ततो नोऽभयं कुरु ।
शन्नः कुरु प्रजाभ्यः अभयं पशुभ्यः ॥" इति ।

एभिर्मन्त्रैरेतत्स्पष्टं ध्वनितं भवति यत् यो बिभेति स विनश्यति । भयमेव च प्रायशः विनाशकारणं जायते । विजिगीषुभिर्जनैः महत्यां संकटावस्थायाम् उपस्थितायां कदापि भयापन्नैर्न भवितव्यम् इति निर्देशः ।

वेदप्रतिपादिताखिलकर्मप्रतिपत्यर्थं ब्राह्मणग्रन्थानामुदयः । तेषु वर्णितानां वस्तुतत्त्वानां विशदीकरणार्थं कल्पसूत्राणां विन्यासः । इतिहेतोरेव तेषामपि वेदाङ्गत्वेन अङ्गीकारः । एषु प्रतिपादितो धर्मः वैदिकधर्मः । वैदिकधर्मः खलु विश्वहिताय मानवहिताय च प्रवर्तितः । विश्वहितस्य विश्वोन्नतेश्च सर्वा भावना भारतीयसंस्कृतावेव उपलभ्यन्ते ।

६—ईश्वरवादः

ईशावास्यमिदं सर्वं यत्किञ्च जगत्यां जगत् ।
तेन त्यक्तेन भुञ्जीथाः मा गृधः कस्य स्विद्धनम् ॥ (यजु०)

अस्य दृश्यजगतः यो निर्माणं नियन्त्रणञ्च विदधाति स एव ईश्वरपदेन व्यपदिश्यते । स च पुनः 'सर्वगतात्' सर्वव्यापकः । यः सर्वेष्वणुपरमाणुषु च व्याप्नोति यश्च सर्वशक्तिमान् प्रभुः अस्य विशदस्य विश्वप्रपञ्चस्य निर्माणे, नियन्त्रणे च प्रभवति स एवेश्वरः, नैकदेशिकः कश्चिदल्पशक्तिमान् वराकः ईश्वरपदमाग् भवति । स एव सर्वशक्तिमान् सर्वज्ञः नित्यशुद्धबुद्धमुक्तस्वभावः परमेश्वर एव सृष्टिस्थितिप्रलयकर्तृत्वेनाङ्गीक्रियते, न तद्व्यतिरिक्तः कश्चिदन्यः । अस्य च दृश्यप्रपञ्चस्य पर्यालोचनेन ज्ञायते यत्सर्वोऽप्ययं विषयावभासः ज्ञातृज्ञेयेति तत्त्वद्वयनिबन्धनः । तत्र ज्ञाता चैतन्यरूपः अयञ्च यावद्भ्रमेयनिचयः जडरूपः । तदेतद्द्वयमेवास्य प्रपञ्चस्य निमित्तोपादान-

मतम् । निमित्तभूतं कारणं तु स तत्रभवान् परमेश्वर एव चिद्रूपत्वात् । नहि कश्चि-दचेतनो जडरूपः निमित्तत्वमधिकर्तुमर्हति जडत्वात् । जडे हि उपादानता घटते न कर्हिचिन्निमित्तत्वम् । स खल्वेकः परमेश्वर एव भवितुमर्हति, नापि जीवः अल्पज्ञत्वात् । अतः भगवती श्रुतिः प्रतिपादयति—

स पर्यगाच्छुक्रमकायमव्रणमस्नाविरं शुद्धमपापविद्धम् । कविर्मनीषी परिभूः स्वयम्भूः । याथातथ्यतोऽर्थान् व्यदधाच्छाश्वतीभ्यः समाभ्यः । यजु० ।

अस्मिन् मन्त्रे परमेश्वरस्य सुस्पष्टस्वरूपं प्रतिपादितमस्ति । यः सर्वव्यापकः, शरीररहितत्वादव्रणः शुद्धः पापानविद्धः, मननशीलः, सर्वप्रभुः सन् सर्वाभ्यः प्रजाभ्यो याथातथ्येन पदार्थान् वितरति ।

स एव परमकारुणिको भगवान् परमेश्वर एव सृष्टिं रचयति, रक्षति, संहरति चान्ते । सृष्टौ चास्या जडजङ्गमदेव-मनुष्य-तिर्यक्-स्त्रीपुंभेदरूपाः क्रमेण सर्वेऽवभासिरे । तेषु मानवसृष्टिरेव सर्वगरीयसी ज्यायसी च । यद्यपि वर्णादिभेदा नासन् । स्वभावत एव धर्मपरायणाः सन्तो स्वे स्वे कर्मणि रता आसन् मानवाः । तेषु रागद्वेषादयोऽपि पदं न निदधिरे । ते च सर्वे * आर्यपदेनैव व्यवजह्रिरे । ततः बहुला प्रजासमृद्धिं विलोक्य महर्षयः वेदादेशानुसारमेव लोकहितकाम्यया कामपि सरलाम-जिह्माञ्च व्यवस्थां प्रधातुकामाः वर्णाश्रमव्यवस्थामाविश्चक्रुः । तत्र ब्राह्मण-क्षत्रिय-वैश्य-शूद्राभिधानाः चत्वारो वर्णपदेनावधीयन्ते । तेषां प्रातस्विकं कर्त्तव्यं क्रियाकलापश्च निर्णीतपूरिति । तत्रापि यजनयाजनाध्यापनदानप्रतिग्रहाश्च ब्राह्मणपदवाच्यानां धर्माः कर्त्तव्यकर्माणि वा । क्षत्रियाणां प्रजापालनरिपुभिः सुरक्षा धनयजनाध्ययन-दानानि च धर्माः । वैश्यानां कृषिकर्मगोरक्षणवाणिज्यानि यजनाध्ययनदानसवलि-तानि कर्माणि च धर्माः । शूद्राणां तु पूर्वोक्तत्रैवर्णिकानामेव सेवापरिचर्यादयो हि धर्माः । चामी धर्मा वेदोपदिष्टा एव वेदितव्या इति ।

अत्र च स्वभावतः प्रश्नोऽयमुदेति । यद् धर्मस्वरूपं बहुभिः बहुधा च वैलक्षण्येन प्रतिपादितद्धर्मस्य प्रामाण्याप्रामाण्ये कस्य प्रामाण्यं सर्वज्ञत्वेन समादरणीयम् इति तत्रोत्तरं त्विदमेव यत् स्वतन्त्रप्रमाणत्वाद्वेदस्यैव सर्वोत्कृष्टत्वम् । यदन्येषां शास्त्राणान्तु वेदप्रामाण्येनैव प्रमाणता । न स्वतन्त्रतया । शास्त्रान्तराणि तु परतः प्रामाण्य-सवलितानि एव । ईश्वरेण प्रेरितत्वादेव वेदानां सर्वज्ञप्रामाण्यं विद्वद्भिः मुक्तकण्ठं स्वीकृतम् । यद्यपि भारतेऽपि बहवो धर्मान्तरनामधेयाः सम्प्रदाया अनीश्वरवादिनः सन्तोऽपि येन केनापि प्रकारेण ईश्वरसत्तां स्वीकुर्वन्त्येव । एवमेव मुहम्मदानुयायिनः खीस्तानुगामिनश्च भरतुस्तप्रभृतयः ईश्वरं स्वीकुर्वन्त्येव, जैनबौद्धप्रभृतयोऽपि ईश्वर-मभिमन्यन्त एव । चार्वाकबृहस्पतिप्रभृतयो नूनं ईश्वरसत्ताया न विश्वसन्ति, न च तत्र आस्थां निदधति । परन्तेषामनीश्वरवादिता तर्कनिकषम् अंशतोऽपि न सहते ।

---

* अयं ईश्वरस्तस्यपुत्रा आर्याः, ईश्वरपुत्रा इत्यभवत् ।

कुतः ईश्वरसत्तास्वीकाराभावे, अल्पज्ञस्य जीवस्य परिमितशक्तिमतः ईश्वरीकरण कस्य वा मुग्धस्य मनोरञ्जकं भवेत्। यदि ईश्वरस्य सत्ता न स्वीक्रियेत तर्हि जीवस्य सत्ताया किं प्रमाणम्? यदुच्येत अहं जीव एव प्रमाणम् जीवस्य सत्तास्थापनविधौ जीव एव प्रमाणमिनिविनिगमनाभावात्कदापि प्रामाण्यं नावगाहेत। अथ चान्यः प्रश्नोऽप्युदेति। यज्जीव एक एव अनेके संख्याना वा। अनेके चेत् अल्पज्ञेन वा कथं ज्ञातुं शक्यन्ते ते। अज्ञातेषु तेषु पुण्यपापादीना पुरस्कारदण्डादिव्यवस्था कथं संपत्स्यते तेषामिति हिमाद्रिसदृशः प्रश्नः अशक्योत्तरः जागरूक एव तेषां सम्मुखं सन्तिष्ठत एव। अतः ईश्वरसत्ता स्वीकारः खलु बुद्धिसङ्गतम् एवेति।

अस्मिन् विज्ञानमये युगे तु नितरां बलीयसी सम्पुष्टिः सञ्जाता। पाश्चात्यवैज्ञानिकैरपि समुद्घोषितं मुक्तकण्ठं संसारप्रपञ्चप्रत्यक्षगोचरी भूतः यदि सूर्यचन्द्रनक्षत्रादीनां गतिविधौ कश्चिन्नियतः नियमः सन्दृश्यते तर्हि तन्नियामकेनावश्यमेव भवितव्यम् स च नियामकः ईश्वर एवेति ध्रुवम्।

७-धर्मे सर्वं प्रतिष्ठितम्

धर्मो हि नाम प्राणभूतः कल्याणाय, प्रेयसः श्रेयसश्च परमसाधनभूतं नितरामनुष्ठेयं वस्तुतत्त्वम्। आह च महर्षिकणादः धर्मतत्त्वं लिलक्षयिषुः।

"यतोऽभ्युदयनिःश्रेयससिद्धिः स धर्मः" इति।

अभ्युदयः लौकिकोन्नतिः निःश्रेयसश्च पारलौकिकी सिद्धिः। येनानुष्ठितेन खल्वैहिकोन्नतिरलौकिकैश्वसिद्धिश्च सम्पद्यते स एव धर्मपदव्यपदेश्य इति निष्कृष्टोऽर्थः।

शास्त्रकारैः धर्मस्य विविधानि लक्षणानि कृतानि दृश्यन्ते, तद्यथा—

चोदनालक्षणो धर्मः इति जैमिनिः।
यन्त्वार्याः क्रियमाणं प्रशंसन्ति स धर्मः।
यद्गर्हन्ते सोऽधर्मः। इत्यापस्तम्बाचार्याः।

तत्रभवान् भगवान् मनुः साक्षाद्धर्मस्य लक्षणमाह—

"वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम्॥"

सर्वेषामेषां लक्षणानां निष्कृष्टोऽर्थः समानार्थं एव पर्यवस्यति। इदमत्रबोध्यम् यद्धर्मो हि नाम शुभाशुभकर्मानुष्ठानम्, यत्समुपस्थिते हि धर्माधर्मनिर्णये क्वचित्सन्देहसंशयादिव्याकुलितेऽर्थे सर्वतः प्राग्वेदस्य स्वतः प्रमाणभूतस्यैव प्रामाण्यं, तदनु स्मृतेः, ततो धर्मशास्त्रस्य ततः सदाचारस्य, तदनु स्वात्मनः मितस्य स्वान्तःकरणनिर्देशस्य प्रामाण्यं स्वीकरणीयं भवति। यतो वेदानुसारिस्य

एव स्मृतयो भवन्ति, वेदानन्तर तासामेव प्रामाण्यं खलु यौक्तिक सुसमञ्जसञ्चेति विदुषामभ्युपगमः। चेन्नाम श्रुतिस्मृत्योः क्वचिद्विरोधो समापद्येत तदा स्मृत्यर्थं परित्यज्य श्रुत्यर्थ एव सम्मान्यो भवति समादरणीयश्च। एवमेव स्मृत्याचारयोर्विरोधे प्रतिपन्ने स्मृतिरेव बलीयसीति। निर्णीतोऽयमर्थो महर्षिकात्यायनेनापि—

"स्मृतेर्वेदविरोधे तु परित्यागो यथा भवेत्।
तथैव लौकिकाचार स्मृतिबाधात् परित्यजेत्।"

पर विद्यमानेष्वपि एतादृशेषु बहुतीतेषु धर्माधर्मतत्त्वनिर्णायकेषु शास्त्रप्रमाणेषु धर्मस्वरूपप्रतिपत्तिसमस्याया अद्यापि किञ्चित्साधुतर सार्वभौम समाधानन्तु नैव प्रतीतिपथमुपयाति। प्रतिव्यक्ति प्रतिस्थिति च धर्मतत्त्वस्य विभिन्नतया अधुना यावन्न समभ्युपगतः प्रतिभाति। भगवता मनुना प्रतिपादितम् यत्—

आर्षं धर्मोपदेशञ्च वेदशास्त्राविरोधिना।
यस्तर्केणानुसन्धत्ते स धर्मं वेद नेतरः॥

वेदशास्त्रप्रतिपादितस्यार्थस्य अविरोधिना तर्केण धर्मो विनिश्चेयः न खलु स्वतन्त्रेण। इति तर्कस्योपरि अङ्कुश एव कृत तर्कस्य निरङ्कुशता प्रसिद्धचरा एवेति नोपपत्तिमपेक्षते। अत एवोक्तमभियुक्तैः—

तर्कोऽप्रतिष्ठः श्रुतयो विभिन्नाः
नैको मुनिः यस्य वचः प्रमाणम्।
धर्मस्य तत्त्व निहितं गुहायां
महाजनो येन गत स पन्थाः॥

तदन समुपस्थिते येतादृशे व्यतिकरे महताम् आचार एव तर्हि प्रमाणत्वेनाङ्गीकरणीयः। परं तत्रापि यथार्थावबोधनगहनतो व्याकुलीभवन्तश्च तार्किका एवं व्याजहुः—

जानामि धर्मं न च मे प्रवृत्तिः
जानाम्यधर्मं न च मे निवृत्तिः।
केनापि देवेन हृदि स्थितेन
यथा नियुक्तोऽस्मि तथा करोमि॥ इति।

कविकुलचूडामणिः कालिदासोऽपि शाकुन्तले तादृशमेव किञ्चिदिव निगदति—

"सतां हि सन्देहपदेषु वस्तुषु
प्रमाणमन्तःकरणप्रवृत्तयः।" इति।

परन्तु अन्तःकरणमपि यदा तमस्तोमसमावृत्त भवति तदा तदपि रजसान्धदर्पणमिव न यथार्हरूपं प्रतिबिम्बीकरोति, तदा किं करणीयमिति प्रश्नः सुतरामुदेति। तथाह बोधायनाचार्यः—

"धर्मशास्त्ररथारूढा वेदखड्गधरा द्विजाः।
क्रीडार्थमपि यद्ब्रूयुः स धर्मः परमः स्मृतः॥" इति।

एवं बहुधर्मभिन्नेषु धर्मलक्षणेषु किञ्चिदेकमेव सर्वङ्कषं सर्वाभिनन्दितञ्च लक्षणं भवेत् येन धर्मतत्त्वं यथार्थतया सुविज्ञातं भवेत् तच्च अस्मन्नयेन भगवज्जैमिनि-मुनिपादसूत्रित "चोदनालक्षणो धर्मः" इत्येव सर्वश्रेष्ठं लक्षणम्। चोदना शब्दोऽत्र विधिवचनः। यो वै वेदविधिः स एव धर्मः, यश्च तन्निषेधः स एवाधर्मश्चेति निष्कृष्ट लक्षणम्।

तत्र विधिर्यथा—अध्येतव्या नित्यं वेदाः, अनुष्ठेयो वेदोदितकर्मनिकरः। प्रविलापनीया आकर्मपटली। ससेव्या विद्वांसस्तपस्विनः। प्रतिपालनीयमहिंसा-व्रतम्। भाषणीयं सत्यमेव नित्यम्। प्रदेयं पात्रेभ्यो विद्याद्रविणम्। चिकित्सितव्यो जरामरणव्याधिः प्रयत्नेन। ससेव्यौ पितरौ प्रतिष्ठापनीयं विश्वबन्धुत्वं सर्वात्मना उपलब्धव्यः सर्वथा त्रिविधदुःखात्यन्तविप्रमोक्षः मोक्षः इत्यादिकम्।

अथापि निषेधस्तावत्—न भणितव्या मृषा वाणी। अधर्मे रतिर्नैव विधेया। न च वञ्चनीयाः प्राणिनः। हिंसा न कर्तव्या। अक्षैर्मादीव्यः। गुरवो नावहेल-नीया इत्यादि।

एवं विधिनिषेध रूपेण विहितो निषिद्धो वा तत्तद्भावेन सर्वदैव अनुष्ठेयो धर्मः परित्यक्तव्यश्चाधर्मः सर्वथेति। यतः श्रूयते तैत्तिरीये—

"धर्मो विश्वस्य जगतः प्रतिष्ठिति"। अतः सोऽवश्यमेवानुष्ठातव्यः कल्याणम-भीप्सुभिः। आह न भगवान् बादरायणोऽपि महाभारते—

"न धर्मं त्यजेज्जीवितस्यापि हेतोः" इति।

जीवितमपि तृणीकृत्य सुकृतिभिः धर्मस्तु सर्वात्मना परिपालनीय एवेति भावः। इदमप्यत्र अवधेयम् भवति यत् यस्य यो धर्मः स तस्य निरतिशयगरीयानेव भवति, "स्वधर्मे निधनं श्रेयः परधर्मो भयावहः" इति स्थान एवोक्तं योक्तिकैः। यतो दृश्यते हि लोके यदेकस्य धर्मः तदन्यस्य अधर्मः। ब्राह्मणस्य यो धर्मः न स क्षत्रियस्य। वैश्यस्य ये धर्माः न ते शूद्रस्य। ब्रह्मचारिणो ये धर्मा न ते गृहमेधिनामित्येवं प्रस्थानभेदात् धर्मा अपि सुतरां भिद्यन्तेतमाम्। एतादृशं धर्माधर्मलक्षणं विपुल-जाटिल्यजालसंवलितं प्रबुध्यैव भगवता मनुना अतीव सरलं सुगमावबोधञ्च सूत्रं विस्पष्टं समुपदिष्टं धर्मतत्त्वनिर्णिनीषयेति—

"श्रूयतां धर्मसर्वस्वं श्रुत्वा चैवावधार्यताम्।
आत्मनः प्रतिकूलानि परेषां न समाचरेत्॥"

अस्यायमाशयः यदात्मनः प्रतिकूलं भवेत्तदन्येषां न कदापि समाचरणीयम्। तथाचरणमेव परमोधर्म इति प्रबोध्यम्।

अथापि यद् यजनाध्ययनदानादीनि धर्मतत्त्वानि यत्रतत्रोपदिष्टानि, तत्रापि धर्मचारिणा सचेतेन खलु भवितव्यम्। तद्यथा—

इज्याध्ययनदानानि
तपः सत्यं धृतिः क्षमा।

तेषु पूर्वश्चतुर्वर्गो दम्भार्थमपि सेव्यते
उत्तरस्तु चतुर्वर्गो महात्मन्येव तिष्ठति'॥

तत्रापि सत्यन्तु सर्वेतरानतिशेते । तदेतेनाकूतं भवति यत्सत्यमेव परमोधर्म इति । नच सत्यं मनसा वाचा कर्मणानुष्ठितमेव धर्मपदवीमधिरोहति । अतएव ऋषिभिरुदाहृतम् "सत्यान्नास्ति परोधर्मः ।" "सत्ये सर्वं प्रतिष्ठितम्" इत्यनेकाः शास्त्रोपपत्तयः विलसन्ति । सत्यस्यैव विद्वद्भि धर्मस्वरूप नर्णयार्थं भगवती श्रुतिरेव आलोडनीया भवति । "धर्मं जिज्ञासमानाना प्रमाण परम श्रुतिः" इति ।

एव यथाकथञ्चिद् बुद्धिपद्धतिमवतरितेऽपि धर्मतत्त्वे तदाचरण तत्यान्त्रयीकरण त्वतीव कठिनम् । विरला एव सत्पुरुषा धर्मानुष्ठाने प्रवर्त्तन्ते । ये धर्ममाचरन्ति त एव विजयिनो भवन्ति खलु संसारसमर्ये। अत्र 'यतो धर्मस्ततो जयः' इत्युक्तिः अक्षरशः सत्यसम्भृता विलसति। महाभारताख्यसङ्गरे धर्मकल्पद्रुमारूढाना योगीश्वरश्रीकृष्णचन्द्रदर्शितपथा सञ्चरमाणाना धर्मराजयुधिष्ठिरप्रभृतिपाण्डवाना यो विजयः कुत्सिताचितकर्माचारिणा दुर्विनीताना परसम्पदामपहन्तॄणाम् अधर्ममाचरताम् कायराणा कौरवाणा विद्यमानेषु सत्यातीतेषु सैन्यदलेषु अनल्पकल्पसमग्रसाधनसामग्रीसम्पन्नेष्वपि पराजयः समपद्यत त प्रति तेषा धर्मवैमुख्यमेवापराध्यति । तदेव च खलु मुख्यकारणत्वेनोन्नायते नयज्ञैः । पाण्डवाना विजये तेषा भूयसी सुदृढधर्मनिष्ठता एव विजयस्य हेतुरिति ध्रुव मन्यन्ते चक्षुष्मन्तो विचक्षणाः । कारणान्तरन्तु सुभृश मृग्यमाणमपि न लोचनगोचरीभवति । इत्थमेव रामरावणयोर्युद्धेऽपि हेतुता किल धर्माधर्मावेव सलक्षितव्यौ । अतः यद्यपि धर्मस्य पन्था अतिगहनो दुरूहश्च तथापि स ससमारम्भ समाश्रयणीय एव । रक्षितो धर्मः अवश्यमेव रक्षिष्यतीति निर्विशङ्कम् । यद्यपि सत्यमेवोक्त केनापि अभियुक्तेन—

मानुष्ये सति दुर्लभा पुरुषता पुस्त्वे पुनर्विप्रता
विप्रत्वे बहुविद्यताऽतिगुणता विद्यावतोऽर्थज्ञता ।
अर्थज्ञस्य विचित्रवाक्यपटुता तत्रापि लोकज्ञता
लोकज्ञस्य समस्तशास्त्रविदुषो धर्मे मतिः दुर्लभा ॥ इति ।

यतस्तत्य धर्मे मतिः दुर्लभा भवति । अल्पीयास एव जना धर्मं प्रति बद्धादरा दृश्यन्ते । यद्यपि चतुरस्रतया हितावहो धर्म एवेति विजानन्तोऽपि जनाः कामक्रोधलोभमोहवशगास्ते धर्ममेकतः परित्यज्य अधर्मे पथि अभिनिविशन्ति प्रत्यक्षफलमभिनन्दन्तः । यद्यपि तर्कस्य वेदशास्त्रविरोधित्वमपि तत्तद्देशशास्त्रज्ञानगम्यम् । न च ये अज्ञानिनस्तेषा कृते तु धर्मस्वरूपाववोधो अगम्य एवेति तैः तन्निर्णयः विधेय इति विचिकित्सन् मनुराह—

प्रत्यक्षमनुमान च शास्त्र च विविधागमम् ।
त्रयं सुविदित कार्यं धर्मशुद्धिमभीप्सता ॥

धर्मस्य विशुद्धस्वरूपमधिजिगांसुभिः सर्वमपि शास्त्रजातं सुविदितं कार्यम्। तदानीमेव ते धर्माधर्मस्वरूपं विज्ञातुं प्रभविष्यन्ति। मनुष्याणां परमकर्त्तव्यत्वेनोद्दिष्टं यत्पुरुषार्थचतुष्टयं धर्मार्थकाममोक्षाख्यं तत्रापि धर्मस्य* प्राथम्यं समुपदिष्टमभियुक्तैः। धर्मसाहचर्येण परिपालिताः कामार्थमोक्षाः सिद्धा भवन्ति। न तद्विधुरा इत्याशयः। अतः तादृशः उत्कलक्षणलक्षित एव धर्मः महता प्रयत्नेन सर्वैः पालनीयः ऐहिकामुष्मिकसाध्यसिद्धं कामयमानैः यतः धर्मे सर्वं प्रतिष्ठितम्। उक्तञ्च—

एक एव सुहृद्धर्मो निधनेऽप्यनुयाति यः।
शरीरेण सम नाशं सर्वमन्यद् धि गच्छति॥ इति।

धर्मानुष्ठानेनैव मनुष्याः परमं पदमाप्नुवन्ति नान्यथेति।

८—वर्णाश्रमव्यवस्था

भारतीयसंस्कृतौ वर्णाश्रमव्यवस्थेयंनिर तिशयमहत्त्वं भजते। भारतीयसमाजस्य समुत्कर्षार्थं समस्तविश्वोपस्त्यर्थञ्चेयं नूनं किमप्यनर्घ्यमुपायनम्। समाजस्य कल्याणार्थमेव अस्या व्यवस्थाया महर्षिवराणां मस्तिष्कपटलेषु अवतरणमजनि। तत्र चत्वारो वर्णाः, चत्वारश्च आश्रमा निर्धारिता दृश्यन्ते गुणकर्मस्वभावतः। चतुर्णां वर्णानां विभागः—

"चातुर्वर्ण्यं मया सृष्टं गुणकर्मस्वभावतः।" (गीता) ब्राह्मणः, क्षत्रियः, वैश्यः, शूद्रश्चेति चत्वारो वर्णाः। ते सर्वेऽपि समाजस्योन्नत्यर्थं परमावश्यकाः सन्ति। न ते परस्परं प्रतिस्पर्द्धन्ते। अपि तु समन्विताः सन्तः परस्परोपकुर्वन्ति बहुतरम्। नत्वेषु समुत्कर्षत्वेन उत्तमाधमभावो वा पदमाधत्ते। यद्यपि सर्वेषामेषां धर्माणां पृथक् पृथगिव वैशिष्ट्यमधिकृत्य इमे प्रतिभान्ति। तथापि तत्त्वतः सर्वेऽमी समानभावं भजमानाः वरीवर्तन्ते, तेऽमी परस्परं मात्रयाऽपि न विसंवदन्ते। शास्त्रेषु एषां कर्त्तव्यानि धर्माश्चापि पृथक् उपदिष्टाः सन्तोऽपि ते समाजस्य सर्वसामान्यधर्ममेवावहन्ति, तदुक्तं कौटिल्येन स्वकीयेऽर्थशास्त्रे "एष त्रयी धर्मः चतुर्णां वर्णाश्रमाणां स्वधर्मस्थापनादौपकारिकः।" स्वधर्मो ब्राह्मणस्याध्ययनमध्यापनं यजनं दानं प्रतिग्रहश्चेति। क्षत्रियस्याध्ययनं यजनं दानं शस्त्राजीवो भूतरक्षणञ्च। वैश्यस्याध्ययनं यजनं दानं कृषिपशुपाल्ये वाणिज्यञ्च। शूद्रस्य द्विजातिशुश्रूषा वार्त्ताकारु कुशीलवं कर्म चैव धर्म इति, स एष स्वधर्मः सम्यक् प्रदर्शितः। यद्यपि इमे वर्णाः साम्प्रतिके काले जातिपदव्यपदेश्याः जाताः। जातिशब्दो हि जन्मवचनः, जात्या जन्मना एव ब्राह्मणादयो भवन्ति ब्राह्मणकुले समुत्पन्नो ब्राह्मणः, क्षत्रियकुले समुत्पन्नः क्षत्रियो, वैश्यकुले उत्पन्नो वैश्यः, शूद्रकुले चोत्पन्नः पुनः शूद्र इति तथापि प्राचीनकाले तु गुणकर्मस्वभावत एव

* मनुरप्याह—परित्यजेदर्थकामौ यौ स्यातां धर्मवर्जितौ।

ते ब्राह्मणादयो भवन्ति स्म। ब्राह्मणकुले जातोऽपि यदि गुणकर्मतः ब्राह्मणो न भवेत्तर्हि स ब्राह्मणवर्णाद्विच्युतो भवति स्म। इत्थमेव अन्ये क्षत्रियादयः अपि तत्तद्वर्णार्हगुणकर्मणोर्विहीना. सन्त' तत्तद्वर्णाच्च्यवन्ते स्म। न हि तेषु स्वस्वधर्मविहीनेषु तत्ताकोटिरवगाहते स्म। तदेतदनेकैरितिवृत्तवृत्तै. साधयितु न दुष्करमिति। यदि नाम कश्चिद् व्यक्तिविशेषः जन्मना कर्मणापि तत्तद्गुणकर्मविशिष्ट. स्यात् तर्हि तु स्वर्णसुगन्धिवत् अतिनरामभिनन्दनाय. स्यादिति। यथा राजर्षिः विश्वामित्रः तपःश्रुतिप्रभृतिगुणराशिबलेन ब्रह्मर्षितामियाय। इत्येवमादय.। उक्तञ्च—

> तपः श्रुतञ्च योनिश्चेत्येतद्ब्राह्मणकारणम्।
> तप श्रुताभ्या यो हीनः जातिब्राह्मण एव स ॥

अस्यायमभिप्रायः—यद् ब्राह्मणत्वे कारणता गतानि त्रीणि कारणानि भवन्ति 'तपः श्रुत योनिश्चेति।' तत्र तपः श्रुताभ्या हीनः केवल जातिब्राह्मण इति पदेन व्यपदिश्यते। केवलेन जन्मना स ब्राह्मण्या लब्धजन्मत्वादेव स किं ब्राह्मण. कुत्सितब्राह्मण न जातु श्रेष्ठ इत्याशय'। यद्यपि जन्मनावर्णवादिनः प्रत्यवतिष्ठन्ते, यत्कर्मणा गुणगणेन च क्षात्रियकर्मकुर्वाणा अपि ब्राह्मणा, अश्वत्थामा प्रभृतयः ब्राह्मणपदेनैव व्यवह्रियन्ते स्म न क्षत्रियपदेन न वर्णपरिवृत्तिमकामय.त ते। कर्णसङ्काशा. क्षत्रियगुणालङ्कृता अपि ने'तद्वत्ते ते क्षत्रियपदमुपलम्भिताः। सूतसन्ततित्वावष्टम्भेन ते सूत इति पदेनैव प्रख्यातिङ्गता'। एव द्रोणाचार्य-कृपाचार्यप्रभृतय. समनुष्ठितक्षात्रधर्मा. सर्वे ब्राह्मणपदभाज एव समभूवन् इति सर्वप्रत्यक्षम्। अतः वर्णव्यवस्था जन्मनैवेति तेषा द्रढीयान् विश्वास', परन्तु समुत्कर्षगुणाधायकत्व तु गुणकर्मकलापेनैव सम्पद्यते। तुष्यतु न्यायेन एतत्स्वीकारे अपि वैशिष्ट्य प्राधान्यन्तु खलु गुणकर्मणारेवेति। अत एव प्राह भगवान्मनु —'जन्मना जायते शूद्र. सस्काराद् द्विज उच्यते।'' इति।

सस्कारो हि तत्र श्रुताभ्या सुसस्करण, तादृशसस्करणसस्कृतो जनो द्विजपदवीमुपादत्ते। नान्यथा। अत एव ब्राह्मणक्षत्रियवैश्यादिभिः गुणगणाना ग्रहणे एव यत्नो विधेय। केवल जन्मना न सन्तोष्टव्यम्। तदानीमेव सद्ब्राह्मणाः सत्क्षत्रियाः सद्वैश्याश्च भवितुमर्हन्ति। तत्र ब्राह्मणानामध्ययनाध्यापनादीनि क्षत्रियाणा प्रजारक्षणराज्यकार्यादीनि। वैश्याना पुन कृषिवाणिज्यादीनि कर्माणि निर्दिष्टानि। यजुर्वेदे साम्नातम्—

ब्रह्मणे ब्राह्मण क्षत्राय राजन्य मरुते वैश्य तपसे शूद्रम्। इति। वस्तुतः जगतः कल्याणाय इय वर्णव्यवस्था निरतिशयोपकारकारिणीति सर्वैः सर्वात्मना इतिकर्त्तव्यत्वेन समनुष्ठेया इति।

मरुत् शब्देनात्र मरुद् व्यापार इष्यते। यथा मरुद्वेगेन सिकता इतस्ततः प्रक्षिप्यन्ते तथैव वणिजोऽपि वाणिज्यवस्तुजातमितस्ततो या प्रक्षिपन्ति इति।

९—कालिदासभारती—उपमा कालिदासस्य

अस्पृष्टदोषा नलिनीव दृष्टा हारावलीव ग्रथिता गुणौघैः।
प्रियाङ्कपालीव विमर्दहृद्या न कालिदासादपरस्य वाणी॥ श्रीकृष्णः।

कविकुलललामभूतः कालिदासः संस्कृतसाहित्यमहाकाशे अम्बरमणिरिव प्रकाशते इति सुविदितमेव काव्यकलानुशीलनपराणां विद्वद्वराणाम्। चरित्रचित्रणे प्रकृतिवर्णनेऽयं कविकुलशिरोमणिः सर्वानपि कवीन्द्रानतिशेते। अस्य प्रसादगुणालङ्कृता वाणी, गम्भीरार्था च कल्पना अस्य सिद्धवाग्विभवस्यैव प्रखरप्रतिभाप्रसूतेषु काव्येषु विलोक्यते। अस्य सुललितपदविन्यासगुम्फितानि माधुर्यगुणोपेतानि काव्यकुसुमानि कस्य सहृदयस्य मनः प्रीतिं नोपजनयन्ति।

अयं कविकुलगुरुः कदा कतमञ्च जनपदमलङ्कृतवान् स्वजन्मनेति विवादास्पदमद्यापि। तथापि अस्य ग्रन्थानां सूक्ष्मपरीक्षणेनेदं वक्तुं शक्यते यदेष महाकविः स्वजनुषा काश्मीरभुवमलञ्चकार। अस्य कविवरस्य मेघदूते उज्जयिनीवर्णनेन कुमारसम्भवे च हिमालयवर्णनेन ज्ञायते यदयं प्रौढे वयसि उज्जयिनीं गतो भवेत् तत्र च महीभुजो विक्रमाङ्कस्य सभायां प्रतिष्ठां लेभे तरुणे च वयसि काश्मीरानेवाधिजगाहे। कालिदासस्य कीर्तिकौमुदी नूनमचिरेणैवाभूत् दिग्दिगन्तरालव्यापिनी। तथा च—

"निर्गतासु न वा कस्य कालिदासस्य सूक्तिषु।
प्रीतिर्मधुरसान्द्रासु मंजरीष्विव जायते॥" बाणः।

अयं महाकविः विक्रमादित्यभूपतेः राजसभायां नवरत्नेषु मुख्यतमः आसीत्। इतिहासविदो मनीषिणः प्रायः निश्चिन्वते यत्तस्य प्रादुर्भावकालः खैस्तप्राग्वर्ती सतपञ्चाशत्समो वर्षः।

अस्य महाकवेः काव्येषु भाषाया रमणीयता, भावानां गाम्भीर्यम्, रसानां परिपाकः, छन्दसामौचित्यम्, मानवीयप्रकृतेः स्वाभाविकं विश्लेषणं, प्राकृतदृश्यानां सजीवचित्रणम् यादृशं सुलभं न तादृशमन्यत्र। अस्य कवेः रूपनिरूपणचातुरी, वर्णितनिर्माणकौशलं च लोकोत्तरं हृदयम् आनन्दनिमग्नं करोति। तथा हि कुमारसम्भवे पार्वतीसौन्दर्यवर्णनम्—

सर्वोपमाद्रव्यसमुच्चयेन यथाप्रदेशं विनिवेशितेन।
सा निर्मिता विश्वसृजा प्रयत्नादेकस्थसौन्दर्यदिदृक्षयेव॥

अस्मिन् पद्ये पार्वतीसौन्दर्यवर्णनव्यतिरिक्तमर्थान्तरमपि ध्वनितं भवति। तथा हि अत्र मदीये काव्ये सर्वोपमाद्रव्याणां यथाप्रदेशं सन्निवेशितानां समुच्चयो हि मया प्रयत्नतो विहितः काव्यविश्वसृजा एकत्रैव काव्यसौन्दर्यदिदृक्षयेवेति भावः।

कुमारसम्भवे रतिविलापवर्णने कीदृशं स्त्रीमनोभावानुगुणं स्वाभाविकं चित्रणम्। तथा हि—

गत एव न ते निवर्त्तते स सखा दीप इवानिलाहतः ।
अहमेव दशेव पश्य मामविसह्य व्यसनेन धूमिताम् ॥

अपि च—

आत्मानमालोक्य च शोभमानमादर्शबिम्बे स्तिमितायताक्षी ।
हरोपयाने त्वरिता बभूव स्त्रीणां प्रियालोकफलो हि वेषः ॥

उपमा कालिदासस्य—उपमाविषये त्वयं कविकुलगुरुरिखलान् अखिलान् कवीश्वरानतिशेते । उपमा त्वस्य निसर्गसिद्धा प्रेयसीव प्रतीयते । अस्य काव्येषु उपमालता यादृशी पुष्पिता पल्लविता च न तादृशी कवीश्वराणामन्येषां काव्येषु । विस्तृतिभयादिह कानि चिदेव निदर्शनानि चोदाह्रियन्ते ।

पुरस्कृता वर्त्मनि पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या ।
तदन्तरे सा विरराज धेनुर्दिनक्षपामध्यगतेव सन्ध्या ॥ रघुवंशे ।

अवसानोन्मुखे दिवसे एकतः पश्चिमायामाशायामुपेयुषि दिनकरे अपरतश्च समायान्त्या रात्रौ तदुभयमध्यगता सन्धिवेला नरेन्द्रतत्पत्न्योश्च मध्यगता धेनुं दिनक्षपामध्यगतया सहोपमिमानः कवीश्वरोऽयं किमुपमासौष्ठवस्य परां कोटिं न गतवान् ? पुनश्च—

अप्यग्रणीर्मन्त्रकृतामृषीणां कुशाग्रबुद्धे कुशली गुरुस्ते ।
यतस्त्वया ज्ञानमशेषमाप्तं लोकेन चैतन्यमिवोष्णरश्मेः ॥ रघु० ।

यथेदं भौतिकं जगत् उष्णरश्मेः सूर्यात् चैतन्यमाप्नोति तद्वत् त्वयापि हे व्रतिन् सूर्यतुल्यगुरोरशेषं ज्ञानमधिगतं कच्चित् तव गुरुदेवः कुशली खलु ? किञ्च—

पितुः प्रयत्नात्स समग्रसम्पदः शुभैः शरीरावयवैर्दिने दिने ।
पुपोष वृद्धिं हरिदश्वदीधितेरनुप्रवेशादिव बालचन्द्रमाः ॥ रघुवंशे ।

स रघुः पितुर्दिलीपस्य मनोहरैः शरीरावयवैः सूर्यरश्मेरनुप्रवेशात् बाल चन्द्रमा इव वृद्धिं पुपोष । अहो कीदृशी पूर्णा मनोहारिणी चेयमुपमा ।

भारतीयसंस्कृतिपरम्परानुकूलां रघूणां जीवनपद्धतिं कविरित्थं वर्णयति—

सोऽहमाजन्मशुद्धानामाफलोदयकर्मणाम् ।
आसमुद्रक्षितीशानामानाकरथवर्त्मनाम् ॥
यथाविधिहुताग्नीनां यथाकामार्चितार्थिनाम् ।
यथापराधदण्डानां यथाकालप्रबोधिनाम् ॥
त्यागाय सम्भृतार्थानां सत्याय मितभाषिणाम् ।
यशसे विजिगीषूणां प्रजायै गृहमेधिनाम् ॥
शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्द्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ।
(रघूणामन्वयं वक्ष्ये तनुवाग्विभवोऽपि सन्)

अहो ! भारतीयपरम्परोपनतस्त्रीजनस्य भर्तृजनं प्रति प्रेम्णः कीदृशमादर्शभूतं प्रदर्शनं विहितम्। तथा हि–

किं वा तवात्यन्तवियोगमोघे कुर्यामुपेक्षां हतजीवितेऽस्मिन् ।
स्याद्रक्षणीयं यदि मे न तेजस्त्वदीयमन्तर्गतमन्तरायः ॥
साऽहं तपःसूर्यनिविष्टदृष्टिरूर्ध्वं प्रसूतेश्चरितुं यतिष्ये ।
भूया यथा मे जननान्तरेऽपि त्वमेव भर्त्ता न च विप्रयोगः ॥
नृपस्य वर्णाश्रमपालनं यत् स एव धर्मो मनुना प्रणीतः ।
निर्वासिताऽप्येवमतस्त्वयाहं तपस्विसामान्यमवेक्षणीया ॥

अजविलापमपि सहृदयहृदयसंवेद्यमतीव मार्मिकं प्रतिभाति ।

पतिरङ्कनिषण्णया तया करणापायविभिन्नवर्णया ।
समलक्ष्यत बिभ्रदाविलां मृगलेखामुषसीव चन्द्रमाः ॥
विललाप स बाष्पगद्गदं सहजामप्यपहाय धीरताम् ।
अभितप्तमयोऽपि मार्दवं भजते कैव कथा शरीरिषु ॥
कुसुमान्यपि गात्रसङ्गमात्प्रभवन्त्यायुरपोहितुं यदि ।
न भविष्यति हन्त साधनं किमिवान्यत्प्रहरिष्यतो विधेः ॥
स्रगियं यदि जीवितापहा हृदये किं निहिता न हन्ति माम् ।
विषमप्यमृतं क्वचिद्भवेदमृतं वा विषमीश्वरेच्छया ॥
अथवा मम भाग्यविप्लवादशनिः कल्पित एष वेधसा ।
यदनेन तरुर्न पातितः क्षपिता तद्विटपाश्रिता लता ॥

ईदृशं हृदयद्रावकं चित्रणं कस्य सचेतसो मनः नाश्चर्यचकितं करोति ।

गीतिमयं काव्यं मेघदूतं हि काव्याम्बुधौ समुपगतं परमोज्ज्वलं रत्नम् । अस्मिन् विरहसन्तप्तस्य यक्षस्य मानसी व्यथा अतीव मार्मिकतया कविकुलगुरुणा वर्णिता । आज्ञाभंगापराधक्रुद्धेन अलकाधीश्वरेण कुबेरेण यक्षः वर्षमात्रकालाय निर्वासितः । स मेघद्वारा प्रेयसीं हृदयवल्लभां प्रति प्रणयसन्देशं प्रेषयामास ।

मेघदूतस्य भाषा अतीव प्राञ्जला, प्रवाहवाहिनी, सुमधुरा, प्रसादगुणशालिनी च । मेघं प्रति याचनाप्रकारः कियान् रोचकः । तथा हि—

जातं वंशे भुवनविदिते पुष्कलावर्तकानां
जानामि त्वां प्रकृतिपुरुषं कामरूपं मघोनः ।
तेनार्थित्वं त्वयि विधिवशात् दूरबन्धुर्गतोऽहं
याच्ञा मोघा वरमधिगुणे नाधमे लब्धकामा ॥
धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः
सन्देशार्थाः क्व पटुकरणैः प्राणिभिः प्रापणीयाः ।
इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे
कामार्ता हि प्रकृतिकृपणाश्चेतनाऽचेतनेषु ॥

यक्षस्य तादृगोचितीं कविवरः कियच्चारुतया उत्पादयति इति विचारणीयम्।
पुनश्च—

त्वामालिख्य प्रणयकुपितां धातुरागैः शिलाया
मात्मानं ते चरणपतितं यावदिच्छामि कर्तुम्।
अस्रैस्तावन् मुहुरुपचितैर्दृष्टिरालुप्यते मे
क्रूरस्तस्मिन्नपि न सहते सङ्गमं नौ कृतान्तः॥

माननीयान्तः प्रकृतेः मार्मिकं स्नेहस्यन्दनं चित्रार्पितमिव प्रतिभाति। कालिदासः खलु शृङ्गाररसस्याद्वितीयः कविः, शृङ्गारे नान्यः कोऽपि कविस्तस्य तुला स्पृशति।

अस्य महाकवेश्चत्वारि महाकाव्यानि ऋतुसंहार–कुमारसम्भव–रघुवंश–मेघदूता-भिधानानि तथा त्रीणि विश्वविश्रुतानि नाटकानि–मालविकाग्निमित्र-विक्रमोर्वशीय-अभिज्ञानशाकुन्तलाभिधानि, तेषु शाकुन्तलं परमोत्कृष्टम्। इदं नाटकं कालिदासस्य सर्वस्वमभिधीयते। शकुन्तलावलोकनसमकालमेव दुष्यन्तः विस्मयापन्नः व्याजहार–

'अहो मधुरमासां दर्शनम्। लब्धमस्य नेत्रनिर्माणफलम्!'
मानुषीषु कथं वा स्यादस्य रूपस्य संभवः।
न प्रभातरलं ज्योतिरुदेति वसुधातलात्॥

अपि च—

अधरः किसलयरागः कोमलविटपानुकारिणौ बाहू।
कुसुममिव लोभनीयं यौवनमङ्गेषु संनद्धम्॥

पुनश्च—

सरसिजमनुविद्धं शैवलेनापि रम्यं
मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।
इयमधिकमनोज्ञा वल्कलेनापि तन्वी
किमिव हि मधुराणां मण्डनं नाकृतीनाम्॥

शकुन्तलायाःसौन्दर्यस्य कीदृशं मनोहरं चित्रणम्!

शकुन्तलायाः पतिगृहं प्रति विसर्जनवेलायां महर्षिः कण्वः कीदृङ्मर्मस्पृग्वचो-भिर्मनोभावमावेदयति। (५५६-५६० पृष्ठौ चाप्यवलोकनीयौ)

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया,
कण्ठस्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमपि स्नेहादरण्यौकसः
पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः॥

\+ \+ \+

शकुन्तला—(चित्रमाश्लिष्य) कथमिदानीं तातस्याङ्कात्परिभ्रष्टा मलयतटो-न्मूलिता चन्दनलतेव देशान्तरे जीवनं धारयिष्ये!

काश्यपः—किमेवं कातरासि ?

अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे,
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला ।
तनयमचिरात्प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि ॥

(शकुन्तला पितुः पादयोः पतति)

गौतमी—जाते परिहीयते गमनवेला निवर्तय पितरम् ।

शकुन्तला—कदा नु भूयस्तपोवनं प्रेक्षिष्ये ?

काश्यपः—गच्छ वत्से । शिवास्ते पन्थानः सन्तु ।

अहो ! कीदृशोऽयं मर्मस्पर्शी मनोरमश्च संवादः !

कालिदासः रसमूर्धन्ये शृङ्गाररसे उपमालङ्कारे च सर्वानेव कवीश्वरानतिशेते इत्यत्र नास्ति सन्देहावसरः । विविधरूपधारिणी अस्योपमाऽपि चेतश्चमत्करोति—

ता हंसमाला शरदीव गङ्गां
महौषधिं नक्तमिवात्मभासः ।
स्थिरोपदेशामुपदेशकाले
प्रपेदिरे प्राक्तनजन्मविद्याः ॥ (कुमार०)

कालिदासस्य काव्यकलायाः अतिशयलोकप्रियत्वं सर्वश्रेष्ठत्वञ्च सर्वैः सहृदयहृदयैः स्वीकृतम् । तस्य वर्णविन्यासमाधुर्यं, भाषायाः प्राञ्जलता च नान्यत्राभिलक्ष्यते । कियत्तावद्वर्ण्येत तस्य कविकुलचूडामणेः भारती । तथा हि—

"अमृतेनैव संसिक्ता चन्दनेनैव चर्चिता ।
चन्द्रांशुभिरिवोद्घृष्टा कालिदासस्य भारती ॥"

महाकवेरस्य सुधा धवलाकीर्तिः अमान्तीव भारतवर्षे पाश्चात्यानपि देशान् स्वकीयैरमलैर्गुणैर्नितरां मुखरयाम्बभूव । न हि सन्ति संस्कृतभाषाविदः केचनापि धरातले ये विश्ववन्दनीयं महाकविमेनं सबहुमानं न स्मरन्ति ।

१०—बाणोच्छिष्टं जगत्सर्वम्

अस्ति कविसार्वभौमो वत्सान्वयजलधिकौस्तुभो बाणः
नृत्यति यद्रसनायां वेधोमुखलंगलासिका वाणी ॥

(पार्वतीपरिणये)

महाकविबाणभट्टः संस्कृतगद्यलेखकेषु सर्वमूर्द्धाभिषिक्तः असाधारणप्रतिमासम्पन्नो महामेधावी चासीत् । स्वजीवनविषये स्ववंशपरिचयविषये चायं स्वविरचिते हर्षचरिते समासेन लिखितवान् । तथा हि—

"स बाल एव विधेर्बलवतो वशादुपसम्पन्नया व्ययुज्यत जनन्या।
जातस्नेहस्तु नितरां पितैवास्य मातृतामकरोत्।" (हर्षचरिते)

बभूव वात्स्यायनवंशसम्भवो द्विजो जगद्गीतगुणोऽग्रणी सताम्।
अनेकगुप्तार्चितपादपङ्कजः कुबेरनामांश इव स्वयम्भुवः॥
(कादम्बरी)

बाणभट्टस्य कालविषये कतिपयैः प्रमाणैर्निश्चीयते यदयं कान्यकुब्जाधिपस्य श्रीहर्षदेवस्य सभापण्डित आसीत्। श्रीहर्षदेवस्य च समयः ख्रैस्त ६०६ तमोऽवधारित कालविद्भिः। बाणभट्टस्यापि स एव समय इति निर्विवादोऽयम्।

बाणभट्टो बाल्यकाल एव दुर्भाग्यवशात् जनन्या व्ययुज्यत। अत समुपजातस्नेहः पितैव मातृत्वमकरोत्। अथ कुशाग्रधीर्बटुः व्याकरणादानि शास्त्राणि अधीयानः यदा चतुर्दशवर्षीयो जातस्तदास्य जनकोऽपि सुरपुरं जगाम। ततः शोकविह्वलोऽयं किञ्चित्कालं स्वगृह एव दिनानि व्यतीयाय। तदनु अप्रतिमप्रतिभाशाली देशादेशान्तरभ्रमणपर्युत्सुकोऽयं मित्रगणैः परीतः गृहान्निरगच्छत्। यदाऽसौ प्रत्यावर्तत तदा सुहृद्वर्गैः महतासमारम्भेण तस्यागतोत्सवो निरवर्ति। अथ गच्छता कालेन 'राजाधिराज श्रीहर्षः भवन्तं प्रति कलुषितान्तःकरणः' इति स्वदेशहरमुखेन श्रुत्वा बाणः विदीर्णहृदयो राजानं दिदृक्षुस्त्वरितमेवाभ्यगात्। राजा तं दृष्ट्वैव 'महानयं भुजङ्गः' इति व्याजहार। बाणोऽपि प्रगल्भया गिरा प्राह—'देव नार्हसि मामन्यथा सम्भावयितुमविशिष्टमिव जनम्। ब्राह्मणोऽस्मि जातः सोमपायिनां वंशे वात्स्यायनानाम्। यथाकालमुपनयनादयः कृताः संस्काराः। सम्यक् पठितः साङ्गो वेदः। श्रुतानि यथाशक्ति शास्त्राणि। दारपरिग्रहादभ्यागारिकोऽस्मि का मे भुजङ्गता"। राजा च तन्निशम्य किञ्चिन्मन्त्रमुग्ध इव मौनमभजत। अथ गच्छता कालेन भूपतिः स्वयमेव गृहीतस्वभावः प्रसन्नोऽभूत्। प्रसन्नेन राज्ञा तस्मै प्रभूतं द्रविणं† दत्तमादरातिशयं च स लेभे। ततो बाणः सहर्षं प्रशस्तितरमनवद्यं प्रबन्धं हर्षचरितसमाख्यं निबबन्ध। इयं हि बाणस्य प्रथमा रचना तथापि अस्याः कारि अपूर्वा वर्णनशैली, अतिश्लेषकलापूर्णा वाग्धारा या सहृदयानां मनः बलात् चाकचक्यमत्कृतं करोति। तद्यथा—

'यस्मिंश्च राजनि निरन्तरैर्यूपनिकरैरङ्कुरितमिव कृतयुगेन, दिङ्मुखविसर्पिभिरध्वरधूमैः पलायितमिव कलिना, सुधैः सुरालयैरिवावतीर्णमिव स्वर्गेण, सुरालयशिखरोद्धूयमानैर्ध्वजपल्लवैः पल्लवितमिव धर्मेण "

---

† हेम्नो भारशतानि वा मदमुचां वृन्दानि वा दन्तिनाम्
श्रीहर्षेण समर्पितानि कवये बाणाय कुत्राद्य तत्।
या बाणेन तु तस्य सूक्तिनिकरैरुट्टङ्किताः कीर्तयः
स्ताः कल्पप्रलयेऽपि यान्ति न मनाक् मन्ये परिम्लानताम्॥

"स्थानेषु स्थानेषु च मन्दमन्दमास्फाल्यमानालिङ्ग्यकेन, शिञ्जानमञ्जुवेणुकेनानुतालानुवीणेन, कलकांस्यकोशीकणितकोलाहलेन समकालदीयमानानुचालतानकेनातोद्यवाद्येनाऽनुगम्यमानाः, पदे पदे भरणभणितरवैरपि सहृदयैरिवानुवर्त्यमाना काललयाः कोकिला इव मदकलकाकलीकोमलालापिन्यः, विटानां कर्णामृतान्यश्लीलरासकपदानि गायन्त्यः, कुङ्कुमप्रमृष्टरुचिरकायाः काश्मीरकिशोर्य इव वल्गन्त्यः...."

अहो कीदृश आश्चर्यकारी लालित्योपेतो वाग्धाराप्रवाहः!

कादम्बरी बाणभट्टस्य अद्वितीया द्वितीया रचना। अस्मिन् गद्यमहाकाव्ये बाणेन तथाद्भुतं कलाकौशलं वाग्विन्यासविलासं च प्रदर्शितं यथास्य तुलामधिरोढुं न कस्यापि कवेर्गद्यकृतिरुत्सहते। तथा चोक्तं पुलिन्दभट्टेन—

"कादम्बरीरसभरेण समस्त एव मत्तो न किञ्चिदपि चेतयते जनोऽयम्।"

बाणेन कादम्बर्याः कथानकं गुणाढ्यनिर्मितबृहत्कथातः संकलितं प्रतीयते। बाणः कादम्बरीमपूर्णामेव त्यक्त्वा सुरपुरं गतवान् ततोऽस्या उत्तरभागस्तदात्मजेन पुलिन्दभट्टेन विरचितो बाणशैलीमशरत्यव्यैव।

बाणेन स्वरचनासु पाञ्चालीरीतिरेवाश्रिता। बाणस्य पदविन्यासविलासो वर्ण्यवस्त्वनुरूपो भवति, इदमेवास्य रचनाया वैशिष्ट्यम्। विन्ध्याटवीं वर्णयन्नसौ प्रयुङ्क्ते विकटानेव शब्दान् परन्तु वसन्तवर्णनावसरे मृदुलाननिकोमलाञ्च पदावलीं प्रयुङ्क्ते। निदर्शनरूपेण अधोलिखितानि प्रदीयन्ते—

(विन्ध्याटवीवर्णनम्) "क्वचित् प्रलयवेलेव महावराहदंष्ट्रासमुत्खातधरणिमण्डला, क्वचिदुत्कृतमृगपतिनादभीतेव कण्टकिता...."

(वसन्तवर्णनम्) "अशोकतरुताडनरणितरमणीमणिनूपुरझङ्कारसहस्रमुखरेषु सकलजीवलोकहृदयानन्ददायकेषु मधुमासदिवसेषु....।"

(अनुप्रासालङ्कारचमत्कृतिः) "इमकलमकल्लोलपल्लवबेल्लितलवलीलयैः मधुकरकुलकलङ्ककालीकृतकालेयककुसुमकुड्मलेषु...."

(उपमालङ्कारचमत्कारः) क्रमेण च कृतं मे वपुषि वसन्त इव मधुमासेन, मधुमास इव नवपल्लवेन, नवपल्लव इव कुसुमेन, कुसुम इव मधुकरेण, मधुकर इव मदेन, नवयौवनेन पदम्।"

(विरोधाभासालङ्कारः) शिशिरस्यापि रिपुजनसन्तापकारिणः स्थिरस्यापि अनवरतं भ्रमतः, निर्मलस्यापि मलिनीकृतारातिवनितामुखकमलद्युतेः, अतिधवलस्यापि सर्वजनरागकारिणः।"

(अर्थापत्तिः) किं बहुना तारागिनहोत्रधूमलेखाभिरसवर्णैरमिरनिरामुरगदितकृष्णाजिनोत्तरासङ्गशोभाः फलमूलभृतो वल्कलिनो निश्चेतनास्तरवोऽपि सनियमा इव लक्ष्यन्तेऽस्य भगवतः तपोवनवर्तिनः, किं पुनश्चेतनाः प्राणिनः।"

(मधुरपदविन्यास) "वशीकर्तुकाम कामभिव सनियमम्, हर्षजलकण-नीहारिणि वियद्विहारिणि कर्पूरधूलिधूसरेषु मलयजरसलवलुलितेषु बकुलावलीवल येषु स्तनेषु ।"

प्रकृतिचित्रणम्

"एकदा तु नातिदूरोदिते नवनलिनदलसम्पुटभिदि किञ्चिदुन्मुक्तपाटलिम्नि भगवति मरीचिमालिनि ।"

"दिवसावसाने लोहिततारका तपोवनधेनुरिव कपिला वर्तमाना सन्ध्या ।"

"यौवनमिवोत्कलिकाबहुल षरामुखचरितमिव श्रूयमाणक्रौञ्चवनिताविलापम्, भारतमिव पाण्डवधार्तराष्ट्रकुलक्षतक्षोभ, रुद्रस्तनयुगलमिव नागसहस्रपीतपयोगण्डूप-मच्छोद नाम सरो दृष्टवान् ।"

"अनेन च समयेन परिणतो दिवस, स्नानोत्थितेन मुनिजनेनार्घविधिमुपपाद यता य क्षितितले दत्तहस्तमम्बरतलगत साक्षादिव रक्तचन्दनाङ्गराग रविरुद्वहत् ।"

बाणस्य रचनाशैली न क्वापि औचितीमतिक्रमते, कामपि चानन्यसाधारणीं निपुणतामाविष्करोति । सर्वत्र चोत्तरा कल्पनामनुबध्नाति, सूक्ष्मनिरीक्षणनैपुण्यमपि प्रदर्शयति, क्वचित् शब्दाडम्बरमालम्बते, क्वचित् गर्जनम्, क्वचित् भर्त्सनम्, क्वचिच्च तर्जन करोति । कपिञ्जलमुखेन कवि कीदृश्या प्राञ्जलया भाषया पुण्डरीकस्य भर्त्सन करोति । तथा हि—

"सखे, पुण्डरीक, सुविदितमेतन्मम । केवलमिदमेव पृच्छामि यदेतदारब्ध भवता किमिद गुरुभिरुपदिष्टम् उत धर्मशास्त्रेषु पठितम्, उत धर्मार्जनोपायोऽयम्, उता-परस्तपसा प्रकार, उत स्वर्गगमनमार्गोऽयम्, उत व्रतरहस्यमिदम्, उत मोक्षप्राप्ति युक्तिरियम् आहोस्विदन्यो नियमप्रकार ?"

बाणस्य वाणी स्वरचनासु सर्वत्र परिपुष्णाति भारतीयसस्कृतिम्, आर्यमर्यादा-श्चानुपालयति । स्थान एव कविवर श्रीधर्मराजो निगदति—

> रुचिरस्वरवर्णपदा रसभाववती जगन्मनो हरति ।
> सा किं तरुणि ! नहि नहि वाणी बाणस्य मधुरशीलस्य ॥

न केवलमलङ्कारचमत्कृतिचारुतैवास्य कवेर्विशेषता अपितु राजनीतिविषयका उपदेशा अप्यस्य नैपुणीमाविष्कुर्वन्ति । तथा हि मन्त्रिप्रवरस्य शुकनासस्योपदेशा-स्तथ्यस्य वाक्प्रागल्भ्य प्रकटयन्ति—

"तात चन्द्रापीड, विदितवेदितव्यस्याधीतसर्वशास्त्रस्य ते नाल्पमप्युपदेष्टव्यमस्ति, केवल च निसर्गत एवाभानुभेद्यमरत्नालोकोच्छेद्यमप्रदीपप्रभापनेयमतिगहन तमः यौवनप्रभवम् । अपरिणामोपशमो दारुणो लक्ष्मीमद । कष्टमनञ्जनवर्तिसाध्यमपरमै-श्वर्यतिमिरान्धत्वम् । अशिशिरोपचार्यहार्योऽतितीव्रो दर्पदाहज्वरोष्मा । सततममल

मन्त्रगम्यो विषयो विषयविषादास्वादमोहः। नित्यमस्नानशौचवध्यो रागमलावलेपः। अजस्रमक्षपावसानप्रबोधा घोरा च राज्यसुखसन्निपातनिद्रा भवतीति विस्तरेणाभिधीयते। गर्भेश्वरत्वमभिनवयौवनत्वमप्रतिमरूपत्वममानुषशक्तित्वञ्चेति महतीयं खल्वनर्थपरम्परा सर्वा। अविनयानामेमामेकैकमप्येषामायतनम् किमुत समवायः? यौवनारम्भे न प्रायः शास्त्रजलप्रक्षालननिर्मलापि कालुष्यमुपयाति बुद्धिः। अनुज्झितधवलतापि सरागैव भवति यूनां दृष्टिः....।

तदेवं प्रायोऽतिकुटिलकष्टचेष्टासहस्रदारुणे राज्यतन्त्रेऽस्मिन् महामोहकारिणि च यौवने कुमार, तथा प्रयतेथा यथा नोपहस्यसे जनैः, न निन्द्यसे साधुभिः, न धिक् क्रियसे गुरुभिः, नोपालभ्यसे सुहृद्भिः, न शोच्यसे विद्वद्भिः, यथा च न प्रकाश्यसे विटैः न प्रतार्यसेऽकुशलैः, नास्वाद्यसे भुजङ्गैः, नावलुप्यसे सेवकवृकैः, न वञ्च्यसे धूर्तैः, न प्रलोभ्यसे वनिताभिः, न विडम्ब्यसे लक्ष्म्या, न नर्त्यसे मदेन, नाक्षिप्यसे विषयैः नावकृष्यसे रागेण, नापह्रियसे सुखेन। कामं भवान् प्रकृत्यैव धीरः, पित्रा च समारोपितसंस्कारः, तरलहृदयमप्रतिबुद्धञ्च मदयन्ति धनानि। तथापि भवद्गुणसन्तोषो मामेवं मुखरीकृतवान्....।

बाणभट्टस्येयं गम्भीरार्थकल्पना वाणी कस्य हृदयं नाह्लादयति। स्थान एव श्रीगोवर्धनाचार्येण लिखितं यत्सरस्वत्या स्वयं वाक्प्रागल्भ्यं प्रकटयितुं बाणावतारो गृहीतः। तथा हि—

> जाता शिखण्डिनी प्राक् यथा शिखण्डी तथाऽवगच्छामि।
> प्रागल्भ्यमधिकमाप्तुं वाणी बाणो बभूव ह॥

अत एवेयमुक्तिः सम्यक् घटते—"बाणोच्छिष्टं जगत् सर्वम्" इति।

११—कारुण्यं भवभूतिरेव तनुते

> भवभूतेः सम्बन्धाद् भूधरभूरेव भारती भाति।
> एतत्कृतकारुण्ये किमन्यथा रोदिति ग्रावा॥
>
> (गोवर्द्धनाचार्यः)

संस्कृतसाहित्ये भवभूतिप्रसूतानि त्रीणि नाटकरत्नानि विलसन्ति—वीरचरित-मालतीमाधव-उत्तररामचरिताख्यानि। तानि खल्वसाधारणगुणगरिम्णा रसिकानां चेतांसि समाकर्षन्ति। तदेषां पदविन्यासेन भावभङ्ग्या चानुमीयते यद् वीरचरितमेव प्रथमा रचना तदनु मालतीमाधवं तदनन्तरं चोत्तररामचरितम्, उत्कर्षदृष्ट्या च सर्वोत्कृष्टमुत्तररामचरितमेव।

कविरसौ श्रीकण्ठः, रत्नसेटकः कोटिसार इत्येतैर्नामभिः प्रख्यातः। कविरसौ उत्तररामचरिते सूत्रधारमुखेन स्वपरिचयमेवं दत्तवान्—"एवमत्रभवन्तो विदाङ्कुर्वन्तु

अस्ति खलु तत्र भवान् काश्यपः श्रीकण्ठपदलाञ्छनः पदवाक्यप्रमाणज्ञो भवभूतिर्नाम जातुकर्णीपुत्रः।" तथा चाय वीरचरिते मालतीमाधवे चात्मानं परिचाययति—"अस्ति दक्षिणापथे पद्मपुरं नाम नगरम्। तत्र केचित्तैत्तिरीयिणः काश्यपाश्चरणगुरवः पङ्क्तिपावनाः पञ्चाग्नयो धृतव्रताः उदुम्बरा ब्रह्मवादिनः प्रतिवसन्ति। तदामुष्यायणस्य तत्र भवतो वाजपेययाजिनो महाकवेः पञ्चमः सुगृहीतनाम्ना भट्टगोपालस्य पौत्रः पवित्र-कीर्त्तेर्नीलकण्ठस्यात्मसम्भवः श्रीकण्ठपदलाञ्छनो भवभूतिर्नाम जातुकर्णीपुत्रः कवि-र्मित्रधेयमस्माकमित्यत्रभवन्तो विदाङ्कुर्वन्तु—

श्रेष्ठः परमहंसानां महर्षीणामिवाङ्गिराः।
यथार्थनामा भगवान् यस्य ज्ञाननिधिर्गुरुः॥"

एवं हि ज्ञायते यत् जतुकर्णगोत्रसम्भवत्वात् कविवरस्य जननी जातुकर्णीति नाम्ना प्रसिद्धा गुरुश्चास्य ज्ञाननिधिनामा यथार्थनामा ज्ञाननिधिरेव बभूव।

भवभूतिर्जन्मना विदर्भदेशमलञ्चकार। मालतीमाधवस्य पर्यालोचनेन ज्ञायते यत् विदर्भदेशस्य राजधानी कुण्डिनपुरमासीत्। यत पद्मपुरे भवभूतिर्जन्मपरिग्रहम-करोत् तदधुना जनशून्यं वृहद्वनं सञ्जातम्।

केचित् मन्यन्ते यत् कालिदासः भवभूतिश्च समसामयिकावास्ताम्। परं तयोः रचनापर्यालोचनेन ज्ञायते यत् नैतौ समसामयिकौ। कालिदासस्य रचना शैली प्रसादबहुला, सरला निसर्गजा च, भवभूतेस्तु जटिला, प्रलम्बसमासबहुला च प्रतिभाति।

भवभूतेः कालविषये राजतरङ्गिण्याश्चतुर्थेऽङ्के पद्यमिदं महत्त्वपूर्णम्—

"कविर्वाक्पति-राजश्री-भवभूत्यादिसेवितः।
जितो ययौ यशोवर्मा तद्गुणस्तुतिबन्दिताम्॥"

एतेन पद्येन विज्ञायते यत् भवभूतिः कान्यकुब्जाधिपतेः यशोवर्मणो राजपण्डित आसीत्। यशोवर्माऽसौ काश्मीरकेण राज्ञा ललितादित्येन पराजितः। ललितादित्यस्य शासनकालः खैस्त ६९३ अब्दात् ७२९ पर्यन्तमासीत्। अतः भवभूतेः समयः अष्टम-शताब्द्याः प्रारम्भ एवेति सुनिश्चितम्।

भवभूतिः कालिदासस्य समसामयिकः इति प्रचारितः प्रवादोऽपि विचारणीयः। अस्य प्रवादस्य मूलं भोजप्रबन्धोल्लिखितमाख्यायिकमिदं वर्तते यदेकदा भवभूतिः उत्तररामचरितं विरच्य कालिदासस्य सविधं गतस्तच्छ्रावणाय। शतरञ्जनक्रीडासक्तः कालिदासो भवभूतिं प्राह यदुच्चैः श्रावय। श्रावितं च सर्वं निशम्य कालिदासः परमसन्तुष्टोऽभूत्, उक्तवांश्च पद्यमेकमतिरमणीयं सम्पन्नम्, परन्तु—

किमपि किमपि मन्दं मन्दमासक्तियोगा-
दविरलितकपोलं जल्पतोरक्रमेण।
अशिथिलितपरिरम्भव्यापृतैकैकदोष्णो-
रविदितगतयामा रात्रिरेव व्यरंसीत्॥

इत्यस्य श्लोकस्य चतुर्थे चरणे "एवं" इत्यत्र अनुस्वारोऽधिकः सञ्जातः। भवभूतिना कालिदासस्यैतन्निर्देशं स्वीकृत्य 'रात्रिरेव व्यरंसीत्' इति पाठभेदेऽनुस्वारोऽपाकृतः। परमस्य प्रवादस्य कोऽपि आधारो नास्ति यतः भोजप्रबन्धे पठ्यते—'बाराणसीतः समागतः कोऽपि भवभूतिर्नाम कविः द्वारि तिष्ठति।' भृजानैर्भोजदेवस्य शासनसमयस्यायं वृत्तान्तः। श्रीभोजदेवश्च मुञ्जभ्रातृजः। यदि भोजदेवस्य शासने भवभूतेः विद्यमानता स्वीक्रियेत तर्हि भवभूतेः समयः एकादशशताब्द्याम् भवेत् एतच्च प्रमाणान्तरैर्भवितुं नार्हति। अतः भवभूतेः समयः अष्टमशताब्द्याः प्रारम्भ एवेति सुनिश्चितम्।

नाटककारेषु भवभूतेः स्थानं सर्वोत्कृष्टमित्यत्र न काप्यत्युक्तिः। 'उत्तरे रामचरिते भवभूतिर्विशिष्यते' अस्याभाणकस्यापि चारितार्थ्यमेव। अस्य कवेः करुणरसः सर्वस्वभूतः तस्य रसस्य च प्राधान्यं कविः स्वयमेवोद्घोषयति—

> एको रसः करुण एव निमित्तभेदात्
> भिन्नः पृथक् पृथगिव श्रयते विवर्तान्।
> आवर्तबुद्बुदतरङ्गमयान् विकारा-
> नम्भो यथा सलिलमेव हि तत्समस्तम्॥ इति।

स्वयं भवभूतिस्तमसामुखेन करुणरसस्य प्राधान्यं रससार्वभौमत्वं च सूचयति तथा चान्ये रसास्तु तद्विकृतय एव।

उत्तरचरिते तु करुणरसः पराकाष्ठा गत इव प्रतिभाति। तद्यथा—

> हा हा देवि स्फुटति हृदयं स्रंसते देहबन्धः
> शून्यं मन्ये जगदविरतज्वालमन्तर्ज्वलामि।
> सीदन्नन्धे तमसि विधुरो मज्जतीवान्तरात्मा
> विष्वङ्मोहः स्थगयति कथं मन्दभाग्यः करोमि॥

भवभूतिना यद्यपि यत्रतत्र स्वनाटकेषु श्रीरकरुणवीभत्सादिरसानां प्रयोगः कृतस्तथापि करुणरस एव शिखरायते तस्य रचनायाम्। संस्कृतसाहित्ये भवभूतेः उच्चतमं स्थानम्, न केवलं भाषाशैलीदृष्ट्या, अपितु तस्य रचनासु भारतीयसंस्कृतेः परम्परा, रीतिनीतिव्यवहारा, अध्यात्मज्योतिश्च परिदीप्यमानं वर्तते।

वीरचरिते तृतीयाङ्के समाजपरिपाटीं च चित्रयन् कविरयं महर्षिवसिष्ठमुखेन जामदग्न्यं ब्राह्मणधर्मम् अवबोधयति—

"अयि वत्स, किमनया यावज्जीवनमायुधपरिशाचिकया। श्रोत्रियोऽसि जामदग्न्य-पूर्वं भजस्व पन्थानम् आरण्यकश्चापि तत्प्रचितु चित्तप्रसादनाश्रतश्री मैत्र्यादि-भावनाः। प्रसीदतु हि ते विशोका ज्योतिष्मती नाम चित्तवृत्तिः। समाप्यतु परशु च। तत्प्रसादजमृतम्भराभिधानमवहितःया वनोनापेयसर्वार्थसामर्थ्यमपविद्धसर्वोपराग-मुज्ज्वलमनन्तज्योतिषो दर्शनं प्रशानमपि सम्भवति। तद्धि आचरितव्यं नारायेन तरति येन मृत्युं पाप्मानम्।"

उत्तरचरिते चतुर्थाङ्के जनकेन लववेशवर्णनव्याजेन कियन्नैपुण्येन चित्रितानि क्षत्रियान्तेवासिना लक्षणानि—

चूडाचुम्बितकङ्कपत्रमभितस्तूणीद्वयं पृष्ठतः
भस्मस्तोकपवित्रलाञ्छनमुरो धत्ते त्वचं रौरवीम् ।
मौर्व्या मेखलया नियन्त्रितमधो वासश्च माञ्जिष्ठकम्
पाणौ कार्मुकमक्षसूत्रवलयं दण्डः परः पैप्पलः ॥

भवभूतिना स्वरचनायां प्राचीनसमाजस्य यत् प्रकृतचित्रणं कृतं तत्खलु तस्य वैशिष्ट्यम् । तद्रचनायां तदानीन्तनशास्त्रीयाचारव्यवहारस्यापि सम्यक् प्रतिबिम्बस्तच्चातुरीम् प्रदर्शयति । भवभूतिर्नाट्यरचनायां कालिदासस्य तुलनां तु नाधिरोहति किन्तु स स्थाने स्थाने ऽसाधारणकवित्वशक्तिं दर्शयति—

"स्नपयति हृदयेशं स्नेहनिष्यन्दिनी ते धवलबहुलमुग्धा दुग्धकुल्येव दृष्टिः"

कीदृङ्मर्मस्पृग्वर्णनमेतत् । अयं हि कविः लब्धप्रतिष्ठः श्रेष्ठश्चासीत् । श्री हरिहरेण कविवरेण स्थाने एवोक्तम्—

जडानामपि चैतन्यं भवभूतेरभूद् गिरा ।
ग्रावाप्यरोदीत् पार्वत्या हसतः स्म स्तनावपि"

कालिदास भवभूत्योस्तुलना—उभावपि कवीश्वरौ संस्कृतसाहित्यस्य मूर्द्धाभिषिक्तौ नाट्यकारौ । कालिदासः शृङ्गाररसस्य आचार्यः भवभूतिश्च करुणरसस्य । उभावपि स्वस्वविषये निरुपमौ नाट्यकलाकारौ । यद्यपि महापुरुषयोस्तुलना नौचितीमर्हति तथापि समालोचकाः स्वदृष्टिबिन्दुमुद्दिश्यैव एवं विदधति । कालिदासस्य रचनायां कल्पनावृत्तिरेव मुख्या भवभूतेः रचनायामभिधावृत्तिरेव मुख्या । दुष्यन्तः शकुन्तलाप्रथमदर्शन एव चमत्कृतो निगदति—

'अहो लब्धं नेत्रनिर्वाणम् ।'

भवभूतिः मालतीमाधवे मालतीमवलोक्य माधवः—

"अविरलमपि दाम्ना पौण्डरेणेव नद्धः स्नपित इव च दुग्धस्रोतसा निर्भरेण ।"

यत्र कालिदासः सङ्केतमात्रं तनुते तत्र भवभूतिः विशदवर्णनं करोति । कालिदासस्य भाषा मधुरा शैली च प्रसादगुणोपेता भवभूतेस्तु भाषा प्रौढा क्वचित् कृत्रिमा, समासाडम्बरशालिनी च । यद्यपि काव्यकलानाट्यपाटव भावावेशसश्लेषधोभयोः कवीश्वरयोरलौकिकः मार्मिकश्च तथापि तारतम्यदशा तु स्थिरीक्रियते यद्भवभूतिः कालिदासस्य तुलनां नारोहत्येव ।

१२–सर्वे क्षयान्ता निचयाः

सर्वे क्षयान्ता निचयाः पतनान्ताः समुच्छ्रयाः ।
संयोगा विप्रयोगान्ता मरणान्तं च जीवितम् ॥

अस्मिन् संसारे यत्किञ्चिदपि वस्तुजातं दृश्यते तत् किमपि न स्थायि । यान्यपि वस्तूनि अस्माकं दृष्टिगोचरं भवन्ति तान्यपि स्थिरता न भजन्ते । वस्तुतः इदं सर्वमेव मायाप्रपञ्च एव । जगद्वस्तूनां सर्वेषामपि दशा जलबुद्बुदवत्, जलतरङ्गवत् वर्तते । नूनं सर्वं जगदिदम् नाट्यशालावत् प्रतिभाति । यथा नाट्यशालायां विभिन्नपात्राणि विभिन्नवेषं परिधाय समागच्छन्ति गच्छन्ति च तथैव मानवा अपि स्वकर्मानुसारेण विश्वेऽस्मिन् जन्म लब्ध्वा स्वकर्त्तव्यानि च कृत्वा पुनरपि लोकान्तरं गच्छन्ति । अतो नात्र सन्देहलेशोऽपि वर्तते यदत्र सर्वेषां वस्तूनां स्थितिः क्षणभङ्गुरा । न कस्यापि मनुजस्य वित्तसञ्चयः चिरस्थायी । क्वास्ति वन्दीकृतकुबेरस्य स्वर्णलङ्काधिपतेः दशाननस्य च अतुला धनसम्पत्तिः ? क्वास्ति विश्वविजयिनः अलक्षेन्द्रस्य अतुलो धनराशिः यः परिमातुमपि न शक्यः यं च दृष्ट्वा अलक्षेन्द्रः मृत्युकाले भृशं करोद नितरां विषादं च प्राप्तवान् ? महाराजाधिराजस्य भोजस्यापि क्व गतं तदखिलं धनं यस्य गणनापि कर्तुं नाशक्यत ? श्रूयते यत् मुगलकाले शाहंशाह शाहजहाँ नाम्नः नरपतेः कोशे महान्ति रत्नानि, सुवर्णादीनि चासन् किन्तु कुत्र तानि रत्नानि गतानि ? वस्तुतः तानि सर्वाणि कालेन कवलीकृतानि । अस्माकं देशस्य भारतवर्षस्य असंख्यधनराशिः कुत्र गतः ? तं खलु आङ्गलदेशीया व्यापारिणः शासकाश्च पारेसमुद्रं नीतवन्तः । किं च धनराशिरिदानीम् आङ्गलदेशे वर्तते ? नैव, आङ्गलदेशीयास्तु इदानीं पराश्रिताः सन्ति, अमेरिकादेशस्य सहायतां विना ते स्वतन्त्ररूपेण स्थातुमप्यसमर्थाः । अत एवोच्यते यत् सर्वेषां निचयानाम् अन्तः क्षय एव दृश्यते नात्र सन्देहावसरः ।

विभिन्नकाले विभिन्नराष्ट्रा देशा वा समुन्नतेः पराकाष्ठां गताः । इतिहासविदः जानन्ति यद् रोमनसाम्राज्यस्य प्रभावेण, प्रतापेन च समस्ता योरपदेशीया भराकान्ता आसन् । ग्रीकदेशस्य राज्योत्कर्षस्य अतुलनीयप्रभावस्य च गाथामद्यापि इतिहासज्ञा घोषयन्ति । का कथान्येषाम् देशानाम् अस्माकं देशोऽपि तदा स्वोन्नतेः सभ्यतायाश्च पराकाष्ठां प्राप्नोत्, यदा पाश्चात्यदेशा अज्ञानान्धकारेण संछन्ना आसन्, राजाधिराज-चन्द्रगुप्तविक्रमादित्यस्य राज्यकालेऽस्य देशस्य संस्कृतिः सभ्यता च शिखरायते स्म । परमद्य परितापस्य विषयोऽयं यत् भारतवर्षस्य तत्प्राचीनं गौरवं विकरालकालेन कवलीकृतम् । सर्वदेशानामग्रणीरस्माकं देशः साम्प्रतमतिनिकृष्टां हीनां च दशां प्राप्तोऽस्ति । अधुना भारते वाल्मीकि-कालिदासप्रभृतीनां कवीनां कोमलकान्तपदावली नैव श्रूयते, दारिद्र्यतया अज्ञानान्धकारेण च समन्वितोऽयमस्माकं देशः सुतरां दीनः हीनश्च सञ्जातः । अतुलधनराशिसम्पन्नोऽस्माकं देशोऽद्य परमुखापेक्षी

विद्यते, अन्यदेशानाम् आर्थिकसहायता विना स्वोन्नतिं विधातुमपि न समर्थः। न केवलमस्माकं देशस्यैव हीना दशा, अन्ये प्राचीनकाले सर्वोन्नता मीसरोमादिदेशा अपि इदानीं पतिता हीनाश्च दृश्यन्ते। सुष्टूक्तं कविवरेण कालिदासेन—

"कस्यैकान्तं सुखमुपनतं दुःखमेकान्ततो वा
नीचैर्गच्छत्युपरि च दशा चक्रनेमिक्रमेण।"

वस्तुतः यः कोऽपि समुन्नतिं याति तस्य पतनमपि अवश्यमेव भवति। अत एवोक्तं "पतनान्ताः समुच्छ्रयाः"।

असारेऽस्मिन् संसारे सर्वेषां संयोगे विप्रयोगः पर्यवस्यति। संसारः नाट्यशाला इव वर्तते यत्र मनुष्याः समागच्छन्ति, कञ्चन कालमुषित्वा यथाभिमतं स्थानं गच्छन्ति। स्थिरता तु नैव कस्यापि वस्तुनः मनुष्यस्य वा। सुष्टुक्तं भगवता व्यासेन—

यथा काष्ठं च काष्ठं च समेयातां महोदधौ।
समेत्य च व्यपेयातां तादृग् भूतसमागमः॥

यथा महासमुद्रे द्वे काष्ठे संयोगवशात् कतिचित् कालाय संयोगं प्राप्य पुनरपि तस्मिन्ननन्तसागरे वियोगं प्राप्नुतः तथैव मानवा अपि नदी-नौकासंयोगेन समेलनं प्राप्य पुनः मृत्युना हृता अनन्तकालाय वियोगं प्राप्नुवन्ति। निशानिशाकरयोः, चन्द्रिकाचकोरयोः, सूर्यकमलयोः संयोगः न शाश्वतः प्रत्युत क्षणभङ्गुर एव। संसारे पुत्रवत्सलः पिता पुत्रात् वियोगं प्राप्नोति, प्रियसमागमोत्सुका कान्ता कान्तात् विप्रयोगं गच्छति, प्राणेभ्यः प्रियतरा पुत्री विवाहानन्तरं मातुः सकाशात् विच्छेदं प्राप्नोति। एवं सर्वस्यापि वस्तुनः संयोगो विप्रयोगान्त एव।

मरणान्तं च जीवनं—विषयेऽस्मिन् कस्यापि सन्देहलेशो नास्ति। संसारे जातस्य मृत्युरवश्यंभावी। इयमेव संसारस्यासारता, संसरणशीलता च। भगवता श्रीकृष्णेनापि गीतायाम्—

"जातस्य हि ध्रुवो मृत्युः ध्रुवं जन्म मृतस्य च" इति सिद्धान्तः प्रतिपादितः। संसारेऽस्मिन् बहवो मानवा जाता मृताश्च, बहूनां नामापि न श्रूयते। सत्यमुक्तं केनापि कविना—

मान्धाता च महीपतिः कृतयुगालङ्कारभूतो गतः
सेतुर्येन महोदधौ विरचितः क्वासौ दशास्यान्तकः।
अन्ये चापि युधिष्ठिरप्रभृतयो याता दिवं भूपते
नैकेनापि समं गता वसुमती नूनं त्वया यास्यति॥

क्व सन्ति श्रीरामकृष्णादयः मानवश्रेष्ठा ये सज्जनानां परिपालकाः दुर्जनानां च नाशका आसन्? क्व सन्ति हरिश्चन्द्रादयः दानवीरा भूपतयः येषां केवलं गाथाः श्रूयते? क्व सन्ति स्वतन्त्रतासंग्रामस्य अनन्यतमसेनानायकाः लोकमान्यतिलक-पटेलाद्योऽस्मान् विहाय गताः? सर्वे कालवशेन पञ्चत्वं गताः। अतः नितरां समीचीनेयमुक्तिः—

"सर्वे क्षयान्ता निचयाः।" इति।

१३-धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्

इह खलु संसारचक्रे चङ्क्रम्यमाणानां मानवानां जीवनसाफल्यसिद्धये चत्वारः परम-पुरुषार्था धर्मार्थकाममोक्षाख्याः सकलश्रुतिस्मृतिप्रसिद्धा निरतिशयानुष्ठेयत्वेन प्रति-पादिताः। तेषामनुष्ठानमारोग्यमन्तरा न कदापि सुकरम्। तच्चारोग्यं नियमिताहार-विहारनिद्रादि सत्यपि व्यायामादेव समुपलभ्यते नान्यथा। आरोग्यसंरक्षणार्थं, व्यायामः, प्राणायामः यमनियमासनादियोगाङ्गानुष्ठानस्य परमावश्यकता। तथा हि—

व्यायामपुष्टगात्रस्य बुद्धिस्तेजो यशो बलम्।
प्रवर्धन्ते मनुष्यस्य तस्माद् व्यायाममाचरेत्॥

आरोग्यमन्तरा न धर्मः सम्यक्तया परिपाल्यते नाप्यर्थः सम्यगुपार्जयितुं मन उत्स-हते। दुर्बलाङ्गत्वात्तानि कामना एव प्रपूरयितुं शक्या। पुनः सर्वदुःखजातप्रमोक्षस्य मोक्षस्य तु कथैव किल का? परिणामतः आरोग्याभावे मनुष्यजीवनसाफल्यमेव कदर्थितं भवति। तर्हि दुरापैः कर्मकलापैरगण्यै र्वा पुण्यैश्च उपलब्धस्य मानवजन्मनो वैफल्यन्नाम कियद्दौर्भाग्यमयं कष्टम्। अतः आरोग्यरत्नमिदं सर्वतोभावेन रक्षणीयमेव बुद्धिमद्भिरिति इमे सर्वेऽपि पुरुषार्था आरोग्येनैवैतेन संसाध्याः सर्वास्ववस्थासु तत्तत्साफल्यावाप्तये आरोग्यमेवैकमावश्यकं साधनम्। विद्योपासकानां ब्रह्मचर्या-श्रमिणां छात्राणां कृते तावदारोग्यं खल्वत्यन्तमावश्यकम्। व्यायामादिना सुसम्पन्ने ब्रह्म-चर्यभने प्रगल्भे दृष्टादृष्टशरीरे एव समारोपिता विद्यालता पूर्णतया प्रफुल्लते। स्वस्थे शरीरे एव विद्या समुज्ज्वला वर्चस्वला च संशोभते। अस्वस्थे दुर्बले वपुषि च सा तेजोविहीना दीनहीनेव च प्रतिभाति। एवमेव गृहस्थसुखमपि पूर्णारोग्यसम्-पन्नानां बलिष्ठानामेव यूनां युवतीनां च कृते सम्भव भवति न जातु रुग्णजीर्णशीर्ण-वपुष्मताम्। अत एव धर्मशास्त्रकारेण भगवता मनुना प्रतिपादितम्—

"अधार्यो दुर्बलेन्द्रियैः।"

एतावता दुर्बलेन्द्रियाणां कृते गृहस्थाश्रमो निषिद्ध एव खलु। एवमेव ये खलु श्रमजीविनस्तेऽपि यदि दुर्बलाः श्वासकासनिपीडिताः सदैव तेषां स्वामिभिरवहे-लन्ते निराक्रियन्ते च। एवं धनाढ्या राजानो महाराजा अपि यद्यारोग्यदरिद्राः तेऽपि स्वपदोचितं सुखमुपभोक्तुं न खलु न खलु पारयन्ति। सदैव ते वैद्यराजानु-कम्पानुजीविनः सन्त आधिव्याधिसंवलिततया जीवनं यापयन्तो धृतशरीरा अपि मृता इव ते यथा कथञ्चिन्निश्वसन्ति, जीवनञ्च दुर्भरतया यापयन्ति। श्रूयते किल अम-रीकादेशललामभूतो लब्धमहालक्ष्मीप्रसादः कश्चित् श्री फोर्डनामा महाभागो धनाढ्य-वर्योऽपि महासम्पत्स्वनाथोऽपि सन् नैरुज्यदरिद्रो न कदापि साधारणसुखसन्दोह-भजत। औषधसेवनमन्तरा सूचीभेदप्रसादमन्तरा स कदापि निद्रासुखं न लेभे। अमुद्रितलोचनः सन् सदैव चन्द्रतारकमण्डलं गणयन्नेव निरवशेषां निशां निराशः समनैषीत्। एकदा स प्रभातवेलायां वायुसेवनार्थं कस्मिंश्चित् कान्तकान्तारे विहा-

रार्थं स्ववाष्परथमारूढः किं समपश्यति यत् एकस्मिन् हरिततृणान्नलतादिसमलङ्कृतेऽतिरमणीये सुचैत्रे कमनीये कुटीरद्वारि कश्चन कृषीवलः सुस्वस्थः स्वकुमारकुमारीदाराभिः सह सक्रीडनसाट्टहास धूमपानरसमुपरसयन् स्वच्छानन्दस्य पराकाष्ठिमाटीकमानः किमपि स्वर्गीयसुखमुपभुञ्जानो व्यराजत। मया तु सत्ताऽपि धनधान्यादिनिरतिशयसत्पत् शालिना एतादृशो मुक्ताट्टहासः कदापि नानुभूतः, मदपेक्षयाऽयं स्मेराननो द्रविणेन दरिद्रोऽपि श्रीधरैरप्रमेय सुखसम्पत्तिमश्नुते इति। तादृशारोग्यसम्पादनार्थम् उपायान्तरेषु मुख्यतया व्यायामः अपरिहार्यत्वेन सस्मृतः।

नियमपूर्वकं विधीयमानो व्यायामो हि फलप्रदो भवति। स च व्यायामो द्विधः श्रूयते, व्यायामेन वपुषः सर्वेषु अङ्गेषु मर्मस्थलेषु रक्तसञ्चारः समीचीनतया सम्पद्यते। तेन गात्र परिपुष्ट जायते। परिपुष्टे स्वस्थे गात्रे हि मनोऽपि स्वस्थं प्रसन्नञ्च भवति। सर्वाङ्गीणा स्फूर्ति विवर्धते, बुद्धिस्तेजो यशो बलञ्च सुतरां प्रवर्धन्ते। व्यायाममहिम्ना एव वक्षःस्थल विशाल नेत्रयुगल तरल तेजस्वि च, घनगात्रविभक्तता चानायासेन सुसम्पन्ना भवति। यद्यपि व्यायामस्य अनेके भेदा दृश्यन्ते, यथा वारितरणं, ह्यारोहणं, धावनम्, योगासनानि, सूर्यनमस्कार, प्राणायामः, तथापि ते द्वेधा विभाजयितुं शक्यन्ते। एकः शारीरिकोऽपरो मानसश्च। उपर्युक्ताः प्रकाराः शारीरिकेष्वन्तर्भवन्ति। मानसश्च पुनः स्वाध्यायः, श्रवण, मनन, निदिध्यासन समाधिश्चेति। एषु मुख्यतमः समाधिरेव यत्रात्मपरमात्मनोः समाकलन भवति। परन्तु साधारणजनानां कृते तु शारीरिकेषु यथारुचि, यथाशक्ति च यो यस्मै रोचते स एव नियमतः परिपालनीयः। कोमलप्रकृतिभाजां कृते तु भ्रमणमेव केवल सर्वोत्कृष्टत्वेन वयमाकलयामः। इत्थमेव मानसेष्वपि यावच्छक्तिबलोदय नियमेनानुष्ठेयम्, सामान्यजनेभ्यस्तु स्वाध्यायसन्ध्याध्यान प्राणायामश्च एव महीयान् इति निष्कर्षः। बाला बालिका युवानः युवत्योऽपि यथाशक्य मानसशक्तिसम्प्राप्त्यर्थं शारीरसम्पत्तिञ्च समुत्कर्षयितु सर्वात्मना व्यायामाऽनुष्ठेय एवेति शम्।

एतदतिरिक्तमेतदपि चावधेय भवति यत् अह स्वस्थाऽस्मीति कथमाकलयेयम्। इत्येदर्थं स्वस्थपुरुषस्य लक्षण विशेषज्ञैरलक्षि—

समदोषः समाग्निश्च समधातुमलक्रियः।
प्रसन्नात्मेन्द्रियमनाः स्वस्थ इत्यभिधीयते॥

स्वस्थ पुरुषे हि नियत बभुक्षाप्रवृत्तिः, भोज्येषु चाभिरुचिः, कार्येषु कर्मसु उत्साहः, आत्ममनसोः प्रसादः, गात्राणां लघुमानता, प्रसन्नेन्द्रियग्रामता च प्रवर्त्तते, स एव स्वस्थः। अस्वस्थस्य पुनः उन्निद्रता, आलस्य, वपुर्मनसोरवसादः, उदासीनवृत्तिः, असहिष्णुता प्रभृतयो दोषाः प्रवर्त्तन्ते। तदपाकरणार्थं सर्वदा सर्वात्मना च हितैप्सुभिः प्रयतनीयमिति। स्वास्थ्यसंवर्द्धनार्थं निम्नाङ्किताः कतिपय नियमाः नित्य पालनीया नियतङ्करा—

(१) व्यायामः प्राणायामश्च प्रत्यहमवश्यमनुष्ठेयौ।
(२) सन्ध्योपासनं गायत्रीजपः अवश्यमेव करणीयः।
(३) प्रतिदिनं भ्रमणं विशुद्धवायुसेवनञ्च विधिपूर्वकं करणीयम्, वायुसेवनार्थं नगराद्बहिर्गन्तव्यम्। वनोपवननिर्मलवायुसेवनेन गात्राणि प्रसन्नानि भवन्ति। मनसि समुत्साहः नवाभिनवाश्चेतना, बुद्धिविकासश्च समुत्पद्यते।-
(४) सात्विकाहारः, विशुद्धो विहारश्चावश्यकः; "यादृशमन्नं तादृशं मनः" इति लोकप्रसिद्धा भणितिः यथार्था एव, सात्विके आहारे सत्यमेव मनोऽपि खलु सात्विकं भवति। चित्तप्रसादश्च जायते, अधिगते हि चित्तप्रसादे बुद्धिः पर्यवतिष्ठते, उक्तञ्च गीतायाम्—

तस्माद् यस्य महाबाहो निगृहीतानि सर्वशः।
इन्द्रियाणीन्द्रियार्थेभ्यः तस्य प्रज्ञा प्रतिष्ठिता॥

तदारोग्यमहिम्ना मनुष्येण स्थितप्रज्ञता समवाप्यते। स्थितप्रज्ञस्य च स्वयं सिद्ध एव निखिलेन्द्रियसंयमः। सतीन्द्रियसङ्गमे एव पूर्णमारोग्यं शारीरं मानसश्च सम्प्रतिपन्नं भवति। अत एव सत्यमेवोक्तम्—

'धर्मार्थकाममोक्षाणामारोग्यं मूलमुत्तमम्' इति। तस्मात् धर्मार्थकाममोक्षाणां सिद्धये आरोग्यं सर्वतःप्राक् सम्पादनीयं भवति।

यद्यपि बुद्धिबलं सर्वबलप्रधानम् इति भणितिः सुप्रसिद्धा तथापि शरीरबलमेव तदप्यपेक्षते। बलवति शरीरे एव मनो बलवत् बुद्धिश्च बलवती सम्भवति। बलवान् पुरुषो, देशो वा सर्वैः समाद्रियते, निर्बलः सदैव परिभूयते। संसारोऽयं निर्बलानां कृते नास्ति। "देवो दुर्बलघातकः" इति शास्त्रोक्तिः अक्षरशः सत्या। शक्तिहीनो परेषां दास्यपाशेन च अनायासेन निगडितो भवति। सुखसम्पदमीप्सुभिः बलवद्भिः शक्तिसम्पन्नैः भवितव्यम्। श्रुतिरपि प्रार्थनारूपेण सन्दिशति—

तेजोऽसि तेजो मयि धेहि
बलमसि बलं मयि धेहि। इति।

यतो बलवन्त एव स्वातन्त्र्यं रक्षितुं सक्षमा नान्ये, अतो मनुष्यैः स्वस्थैर्बलवद्भिश्च भवितव्यमिति।

१४–सत्सङ्गतिः कथय किन्न करोति पुंसाम्

सतां सज्जनानां सङ्गतिः संपर्कः संसर्गो वा जनेषु गुणोत्कर्षप्रकर्षाय सर्वथा प्रभवतीति कविप्रवरस्याशयः। यथा स्पर्शमणिसंसर्गाल्लोहमपि स्वर्णतां याति तथैव गुणिजनसंसर्गात् गुणरहितोऽपि जनः गुणवान् जायते। तथैव दुर्गुणिसम्पर्काद्दुर्गुणी भवति। इत्यत्र नास्ति सन्देहलवोऽपि। अतः सत्यमुक्तं कविना—

यादृशो यस्य संसर्गो भवेत्तद्गुणदोषभाक् ।
अयस्कान्तमणेर्योगादयोऽप्याकर्षको भवेत् ॥

वस्तुतः सत्सङ्गवशादेव मानवः समुन्नतो भवति । सज्जनानां सम्पर्केण जनः सज्जनः भवति, दुर्जनानां संसर्गेण च दुर्जनः । स्थाने एवोक्तं "संसर्गजा दोषगुणा भवन्ति" इति । अतः सौजन्यसमुन्नतिश्चेच्छुता जनेन सर्वदा सतामेव सङ्गतिर्विधेया न कदाप्यसताम् । उक्तमपि—

सद्भिरेव सहासीत सद्भिः कुर्वीत सङ्गतिम् ।
सद्भिर्विवाद मैत्रीञ्च नासद्भिः किञ्चिदाचरेत् ॥

असद्भिः दुर्जनैः सह सङ्गतिं कुर्वाणो मनुष्यः निरपवादरूपेण दुर्जनतां प्रव्रजति । सत्सङ्गतिं कुर्वाणश्च पुनः सर्वाङ्गीणमुन्नतिपदमासादयति । उक्तं च सङ्गतिफलं विवृण्वता केनापि कविना—

पापान्निवारयति योजयते हिताय,
गुह्यं निगूहति गुणान् प्रकटीकरोति ।
आपद्गतं च न जहाति ददाति काले
सत्सङ्गतिः कथय किन्न करोति पुंसाम् ॥

अतः सज्जनानां सङ्गतिरेव अविनाभावत्वेन समुपास्या । सज्जनः सर्वदा जनान् पापकर्मणो निवारयति । यानि हितानि कल्याणकराणि च तत्त्वानि तान्येव अनुष्ठेयत्वेन निर्दिशति नाहितसाधकानि । हीनोऽपि जनः सत्संसर्गवशात् महान् भवति, स्तेनोऽपि परोपकारप्रवणो भवति । वाल्मीकिसदृशाः सत्संसर्गवशान्मुनिवृत्तिपरा महर्षयोऽभूवन् । एवमेव असत्संसर्गेण मानवोऽपि दानवो जायते । सकलगुणालङ्कृतोऽपि विविधविद्याविभूषितोऽपि सत्कुलीनोऽपि निन्दनीयतां वचनीयतां च अर्जति । च्यवते च नितरां मनुष्यपदात् । सर्वत्र समवहेल्यते विद्वज्जनैः । सर्वेषां जायतेऽनादरास्पदम् । उक्तं च यथा—

असतां सङ्गदोषेण को न याति रसातलम् ।

किञ्च—

हीयते हि मतिस्तात हीनैः सह समागमात् ।
समैश्च समतामेति विशिष्टैश्च विशिष्टताम् ॥

एनेन एतदपि समुपदिष्टं भवति यत्सत्सङ्गतिरपि स्वापेक्षयगुणैर्गरिष्ठस्यैव विद्यागरिष्ठस्यैव महात्मनः विधेयत्वेनोपदिष्टा, तदेव सोत्तमफलाय कल्पते नान्यथा । नूनं महतां सङ्गेनैव जनो महान् भवति—

काचः काञ्चनसंसर्गाद्धत्ते मारकतीं द्युतीः ।
तथा सत्सन्निधानेन मूर्खो याति प्रवीणताम् ॥

दृश्यते यत् सत्पुरुषाः सर्वदा जनैः पुष्पमालाधानैः सम्मान्यन्ते, पुष्पानुशायिनः क्षुद्राः कीटा अपि कुसुमसङ्गप्रसङ्गात्सतां शिरः समारोहन्ति, अन्यथा वराकस्य कीटस्य सतां शिरः समारोहणप्रसङ्गो नितरामसम्भव एव किल। एवं गणनातीतैः कविवरैः सत्सङ्गतेर्माहात्म्यवर्णनं मुक्तकण्ठं कृतमवलोक्यते। किञ्चाथर्वद्वर्णयेत—

जाड्यं धियो हरति सिञ्चति वाचि सत्यम्
मानोन्नतिं दिशति पापमपाकरोति।
सन्तोषमाकलति दिक्षु तनोति कीर्तिम्
सत्सङ्गतिः कथय किन्न करोति पुंसाम्॥

किन्नाम तद् हितं यत्सत्सङ्गतिर्न वितनुते। एतदवधेयमत्र। यथा यथा सत्सङ्गतिः प्रभवति तथा सत्त्वगुणोद्रेको विजृम्भते, प्रस्फुरति च सत्त्वगुणोद्रेकविशेषे सत्सुरक्षणानि, प्रशस्तकर्माण्येव जनः विधानुमुपक्रमते, सञ्चिनोति परितः प्रसत्वरां यशश्चन्द्रिकाम्। यथा यथा च जनोऽसङ्गतिमुपसन्दधाति तथाऽयशोगर्ते निपतति। नूनं यावत्क ल्याणजातसम्पत्सम्पादनसाधनं सत्सङ्गतिरसङ्गतिश्च पुनर्ध्रुवमकल्याणं करोतीति निर्विवादम्। अत एवोक्तम्—

"सतां सद्भिः सङ्गः कथमपि हि पुण्येन भवति।" यद्यपि सत्सङ्गतिप्रसङ्गः कैश्चित्पुण्यकृद्भिरेवाप्यते न सर्वैः तथापि यथाशक्ति प्रयत्नस्तु आस्थेय एव सतामेव वर्त्म च सर्वात्मना अनुसरणीयमेव।

यदि तेषामुद्दिष्टं पन्थानं कार्त्स्न्येनानुगन्तुं शक्यं न भवेत् तदांशत एव समनुसर्तव्यम्। तद्यथा—

अनुगन्तुं सतां वर्त्म कृत्स्नं यदि न शक्यते।
स्वल्पमप्यनुगन्तव्यं मार्गस्थो नावसीदति॥

येषां मानसमन्दिरे सत्सङ्गप्रणयिनी वृत्तिः निरन्तरं जागर्ति विग्रहवती सती ते स्वजीवनेऽवश्यमेव रक्षन्ति कल्याणकल्पद्रुमामृतमयं रसमिति निर्विशङ्कम्। अत आत्मकल्याणाभिलाषुकेण जनेन दुर्जनसङ्गतिमपास्य सर्वात्मना सत्सङ्गतिरेवोपास्या सत्सङ्गवैशिष्ट्यगणान्गाय गायमनेकैः कवीश्वरैः स्वकीया काव्यकला निर्मलीकृता।

गङ्गेवाघविनाशनी जनमनः सन्तोषसच्चन्द्रिका
तीक्ष्णांशोरपि सत्प्रभेव, जगदज्ञानान्धकारापहा।
छायेवाखिलतापनाशनकरी स्वर्धेनुवत् कामदा
पुण्यैरेव हि लभ्यते सुकृतिभिः सत्सङ्गतिर्दुर्लभा॥

किञ्च—

सन्तप्तायसि संस्थितस्य पयसो नामापि न श्रूयते
मुक्ताकारतया तदेव नलिनी पत्रस्थितं राजते।
स्वातौ सागरशुक्तिसम्पुटगतं तज्जायते मौक्तिकम्
प्रायेणाधममध्यमोत्तमगुणः संसर्गतो जायते॥

भगवति वेदेऽपि च सत्सङ्गतेर्महती प्रशंसा कृताऽवलोक्यते ।

शुक्रोऽसि भ्राजोऽसि स्वरसि ज्योतिरसि ।
आप्नुहि श्रेयांसमतिसमं क्राम ॥ अ० वेदे ॥

मनोऽयं विस्पष्टमभिप्रैति यज्जीवात्मा निसर्गतः शुभ्रज्ञानप्रदीप्तः सुखसम्पन्नः ज्योतिष्मान् सन्नपि जन्मान्तरसञ्चिताज्ञानतिमिरावरणेनावृतो भूत्वा अधमतां याति स्वरूपं विस्मरन्, तदज्ञानावरणस्य निवृत्तिः सत्सङ्गसङ्गेनैव भवितुमर्हति । सत्सङ्गति विधानोऽयं निर्धूतसकलकल्मषः स्फटिकमणिरिव शुद्धान्तःकरणः परिताभासमान यशसः कीर्तेश्च पराकाष्ठामवगाहते मानवजन्मनश्च साफल्यं भजते यच्च अकृतपुण्यानां न सुलभम् इति । किं बहुना—

> कल्पद्रुमः कल्पितमेव सूते सा कामधुक् कामितमेव दोग्धि ।
> चिन्तामणिश्चिन्तितमेव दत्ते सतां तु सङ्गः सकलं प्रसूते ॥
> वरं गहनदुर्गेषु भ्रान्तं वनचरैः सह ।
> न दुर्जनसम्पर्कः सुरेन्द्रभवनेष्वपि ॥
> अतः सत्सङ्ग एवोपादेयः हेयश्च कुसङ्गः सर्वदेति ।

इत्यलं पल्लवितेन ।

१५—बुद्धिर्यस्य बलं तस्य

अथवा

दीर्घौ बुद्धिमतो बाहू

इह संसारे यानि गुरूणि कार्याणि तानि बुद्धिमद्भिरेव कृतानि न कदापि जडमतिभिः । पुरा आधुनिके वा युगे यानि सारभूतानि वैज्ञानिकानि वा कार्याणि दृश्यन्ते तानि सर्वाण्यपि बुद्धिमद्भिः विज्ञानवेत्तृभिरेव सम्पादितानि । कस्य चिदपि कार्यस्य सम्पादने बुद्धिरेव प्रधानभूतं साधनं विद्यते मानवानाम् ।

अथ का नाम बुद्धिः । तत्रोच्यते । बुद्धिः बोधनात्, यया बलाद् विषयाः सम्यग् बोध्यन्ते ज्ञायन्ते सा बुद्धिः, बुध्यते अनेनेति व्युत्पत्तेः । बुद्धिर्हि ज्ञानात्मिका शक्तिविशेषः । बुद्धिमान् हि मानवः यस्मिन् कस्मिन् वापि विषये पदमाधत्ते तस्मिन्नेव विषये स्वबुद्धिचमत्कारं प्रदर्शयति । सत्यमेतत्, किन्तु नायं सार्वत्रिको नियमः । कस्मिंश्चिद् विषये निपुणतरोऽपि कश्चित् विषयान्तरे जाड्यं प्रदर्शयति । कश्चित् छात्रः गणितविषये मन्दोऽपि भाषायाम् अतिमेधावी विलोक्यते । अत एव व्यापकभेदाः बुद्धेर्भेदा अपि जायन्ते । स च बुद्धिभेदः कर्मानुबन्धी भवति । बुद्धयस्तावत् त्रिविधा दृश्यन्ते—बोधात्मिका, प्रेरणात्मिका, उभयात्मिका च । तासु बोधात्मिका

सामान्या, प्रेरणात्मिका च विशिष्टा, उभयात्मिका पुनः सविशेषा भवति। सविशेष-बुद्धिमन्तो हि मानवाः विशिष्टा महान्तश्च जायन्ते। त एव मेधाविन इति पदेन व्यपदिश्यन्ते। तथा च श्रुतिः—

या मेधा देवगणाः पितरश्चोपासते।
तया मामद्य मेधया मेधाविनं कुरु॥ इति।

प्रेरणात्मिका हि बुद्धिः सदा फलवती भवति। बुद्धिर्हि ज्ञापयति खलु यथार्थं तत्त्वम्। प्रेरणा च पुनः मानवं बुद्धिसङ्गतं तत्त्वं क्रियान्वयीकर्तुं प्रचोदयति तदेत-द्बुद्धिप्रेरणयोः ज्ञानकर्मणो वा फलं कठिनतरेषु असम्भवप्रायेषु कार्येष्वपि सर्वा-ङ्गीणां सिद्धिरिति। अतएव अयमेव महतामुपदेशो यत् बुद्धितत्त्व सर्वात्मना पालनी-यम्। बुद्धिनाशकानि अमेध्यानि यद् द्रव्याणि—पलाण्डुलशुनगृंजनकवकपललला-गर्भजातानि न कदापि सेव्यानि। मेधायै हितकारीणि सात्त्विकानि पयोदधिनवनीत-घृतादीनि बुद्धिप्रसादकानि कन्दमूलफलादीनि सदा सेव्यानि न जातु बुद्धिमाद्य-कराणि तामसानि द्रव्याणीति। सा च बुद्धिः पुनः द्वेधा प्रदिष्टा मनोविज्ञानपण्डितैः व्यवसायात्मिका, संशयात्मिका चेति। व्यवसायात्मिका बुद्धिरेव साफल्यं भजते न पुनः संशयात्मिका। व्यवसायात्मिका बुद्धिद्वारा कृतसङ्कल्पतया समारब्धा उद्योगा विघ्नैः पुनः पुनरपि प्रतिहन्यमाना आसिद्धयवधि प्रचलन्त्येव न कथञ्चिदपि विरता भवन्ति। बुद्धिर्हि तावत् ज्ञानस्य साधनं, ज्ञानस्योपाकरणम्। सा पुनश्चेतना। पर चितिशक्तेः सान्निध्यतात् अयस्कान्तमणिकल्पा सा चितिशक्तेः प्रतिबिम्बोद्ग्राहितया चैतन्यरूपता बिभ्राणाऽर्थाकारपरिणतार्थमवबोधयति तेन योऽसौ तत्तदर्थाकारपरि-णामो बुद्धेः स ज्ञानलक्षणावृत्तिरिति पदेन व्यवह्रियते। तदिद बुद्धितत्त्व जडप्रकृति-तया इन्दुमण्डलमिव स्वयमप्रकाशं चैतन्यसूर्यमण्डलच्छायापत्त्या प्रकाशमानः प्रकाशयत्यर्थान्।

एवं बलहीनोऽपि मानवः निजयाऽलौकिकबुद्धया मत्तानपि गजान्, अतिबल-शालिनः सिंहान् स्ववशं नयति। सरकसनामके क्रीडास्थले मानवेन प्राणघातका अपि वन्यपशवः स्वबुद्धिप्रभावेण स्ववशं नीताः।

आधुनिके युगे यानि नूतनानि आविष्काराणि—टेलीग्राफ-टेलीफोन-रेडियो-एक्सरे-टेलीविजन-वायरलेस-एरोप्लेन-रेलवे-टैंक-टारपीडो राकेटादीनि सन्ति तानि सर्वाणि मनुष्यबुद्धयैव निष्पादितानि सन्ति। अद्य मानवः स्वबुद्धिबलेनैव चन्द्रलोकं जिगमिषति। अतः एतन्निर्विवाद यत् मानवस्य प्रज्ञैव चक्षुः बुद्धिरेव बाहू इति। स बाहुभ्यामसाध्यमपि कार्यं स्वबुद्धया सम्पादयति। इति दिक्।

१६—प्रजातन्त्रशासनपद्धतिः

अथ किं नाम प्रजातन्त्रशासनम्? उच्यते। प्रजायाः शासनं, प्रजया शासनम्, प्रजायै वा शासन प्रजातन्त्रम् इत्युच्यते। प्रजातन्त्रशासने खलु वस्तुतः प्रजैव राजा भवति, अतः प्रजातन्त्रसंविधानपि प्रजायाः संविधानं सम्पद्यते। प्रजया निर्वाचिताः

प्रतिनिधयः प्रजातन्त्रशासने अधिकारिणो भवन्ति । तत्र प्रजा स्वमताधिकारेण लोकसभाराजसभाप्रभृतिसदसदा निर्माणं करोति । अखिलमपि च शासन-निर्वहण-यन्त्रं स्वयमेव रचयति । प्रजैव प्रत्यक्षाप्रत्यक्षरूपनिर्वाचनपद्धत्या प्रातिनिधिकरण्या शासनचक्रं ससृजति संहरति च । योग्या प्रजा सर्वाङ्गसुन्दरशासनशासन विधान च निर्मिमीते अयोग्या चायोग्यम् । पाश्चात्यविशारदा अपि प्रजातन्त्रलक्षणमेव विदधति यत् प्रजायाः प्रशासनं, प्रजायै प्रशासन प्रजया वा प्रशासन प्रजाशासन-मिति । "यथा राजा तथा प्रजा" इत्यासीत् प्राचा प्रवादः । पर प्रजातन्त्रे स एव न्यायः विपर्यासं भजते । 'इदानीं' तु यथा प्रजा तथा प्रजा इत्येवोचित प्रतिभाति । प्रजातन्त्रशासनस्य तदैव साफल्यं भवितु शक्नोति यदा प्रजाः सुशिक्षिताः शिष्टाः, धर्मपरायणाः, कर्त्तव्यनिष्ठिताः, परोपकारव्रताः, नीतिनिपुणाश्च स्युः नान्यथा ।

तदिदं प्रजातन्त्रशासन कदा कथं वा प्रादुर्बभूव इति प्रश्नः निसर्गतयैवोदेति । पुरावृत्तानुशीलनेन ज्ञायते यत् कालानुसार परिस्थितिवशवदतया च नैका राज-पद्धतयः प्रचलिता यथा कुलीनतन्त्रम्, क्रूरतन्त्रम्, अल्पजनतन्त्रम्, मूर्खजनतन्त्रम्, राज्यतन्त्रम्, प्रजातन्त्रम् इत्यादीनि विविधानि राजतन्त्राणि यथासमय प्रादुरभूवन् । एतासु शासनपद्धतिषु सर्वोत्कृष्टा प्रजातन्त्रपद्धतिरेव इत्यत्र न कस्यापि विप्रतिपत्तिः । अस्याः पद्धतेः प्रादुर्भाव- इटली देश एव समभवद् इति भूयसामितिहासज्ञाना सम्मतिः । तत्र गेरिबाल्डी महोदय आसीत् यः खलु महान् क्रान्तिकारी अस्याः पद्धतेराविष्कर्ता चासीत् । अपरो महापुरुषस्तत्रैव प्रादुरभूत् यस्य नाम 'मेजिनी' इत्यासीत् । केचित् गेरिबाल्डी महादयं मेजिनीमहोदयस्य प्रचारकमेव मन्यन्ते । भवतु परमिटली देशः अस्याः पद्धतेः प्रसरभूमिरिति तु निर्विवादमेव । भारतीयशास्त्रानु-शीलनेन ज्ञायते यत् इय पद्धतिः प्राचीनभारतेऽपि प्रचलिता आसीत् । ऋग्वेदे राज्ञः प्रजातन्त्रत्वमुपन्यस्तम्—

"विशस्त्वा सर्वा वाञ्छन्त । मास्वद्राष्ट्रमधिभ्रशत्" अर्थात् सर्वाः प्रजाः त्वा कामयन्ताम् त्वदीयराष्ट्रञ्च प्रजातन्त्रमपि स्वराज्यसवलित भवेत् ।

तैत्तिरीयब्राह्मणे च—

"विशि राजा प्रतिष्ठितः" ।

विशि प्रजायामेव राज्ञः प्रतिष्ठान भवति । प्रजया निर्वाचनपद्धत्या राजा प्रति-ष्ठापितो भवतीत्यर्थः ।

स्वराज्यं हि नाम राष्ट्रस्य परमोत्कर्षधायक तत्त्वम् । सर्वेषा स्वराष्ट्रियप्रजाजनाना सम्मत्या प्रातिनिध्यविधया प्रवर्तितं यद्राज्य तत्स्वराज्यपदेन व्यपदिश्यते । तादृश-स्वराज्योपलब्ध्यर्थमेव जनैः प्रयतितव्यम् इति ऋग्वेदेऽपि समुपदिष्टम् । वेदे स्वराज्य-महिमा वर्णनार्थमेकमखिलं सूक्तमेव पठ्यते, तद्धि स्वराज्यसूक्तमिति नाम्ना कथ्यते । अन्यत्रापि बहुत्र स्वराज्यगुणगरिमाऽवलोक्यते—

यदजः प्रथमं संबभूव सह तत्स्वराज्यमियाय।
यस्मान्नान्यत् परमस्ति भूतम्। ऋक्।

कस्यापि राष्ट्रस्य कृते स्वराज्यसदृशमन्यत् भूतं प्रभूतं वैभवं नास्ति। एतेन ध्वन्यते प्रस्फुटं यत् प्रजातन्त्रं शासनमपि तदेवोत्कृष्टं यत्स्वराज्यसंचलितं भवेत्।

एष प्रजातन्त्रप्रसङ्गः अन्यत्रापि संस्कृतसाहित्ये दरीदृश्यते। प्रायशः वर्षाणां सहस्रद्वयी व्यतीयाय यदा राजनीतिनिपुणः कौटल्यापरनामधेयः आचार्यचाणक्यः बभूव। तेन कूटनीतिधुरंधरेण एकायत्तं नन्दवंशप्रशासनमुच्छिद्य मौर्यकुलभूषणं चन्द्रगुप्तं राज्यसिंहासने प्रतिष्ठापयामास। महान् राजनीतिज्ञः कौटल्यः चन्द्रगुप्तस्य कृते साम्राज्यधुरं निर्वोढुमर्थशास्त्रमिति लोकविश्रुतं राजनीतितन्त्रं प्रणिनाय। यत्र प्रजातन्त्रपद्धतिमेवावलम्ब्य राज्यतन्त्रं सञ्चालयितव्यमिति सर्वं सुनिपुणं प्रतिपादितम्। शास्त्रमिदं राज्यचक्रसञ्चालनीपयिकान् अर्थान् अनुबध्नाति राजाप्रजाऽनुबन्धिनः समस्तानप्यावश्यकान् विषयान् संस्पृशति। ग्रन्थरत्नमिदमवलोक्य पाश्चात्या अपि नीतिविशारदा विस्मिता भवन्ति यद्भारतेऽपि ईदृशा नीतिनिपुणाः पण्डिताः समजायन्त।

अस्याः पद्धतेः दोषाः—अस्यामनेके गुणाः सन्ति दोषा अपि नैके। यदि दोषा अस्याः पद्धतेः सावधानतया न दूरीकृताः स्युः तदेयं पद्धतिरभिशापतां व्रजति। प्रथमो दोषस्तावत् दलगतपक्षपातस्य। प्रजातन्त्रशासने केनापि दलविशेषेण न भवितव्यम्। प्रजातन्त्रीयनियमानाश्रित्यैव निष्पक्षपातेन निर्वाचनादिकार्यजातं भवेत्। अधिकारिणां नियुक्तिरपि योग्यताधारे स्यात्। दलविशेषस्य शासनं न कदापि निर्दोषं भवति। एवं विधं शासनं प्रजातन्त्रस्य महान् दोषः। शासनारूढं दलं स्वपरिपुष्टये दलान्तरस्य निराकरणाय च सदैव यतते। विशुद्धप्रजातन्त्रीयशासने इमे दोषा न निर्वहणीयाः। द्वितीयो महान् दोषः अयोग्या निर्वाचकाः। निर्वाचनयोग्या एव जनाः सुयोग्यान् सदस्यान् अधिकारिणश्च निश्चिन्वन्ति। परप्रत्ययनेयबुद्धयस्तु जनाः सदैव निर्वाचनपद्धतेः कलङ्का एव जायन्ते।

प्रथम परिशिष्ट

शब्दरूपावली-अनुक्रमणिका

द्वितीय परिशिष्ट

धातुरूपावली-अनुक्रमणिका

अशुद्धि-शोधन

पृष्ठ	पंक्ति	अशुद्ध के स्थान पर	शुद्ध पढ़िए
३५	२३, २८	हे सखा	हे सखीः
१३२	२७	विकशिति	विकसति
१६६	३४	चतुर्थी	पञ्चमी
३७६	१८	विग्रह	निग्रह
३८८	२७, २८	गृह्वाति	गृह्णाति
५७१	१३	सौहार्द्राद्वा	सौहार्दाद्वा
६००	२३	निनायतः	निनायति
६६४	२९	विधाधनं	विद्याधनं